hero is Chandragupta, possessed of the qualitics of the *Dhīrodātta Nāyaka*. The prevailing sentiment is *Vīra* or heroism. The *Bîja* is cast where Chāṇakya gives expression to his design and his firm resolve to make efforts to force Rākshasa to accept ministerial officer under Chandragupta and thereby to give stability to his rule. (see com. pp. 6-7). The *Bindu* is the gaining of Rākshasa's seal-ring by Chāṇakya which enables him to forge a letter to entrap Rākshasa. This circumstance, together with the *Kārya*, gives our play its name. (See Notes, p. 1). The *Pátākà* in our play is the long dialogue between Rākshasa and Virādhagupta (commencing at p. 100) indicative of the utter failure of the counter-efforts of Rākshasa and the success of his adversary. The *Prakarī* or the fourth element of the plot is, in the present play, the report brought by Karabhaka about the sham quarrel between Chāṇakya and his pupil. The *Kārya* is the final surrender of Rākshasa with the words का गतिः । एष प्रह्वोऽस्मि । (p. 364). The various Saṁdhis with their proper *aṅgas* are indicated by the Com. and need not be dwelt on here.

(7) Critical and General Remarks.

The Mudrārakshasa, unlike the majority of Sanskrit plays, is purely a political drama, and as such derives its subject-matter from history. It belongs to the species of dramatic writing styled 'Nāṭaka'. It has for its theme the winning over of Rākshasa, the hostile minister of the Nanda dynasty in Magadh, to the side of Chandragupta, the new king, set on the throne of the Nandas by Chāṇakya. The language is in perfect keeping with the political character of the play. It lacks, as it should, the beauty and delicacy of Kālidāsa's plays, but it is business-like and vigorous throughout. It is lucid, forcible where necessary, and free from intricate or misleading compounds. It is sometimes terse or even laconic, and yet not without feeling and pathos where occasion requires them. The dialogues are marked by a pleasing simplicity often enlivened by wit and pithy sayings. It is true that the style sometimes becomes laboured and heavy, especially in

the more elaborate metrical parts, but it is a defect not easily avoidable in such cases.[1] A singular feature of the present play is that no female appears among its principal *dramatis personae*. "The business of the play," remarks Mr. Telang, "accordingly is diplomacy and politics, to the entire exclusion of love. There is, in truth, but one female character, with one little child, introduced into the play, and these are Chandanadāsa's wife and son, who come in at the beginning of the last Act. But even their appearance introduces no passages suggestive of tenderness or the purely domestic virtues, but only of sacrifice—a stern sense of duty."

As regards its *dénouement* the Mudrārākshasa is second to the Mṛchchakaṭika only. The plot is arranged and developed with a masterly skill not displayed in any other play save the one mentioned. The unity of action is admirably maintained, all the events being made to converge to one end, *viz.* the conciliation of Rākshasa. It is clearly announced at the very beginning; all the means are directed to secure this end; and the various occurrences, in part accidental and unforeseen but most of them deliberately planned and effected, are with great skill made subservient to it. Chāṇakya, with a whole host of spies around his victim—his political opponent, Rākshasa—watches every one of his movements, foils him in his efforts and ultimately succeeds in throwing him into so desperate a condition, that he has to yield, seeing no alternative but either base ingratitude towards a heroic friend or the office of minister under his accursed foe. Well designed at the beginning, vigorously pushed on now under cover, now on open track, though resisted yet ever advancing straight towards the goal, and turning to profit the incidental events

---

1. Viśākhadatta's diction is admirably forcible and direct; the martial character of his drama reflects itself in the clearness and rapidity of his style. An artist in essentials he uses images, metaphors and similes with tasteful moderation ; alone of the later dramatists, he realises that he is writing a drama, not composing acts of elegant extracts.

The Sanskrit of the Mudra. is classical and the Prakrits number three; for in addition to the normal Śaurasenī and Mahārāshtrī, Māgadhi is used by the Jain monk, by Siddhārthaka and Samiddhārthaka as Chandālas, by a servant and an envoy.

Dr. Keith.

on the way, and rapidly developing into complete success, the plot possesses the chief requisites of a piece of art—unity in variety, entire subordination of the individual factors to one idea and plan, and the harmonious co-operation of the parts to one crowning effect. "It may be difficult," says Wilson, "in the whole range of dramatic literature to find a more successful illustration of the rule."

The play commends itself further on the point of interest which, once awakened, is continually kept up by change of scenery, of persons, opposing views and conflicting events and by a variety of life-like descriptions, some of them highly poetic and stirring.

This drama is objected to on the ground of its bad moral.[1] A good drama ought to teach a moral lesson. Virtue should always succeed in the long run, and vice and cruelty be punished, as they deserve. But here the order seems to have been reversed, inasmuch as vice is represented as gaining the upper hand over virtue—fraud triumphing over honesty of purpose. But to those who will read the drama in its true spirit this objection will not appear to be just. Fraud is used no doubt, but it is used only as a means to achieve a noble end. Chāṇakya, the principal character in the play, has used several stratagems to win over Rākshasa to Chandragupta's side. But this he did because he knew that Rāk. was a firm and devoted minister of his master—a man of sterling virtue and high administrative talent. He also knew that he (Rāk.) was the champion of a lost cause. To allow him to have his own way would have entailed needless and untold suffering and misery, not only on him but also on the innocent people. To avoid all this and to see that virtue was properly

1. It is a historical or political drama, and represents a curious state of public morals, in which fraud and assassination are the simple means by which inconvenient obligations are acquitted, and troublesome friends or open enemies removed. It is not, however, that such acts are not held in themselves as crimes, or that their perpetrators, if instigated by vulgar vice or ferocity, are not condemned as culprits; it is only when the commission of the crime proposes a political end that it is represented as venial, and is compatible with the possession of great virtues, and even with an amiable character.

H. H. Wilson.

rewarded Chāṇkya directed all his efforts. He could have retained office as chief minister for himself had he chosen it and done very well without Rākshasa. But this was not his object; he never meant to seek self-elevation. Thus we can show that fraud is not used here to satisfy a selfish end. Chandanadāsa's fidelity to his friend is also adequately rewarded. The course of policy followed by Chāṇakya is that of crookedness, no doubt. But then he was driven to adopt such a course by the exceptional circumstances of the time. The Nandas had became unpopular and a political revolution had threatened Magadha. Chandragupta had appealed to him for help : and Chān. knew that in helping him he would be helping the right man. Now the question before him was—now to accomplish his object with the least possible bloodshed or trouble to the people—whether to be guilty of innocent fraud and the adoption of extreme means for the removal of a few political adversaries or to plunge the country into general warfare and carnage; and he chose the lesser of two evils. Not that he did not know the sinfulness of his doings but that he could not help it. Thus the murders of Parvataka and Sarvārthasiddhi as also of the five allies of Malayaketu were political necessities. The unsuspecting Malayaketu was treacherously betrayed and made a captive, but this end accomplished, Chān. restored him to his original possessions. Beyond the few incidents mentioned above, there is not a single case of homicide for which Chāṇakya is directly responsible. The threatened executions of Śakaṭ and Chandanadāsa were meant more as political expedients than facts to be accomplished. And the decapitations of the executioners of Śakaṭadāsa, is, as remarked by Mr. Dhruva, a political lie; and not a fact. For had it been a fact Sidh. and Sami. would not have so readily agreed the fact as the executioners of Chandanadāsa. Thus we see that the immorality of the policy of Chāṇakya is greatly redeemed by his desire to avoid general bloodshed (*cf.* दग्ध्वा संभ्रान्तपौरद्विजगणरहितान् &c. I) and the utter absence of selfishness. The same may be said of the policy of Rākshasa. In judging of the actions of statesmen we must remember that theirs are the ethics of politics and not of

ordinary life. It would be certainly wrong to judge and form an estimate of the morals of a society from the doing of a few individuals under political exigencies. How difficult the statesman's task is the poet tells us in IV. 3 (कर्ता वा नाटकानां···क्लेशमस्मद्विधो वा.)

(8) The Principal Characters.

Of the characters represented in the play, Chāṇakya and Chandragupta are real historical personages. Rākshasa, too, must be so. For such an important character in the play could not have been a creation of the poet's fancy. Again, had it been a fictitious name, the poet could not have chosen such a reprehensible name as Rākshasa. Malayaketu may also be a historical person. Nipuṇaka, Virādhagupta, &c. as their names indicate, are, no doubt, fictitious characters.

Chāṇakya was the son of the sage Chaṇaka. His own name was Vishṇugupta. Owing to his crooked policy he was nick-named Kautilya. He is also identified by some with Vátsyāyana,[1] the writer of the well-known Kāmasūtras. He was profoundly learned in the Vedic lore and was well versed in the occult charms and mystic rites taught in the Atharva Veda. He was a thorough master of state-craft, so great that Kāmandaka speaks reverentially of him at the beginning of his work, the Nītisāra, and pays his tribute of respect to him. (See com. P. 7.) He is said to have compiled an epitome of the science of politics for Chandragupta[2]. He was the advocate of doctrine of Sukritya or thoroughness of action सुकृत्यं विष्णुगुप्तस्य Pt. II.). Nothing is historically known

1. His different names as given by Sanskrit lexicographers are—

विष्णुगुप्तस्तु कौटिल्यश्चाणक्यो द्रामिलोऽङ्गुलः ।
वात्स्यायनो मल्लनागपक्षिलस्वामिनावपि ॥

त्रिकाण्डशेष as quoted by Mr. Dhruva.

2. अधीष्व तावद्दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता । D. K. VIII. p. 191.

about Rākshasa. According to tradition he lived, at first unknown to fame, near the residence of Chandanadāsa in Kusumapura. His name was Subuddhiśarman. One day the king Nanda had a riddle sent to him which no one at his court could solve.[1] Upon this the king sent for Subuddhiśarman. He solved it at once and the king was so much pleased with his ready wit and acuteness of intellect that he immediately appointed him his prime-minister. He was also a good swordsman and as he fought with the strength and fierceness of a giant. He soon came to be called Rākshasa. See II. 14, wherein his feats on the battle-field are described.

The principal characters in the play are the pairs—Chāṇakya and Rākshasa, Chandragupta and Malayaketu, Chāṇakya being the most important of them all. Chāṇakya and Rákshasa are both introduced in the play in their official characters. Both are distinguished by an utter absence of all idea of self-interest.[2] Both have an ultimate end to gain and both are intriguing politicians; but here ends all that is common to them. The poet has been successful in finely drawing the contrast between the characters of these two politicians Chāṇakya is represented as a clear-sighted statesman of sound

1. It was this—Some kings, who were hostilely disposed towards Nanda and wanted to attack his territory, were told by their ministers that so long as Nanda had wise ministers to guide him it would be vain to expect to conquer him. To ascertain whether there was a clever and ready-witted minister at the court of Nanda they got a piece of wood well planed and of perfectly equal thickness, put it in a gold box and sent it to king Nanda with a letter requesting him to mark the root-end of the piece. Neither Nanda nor his ministers could find out that. So the king entered the inner apartment and asked one of the maids, Sumaṅgalā by name to bring the Brāhmaṇa Subuddhiśarman, whom she knew, to him. He on coming said to the king—'Sire, what is puzzling in this?' Put the piece in water and that end which will sink a little lower in the water is the end towards the root of the tree, as it must be comparatively heavier."

2. *Cf.* Chāṇakya has to fulfil a vow, but that accomplished, relinquishes rank and power; and Rākshasa, whilst he pursues Chandragupta with hostility, seeks only to revenge the death of his former sovereign without the thought of acquiring fortune of dignity for himself.—Wilson.

judgment, never erring in his estimate of men or selection of proper agents. He is firm of resolve and cool-headed and resourceful even under trying circumstances. By his foresight he not only frustrated the plans of his enemies, but by his wisdom and vigilance turned them to his own advantage. And who will say that the praise bestowed on him by his servants Bhāgurāyaṇa and Siddarthaka was not bestowed rightly; see V. 3 and VI 1. Rākshasa on the other hand, is represented as a better soldier than a politician, blundering in his schemes and not a proper judge of means or the characters of men. He is too noble-hearted to distrust any one about him. His faithfulness to his masters is exemplary. The destruction of the house of the Nandas weighed heavily upon his mind and consequently his judgment was often warped by his over-zeal in their cause. The one thought that took complete possession of his mind was how to wreak vengeance for his master's destruction on Cháṇakya and Chandragupta. This led him to engage even persons of untried integrity into his service and to confide his secrets to them. That a man was a deserter from the enemy's camp was enough to gain his confidence. To turn to Chaṇakya, he is wrongly called the Machiaveli of India. Though some of his actions look Machiavelian-like, his guiding principle was not *expediency* as opposed to *right*. He had a noble mission before him and the whole tenor of his life was self-less. Nor was pride of caste the ruling principle with him, as remarked by Wilson. True that he addresses Chand. as Vṛśala, but that was out of his almost paternal affection for him and not owing to the pride of caste, else Chandragupta could not but have resented it. The play does not speak of his having raised any of his Brāhmaṇa accomplices to eminence. Wilson's remark that Chāṇakya revenges wrongs done to himself is also unwarranted by anything in the play. For the play begins after the fall of the Nandas and Chāṇakya's personal wrong had been avenged The avowed object of Chānk's policy, clearly stated at the beginning, is giving stability to his pupil's sovereignty by the consolidation of his empire (pp. 24. 28). The following traits of his character are well brought out in the play. (1) He is self-confident;

see his speech at pp. 22, 76. (2) He is a kind-hearted preceptor (p. 20). He is a harsh but generous master, else his servants could not have loved him so well. (3) His magnanimity is exceptional. (4) He is always ready to praise his enemies for their noble qualities : see pp. 12, 352, 354 (where he calls Rāk. महात्मा), 70 (where he praises Chandanadāsa) (5) the simplicity of his life and his utter disregard of earthly grandeur do ample credit to him as the scion of a saintly family; see Kanch.'s description of his house at p. 158. (6) His mastery over his mind. Even the cleverest of his servants were not able properly to guage his mind or to comprehend his policy. (7) He is haughty and overbearing, but it was owing to this that he was feared by all. And if he boasts of his doings it was not an idle boast as remarked by Chandanadāsa (see p. 66). (8) He is a staunch advocate of industry and has no confidence in the working of fate; p 192. (दैवमविद्वांसः प्रमाणयन्ति). His policy is thorough.

His adversary Rāk. has no perfect mastery over his mind. He is unable to keep his secrets from his servants. He betrays the name of Virādhagupta, although he had at first concealed it from his servant (pp. 98, 126). He is somewhat superstitious, see p. 96 (वामाक्षिस्पन्दनं-सर्पदर्शनं); p. 240 (क्षपणकदर्शनं); p. 236 where he consults astrologers. He fails to impress Malaya. or his own servants with his personality. The servants of Chāṇ. stand in awe of him, while Siddhārthaka openly defies him. Rák., however, is generous and straightforward. He is also a loving friend. His love for Chandanadāsa was unbounded. He also shows a just appreciation of his adversary's merits (p. 354). The iron sinews of Chāṇ. do not bend before difficulty. Rāk. loses heart when he meets with the reverses of fortune; see his soliloquy in the 6th Act.

Of the other two rivals Chandragupta is represented as having a proper regard, nay veneration, for his Guru (III. 33) while Malayaketu's regard for Rākshasa is very scanty, Chandragupta is a very competent (III. 3.) prince who has the good sense to put absolute confidence in the ability and diplomatic skill of his preceptor and entirely submits to his counsels (pp. 144, 146, 356). Malayaketu has no confidence in

Rākshasa (p. 230), but regards him with suspicion (IV. 8.). He not only allows his faith in him to be easily shaken but actually dismisses him from his service (Acts 4—5). He is capricious and thoughtless as proved by his execution of the five princes. He has no strength of character and lends an easy ear to the insinuations of the agents of his enemy. Rāk. himself gives the contrast in his complaint against Malaya. in VII. 14.

Of the minor characters Chandanadāsa stands out as a noble example of friendly affection. He would rather lose all than be treacherous to a trusting friend. Even. Chāṇa. is impressed by this trait of his character and admires him inwardly. See p. 70. A devoted faithfulness to their master marks the other characters. They subordinate the consideration of right or wrong to the cause of their chief and adhere to it with a singular tenacity. They neither betray trust nor grow remiss in the discharge of their duty, although treated with indignity or subjected to physical punishment.

APPENDIX TO INTRODUCTION.

(*Taken from Wilson's Hindu Theatre*).

EXTRACTS FROM CLASSICAL WRITERS RELATING TO THE HISTORY OF SANDRACOTTUS.

He (Alexander) had learned from Phigaeus that beyond the *Indus* was a vast desert of twelve days' journey and at the farthest borders hereof ran the Ganges. Beyond this river dwell the *Tabresians* and the *Gandaritae* whose king's name was *Xandrames*, who had an army of 20,000 horse, 200,000 foot, 2,000 chariots and 4,000 elephants. The king could not believe this to be true, sent for *Porus*, and inquired of him whether it was so or not. He told him all was certainly true but that the present king of the *Gandaritae* was but of a mean and obscure extraction, accounted to be a barber's son; for his father being a very handsome man, the queen fell in love with him and murdered her husband, and so the kingdom devolved upon the present king :—*Diodorus Siculus*.

At the confluence of the Ganges and another river is situated *Palibothra* : it is the capital of the *Prasii*, a people superior to other. The king, besides his birth-name and his appellation from the city, is also named *Sandracottus*. *Megasthenes* was sent to him.

Megasthenes relates that he visited the camp of *Sandracottus* in which 400,000 people were assembled.

Seleucus Nicator relinquished the country beyond the *Indus* to *Sandracottus*, receiving in its stead fifty elephants and contracting an alliance with that prince (contractā cum eo affinitate).—*Strabo*.

Phegelas informed him, that eleven days from the river the road lay over vast deserts to the Ganges, the largest stream in India, the opposite bank of which the *Gangaridae* and *Parrhasii* inhabited. Their King was named *Aggramen*, who could bring into the field 20,000 horse and 200,000 foot, 2,000 chariots and 3,000 elephants. As these things appeared incredible to the king he referred to *Porus*, who confirmed what he heard. He added, however, that the king was not only of low, but of extremely base origin, for his father was a barber, whose personal merits recommended him to the queen. Being introduced by her to the king then reigning he contrived his death, and under pretence of acting as guardian to his sons, got them into his power and put them to death. After their extermination he begot the son who was now king, and who, more worthy of his father's condition than his own, was odious and contemptible to his subjects.—*Quintus Curtius*.

Megasthenes tells us he was at the court of *Sandracottus*.

The capital city of India is *Palembothrā* on the confines of the *Prasii* where is the confluence of the two great rivers, *Erranoboas* and *Ganges*. The first is inferior only to the *Indus* and *Ganges*.

Megasthenese assures us he frequently visited *Sandracottus*, king of India.—*Arrian*.

Sandracottus was the author of the liberty of India after Alexander's retreat, but soon converted the name of liberty into servitude after his success, subjecting those whom he rescued from foreign dominion to his authority. This prince was of humble origin, but was called to royalty by the power of the gods; for, having offended Alexander by his impertinent language he was ordered to be put to death, and escaped only by flight. Fatigued with his journey he laid down to rest, when a lion of large size came and licked off the perspiration with his tongue retiring without doing him any harm. The prodigy inspired him with ambitious hopes and collecting bands of robbers he roused the Indians to renew the empire. In the wars which he waged with the captains of Alexander he was distinguished in the van, mounted on an elephant of great size and strenth. Having thus acquired power, *Sandracottus* reigned at the same time that *Seleucus* laid the foundation of his dominion, and *Seleucus* entered into a treaty with him, and settling affairs on the side of India directed his march against Antigonus.—*Justin*—15—4.

The kings of the *Gandarites* and *Prasians* were said to be waiting for them there (*on the Ganges*) with 80,000 horse, 200,000 foot, 8,000 chariots and 6,000 elephants. Nor is this number at all magnified, for *Sandrocottus*, who reigned not long after, made *Seleucus* a present of 500 elephants at one time, and with an army of 600,000 men traversed India and conquered the whole.

Sandracottus who was then very young, had a sight of Alexander and he is reported to have said, that Alexander was within a little of making him-self master of those countries; with such hatred and contempt was the reigning prince looked upon on account of his profligacy of manner and meanness of birth.—*Plutarch*.—Life of Alexander.

Important Abbreviations

A.G.-Apte's Guide to Sanskrit Composition.
A.-K.—Amarakośa.
AMARU.—Amaruśataka.
BG.—Bhagavadgītā.
BH.—Bhartṛihari's Śatakas.*
BHATTI.—Bhaṭṭikāvya (I-V)*
BHAV. P.—Bhavishya Purāṇa.
CF (cf.), COMP.—Compare.
COM.—Commentary; commentator.
DHU.—Dhuṇḍirāja (com. on the Mud.)
D.-K.—Daśakumāracharita.*
D.-R.—Daśarūpaka.
GIT.—Gītagovinda.
HITOP.—Hitopadeśa.
KAD.—Kādambarī.
KATHA's—Kathāsaritsāgara.
KA'V.—Kāvyādarśa of Dandin.
KIR.—Kirātārjunīya (I.III).
K. N.—Kāmandak's Nîtisāra Triv. edition.
K.-P.—Kāvya-Prakāśa.
KUM.—Kumārasaṃbhava.
MAH.-BH.—Mahā-Bhārata.
MALAV.—Mālavikāgnimitra.
MALLI.—Mallinātha.
MAL.-MADH—Mālatī-Mādhavā.
MEGH.—Meghadūta.
MRICH.—Mṛichchhakaṭika.
M.-S.—Manusmṛiti.
MUDRA.—Mudrārākshasa.
NAG.—Nāgānanda
N-CH.—Naishadhiyacharita.
PAN.—Pāṇini's Ashṭādhyāyī
PRA.-CH—Prabodhachandrodaya.
Pt.—Pañchatantra.
RAGH—Raghuvaṁśa.
RAM.—Rāmāyaṇa
RATN.—Ratnāvali.
Ṛ-V.—Ṛig-Veda.
ṚITUS.—Ṛitusaṃhāra.
ŚAK.—Śākuntala.
S.-D.—Sāhitya darpaṇa.
SID.-K.—Siddhānta-kaumudi
ŚIŚ.—Śiśupālavadha.
UP.—Upanishad.
UTTAR.—Uttararāmacharita.
VART.—Vārttika.
VENI.—Veṇīsaṁhāra.
VIK.-CH—Vikramānkadevacharita of Bīthaṇa.
VIK.—Vikramorvaśīya.
VISHP.—Vishṇu-Purāṇa.

★ Annotated by the Editor.

DRAMATIS PERSONAE.

Males

चन्द्रगुप्त—The new king of Pāṭaliputra, set on the throne by Chāṇakyā, also called Vṛśala and Maurya—the hero.

चाणक्य—A Brāhmaṇa politician, also called Vishṇugupta—the helper of Chaṇdragupta in gaining the throne of the Nandas and his prime minister until Rākshasa was over.

राक्षस—The Brāhmaṇa minister of the late king and hostile to Chandra., whom it was Chāṇakya's policy to win over to the side of the new king.

मलयकेतु—Son of Parvataka, king of Mountaineers, allying himself with whom Rāk. wanted to invade Pátaliputra.

भागुरायण—Malayaketu's secretary and friend, but really an agent of Chāṇakya.

निपुणक, जीवसिद्धि, सिद्धार्थक, समिद्धार्थक—Chāṇakya's agents and emissaries.

शाङ्र्गरव—A pupil of Chāṇakya.

चन्दनदास, शकटदास—Friends of Rākshasa. Chandandāsa's son.

विराधगुप्त, प्रियंवदक—Servants and agents of Rākshasa.

वैहीनरी—Chandragupta's chamberlain.

जाजालि—A chamberlain in attendance upon Malayaketu.

Females.

Wife of Chandandāsa.

शोणोत्तरा—An attendant on Chandragupta.

विजया—An attendant on Malayaketu.

Other Persons Mentioned.

नन्द—King of Pāṭaliputra, destroyed by Chāṇakya.

पर्वतक or पर्वतेश्वर—A mountain king, whose alliance with Chandragupta was secured by Chāṇakya by promising to him half of the kīndom of the Nandas.

सर्वार्थसिद्धि—A relation of Nanda placed on the throne by Rākshasa after the fall of the Nandas but who retired to a forest life.

वैरोचक—Brother of Parvataka to whom the promised half of the kingdom was to be given but who was slain by Rākshasa's emissaries by being mistaken for Chandragupta.

Scenes.

Pātliputra in Acts., I., III., VI. VII., the capital of Parvatakadeśa in Acts II and IV.; and the camp of Malayaketu in Act V.

THE SUBHĀSHITAS OCCURRING IN THE PLAY

I. Sentences

	Page.
अत्यादरः शङ्कनीयः ।	६०
अधिकारपदं हि नाम निर्दोषस्यापि पुरुषस्य महदाशङ्कास्थानम् ।	२७६
अनुचित उपचारो हृदयस्य परिभवादपि महद् दुःखमुत्पादयति ।	६०
अमन्त्रौषधिकुशलो व्यालग्राही प्रमत्तो मतङ्गजारोही लब्धाधिकारो जितकाशी राजसेवक इत्येते त्रयोऽप्यवश्यं विनाशमनुभवन्ति ।	८२
अयमपरो गण्डस्योपरि स्फोटः ।	२९४
अहो अलक्षितनिपाताः पुरुषाणां समविषमदशापरिणतयो भवन्ति ।	३१६
कायस्थ इति लघ्वी मात्रा ।	४२
कीदृशस्तृणानामग्निना सह विरोधः ।	६४
गतिः सोच्छ्रायाणां पतनमनुकूलं कलयति ।	२७६
दुराराध्या हि राजलक्ष्मीरात्मवद्भिरपि राजभिः ।	१४४
दैवमविद्वांसः प्रमाणयन्ति ।	१९२
दैवेनोपहतस्य बुद्धिरथ वा सर्वा विपर्यस्यति ।	३१४
न निष्प्रयोजनमधिकारवन्तः प्रभुभिराहूयन्ते ।	१६६
न युक्तं प्राकृतमपि रिपुमवज्ञातुम् ।	४२
न हि सर्वः सर्वं जानाति ।	३६
निरीहाणामीशस्तृणमिव तिरस्कारविषयः ।	१६०
पुरंध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ।	८८
प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः ।	२४२
प्रारब्धमपरित्याज्यमेव ।	११८
भगवति कमलालये भृशमगुणज्ञाऽसि ।	८६
मनस्वी दम्यत्वात्स्खलति च न दुःखं वहति च ।	१४२
मुण्डितमुण्डो नक्षत्राणि पृच्छसि ।	२४६
यत्स्वयमभियोगदुःखैरसाधारणैरपाकृतं तदेव राज्यं सुखयति ।	३२
राज्यं हि नाम राजधर्मानुवृत्तिपरस्य नृपतेर्महदप्रीतिस्थानम् ।	१४४
विद्वांसोऽप्यविकत्थना भवन्ति ।	१९२
शिरसि भयमतिदूरे तत्प्रतीकारः ।	६६
सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः ।	१५८

II. Ślokas

	Act	No.
अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः । सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥	४	१३
अप्राज्ञेन च कातरेण च गुणः स्याद्भक्तियुक्तेन कः प्रज्ञाविक्रमशालिनोऽपि हि भवेत्किं भक्तिहीनात्फलम् । प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु च ॥	१	१५
उपरि घनं घनरटितं दूरे दयिता किमेतदापतितम् । हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः ॥	(पृ.	६६)
किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत् किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः । किं त्वङ्गीकृतमुत्सृजन्कृपणवत् श्लाघ्यो जनो लज्जते निर्व्यूढं प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥	२	१८
चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः । न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते ॥	१	३
तीक्ष्णादुद्विजते मृदौ परिभवत्रासान्न संतिष्ठते मूर्खान्द्वेष्टि न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि । शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनहो श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम् ॥	३	५
परार्थानुष्ठाने रहयति नृपं स्वार्थपरता परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः । परार्थश्चेत्स्वार्थादभिमततरो हन्त परवान् परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः ॥	३	४
प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः । विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति ॥	२	१७
भूषणाद्युपभोगेन (ह्युपचारेण) प्रभुर्भवति न प्रभुः । परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते ॥	३	२३
मित्राणि शत्रुत्वमुपानयन्ती मित्रत्वमर्थस्य वशाच्च शत्रून् । नीतिर्नयत्यस्मृतपूर्ववृत्तं जन्मान्तरं जीवत एव पुंसः ॥	५	८
स दोषः सचिवस्यैव यदसत्कुरुते नृपः । याति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम् ॥	३	३२
स्वयमाहृत्य भुञ्जाना बलिनोऽपि स्वभावतः । गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥	१	१६

टीकाकृत

उपोद्धातः ।

सिन्दूरारुणगण्डमण्डलमदामोदभ्रमद्भृङ्गिका-
झङ्कारेण कलेन कर्णमुरजध्वानेन मन्द्रेण च ।
तत्तौर्यत्रिकरीतिमेति शिरसः शश्वन्मदान्दोलनं
यस्य श्रीगणनायकः स दिशतु श्रेयांसि भूयांसि वः ॥ १ ॥

षड्भिरङ्गैरुपेताय पुमर्थामरभूरुहे ।
शङ्कराय नमस्कुर्मो निगमाय नयाय च ॥

स्ववंशवर्णनम् ।

श्रीमद्भोसलवंशभूपतिकुलामात्येषु विख्यातिमा-
न्भारद्वाजकुलार्णवेन्दुरुदभूद्भावाजिरय्याहितः ।
पुत्रस्तस्य किलैकभूपतिमणेर्मन्त्री सदैवादृत-
स्तेनासीद्गुरुवत्प्रगल्भधिषणो गङ्गाधराख्योध्वरी ॥ २ ॥

तस्य द्वौ तनयावुदारचरितौ कृष्णाम्बिकागर्भजा-
वेकक्ष्मापतिलालितौ गुरुपदे चारोप्य संमानितौ ।
तत्पुत्रेण च शाहजीक्षितिभृता ज्येष्ठानुदर्य्यादृतौ
तत्तादृग्विविधाग्रहारकरणाद्विद्वत्प्रतिष्ठापकौ ॥ ३ ॥

ज्येष्ठस्तत्र सदावदातचरितः श्रीमान्नृसिंहाध्वरी
गायत्रीसमुपासनादिभिरपि श्रौतैश्च सत्कर्मभिः ।
आत्मानं परिपूय तं सुचरितैः पुत्रैः प्रतिष्ठाप्य च
त्रेधा ब्रह्महिताय सत्कृतिचितान्स ब्रह्मलोकानगात् ॥ ४ ॥

तस्यात्मत्रितयेग्रजस्तु धृतिमानानन्दरायाध्वरी
कौमारात्प्रभृति प्रगल्भधिषणः श्रीशाहराजादृतः ।
इष्टापूर्त्तसदन्नदानसहितत्रैविद्यवृद्धैः सह
श्रुत्युक्तार्थपरिष्क्रियापटुमतिः सत्कर्मनिष्णातधीः ॥ ५ ॥

श्रीसाम्बं त्रिपुरेश्वरीमपि कुलाराध्यं नृसिंहं यज-
न्निष्ठावैर्जपहोमपूजनमहैर्वासन्तिकैः शारदैः ।
सोयं भक्त्युपपादितैः स्मृतिगतैः श्रौतैश्च सत्कर्मभिः
श्लाघ्यः श्रीप्रभुरिष्टदैवतदयादृष्ट्या चिरं जीवतात् ॥ ६ ॥
युग्मम्

ज्येष्ठे तत्र नृसिंहयज्वनि दिवं यातेनुजस्तत्सुता-
न्पश्यन्पुत्रवदग्रजापचितिमप्यानन्दराये दधत् ।

वैतानानि च कारयन्सुचरितान्येतैः स्वपुत्रेण च
श्रीमानत्र महाग्निचिद्विजयते श्रीत्र्यम्बकाध्वरी ॥ ७ ॥
यो गङ्गामवगाहकः पथि महायासं दवीयस्यय-
न्वृद्धां मातरमिष्टदैवततया शुश्रूषमाणोनिशम् ।
धन्यः श्रेयसि गाङ्गपाथसि मुहुर्भक्त्या निमज्ज्य स्वयं
हन्त स्वानुदमज्जयत्पितृगणान्सर्वान्भवाम्भोनिधेः ॥ ८ ॥
वोढुं शाहमहीभृता निजधुरां संछन्द्यमानोपि त-
च्छ्रौतोपास्तिविरोधि नाचकमत प्रज्ञावतामग्रणीः ।
मन्त्रे धर्मनयेथ तेन गुरुवन्नित्यादृतस्तत्कृपा-
लब्धैर्भूरिधनैरयष्ट विबुधान्यज्ञैर्महादक्षिणैः ॥ ९ ॥
तन्त्रे कुत्रचन प्रवृत्तस्य बहुधा राजानुरोधादयं
तत्सिद्ध्यै वसुनो व्ययेन बहुना जातोधमर्णो भृशम् ।
राजा प्राज्यमृणं तदस्य स निराकर्तुं विलम्बं व्यधा-
न्निर्वेदादयमाधमर्ण्यविहतस्तीर्थाटनायाव्रजत् ॥ १० ॥
तत्रोच्चैरुपचार्य नीवृदधिपैरेनं स्वयं चादरा
त्प्रत्युद्गम्य समादधाद्गुणविदामग्रेसरः शाहराट् ।
स त्यागेशस्वरूपतामथ गतस्तत्पादपद्मार्चना-
यत्तस्वान्ततया ययातिनलमान्धात्रादिभिर्दुर्लभाम् ॥ ११ ॥
भ्राता तस्य महोन्नतिः शरभजीराजः प्रशास्ति क्षितिं
विश्वानन्दविधायिभिर्गुणगणैरावर्जयन्विष्टपम् ।
वृत्तीर्ब्रह्महिताय शाहजिमहाराजार्पिताः पालय-
न्नाधिक्येन सदादृतद्विजवराशीर्वर्धितप्राभवः ॥ १२ ॥
नित्यं वर्षति वासवो जनपदामोदाय वृष्टिं शुभां
कावेरीसलिलैश्च चोलधरणिः स्वच्छन्दमाप्यायते ।
यस्मिन्राज्यमिदं प्रशासति निराबाधं जगन्मोदते
स श्रीमाञ्छरभः क्षितीन्दुरवनीं शासच्चिरं जीवतु ॥ १३ ॥
एतं ज्येष्ठपुरस्क्रियोपचरितं मन्त्रिप्रवीरं दया-
नावा प्रार्णमहार्णवादुदधरद्दाक्षिण्यशाली नृपः ।
वृत्तिं चातनुतास्य सह्यगिरिजाकूले नुकूले श्रुति-
स्मृत्युक्ताखिलकर्मणां श्रितपरित्राणप्रवीणस्य सः ॥ १४ ॥
यः कौमारिलतन्त्रतः समतनोत्कर्मस्थितिं पावनीं
ब्रह्मोपादिशदाशु शोकधुतये यो नारदाय स्फुटम् ।
तं स्कन्दं परिचर्य साधु परया भक्त्या तदासुं मह-
त्कर्म ब्रह्मफलं सुधीः कलयते यः स्वामिशैले स्थितिम् ॥ १५ ॥
विष्णुर्मेरुविंशाखाभिधसुडुयुगलं मध्यरत्नं यदीयं
सैषा चन्द्रार्कनिष्का लघुमणिभिरिवालंकृता चोपहोमैः ।
स्पूताहोरात्रसत्रे विधिवदुपचिताधानतः सप्तविंशे
वर्षे नक्षत्रसत्रस्रगखिलमखभुक्प्रीतये येन पुण्या ॥ १६ ॥
सोयं स्वामिगिरौ गिरीशकृपया प्राप्य स्थितिं सुस्थिरां
विद्वद्वैदिकबान्धवैः सह सदा संभुक्तसंपद्भरः ।

श्रौतैः सचरितैरुपास्तिसुभगैराराधयन्नीश्वरं
श्लाघ्यः श्रोत्रियपुत्रपौत्रसहितो जीयात्सहस्रं समाः ॥ १७ ॥
परिष्कुर्वन्नेतत्पुरमभिजनश्रोत्रियबुधा-
श्रितागारैरुद्दाममसिरुपवनाभोगसुभगैः ।
सुमेधोभिर्वेदत्रयत्रिविधशास्त्राभ्यसनतः
समुद्घुष्टं छात्रैरशनवसनाभ्यङ्गसुहितैः ॥ १८ ॥
कुमारेशं भक्त्या चिरमुपचरन्भूषणगणै-
रुदारैस्तैस्तैरप्युपचिततरैरुत्सवभरैः ।
प्रसादात्स्योच्चैः श्रियमनुभवन्भव्यविभव-
श्चिरं जीवन्नव्याद्भुवनमखिलं त्र्यम्बकसखः ॥ १९ ॥
तदीयायाः पात्रं निरुपधिदयायाः श्रितगणै-
र्गणेयस्तेनैवार्पितवसुकृतैः कैश्च सुकृतैः ।
समाराध्य श्रीशं विधुतपितृदेवाघृणतया
कृतार्थस्तस्याज्ञादरवशतया जातकुतुकः ॥ २० ॥
बुधो ढुण्ढिर्नाम्ना जगति विदितो लक्ष्मणसुधी-
मणेः श्रीमद्व्यासान्वयजलधिचन्द्रस्य तनयः ।
दधन्मुद्राङ्कं राक्षसमिति नवं नाम शुभसं-
विधानं व्याचष्टेऽद्भुतरसमयं नाटकवरम् ॥ २१ ॥

कथोपोद्घातः ।

श्रीमद्विशाखदत्तीये मुद्राराक्षसनाटके ।
कथोपोद्घातमाचक्षे संविधानावबुद्धये ॥ २२ ॥
नन्दान्तं क्षत्रियकुलमिति पौराणशासनात् ।
कल्यादौ नन्दनामानः केचिदासन्महीभुजः ॥ २३ ॥
सर्वार्थसिद्धिनामासीत्तेषु विख्यातपौरुषः ।
स चिरादाशिषत्पृथ्वीं नवकोटिशतेश्वरः ॥ २४ ॥
वक्रनासादयस्तस्य कुलामात्या द्विजातयः ।
बभूवुस्तेषु विख्यातो राक्षसो नाम भूसुरः ॥ २५ ॥
दण्डनीतिप्रवीणः स षाड्गुण्यप्रविभागवित् ।
शुचिः शूरतमो नन्दैर्मान्यो राज्यधुरामधात् ॥ २६ ॥
राज्ञः पत्नी सुनन्दासीज्ज्येष्ठान्या वृषलात्मजा ।
मुराख्या सा प्रिया भर्तुः शीललावण्यसंपदा ॥ २७ ॥
स कदाचित्तपोनिष्ठमतिथिं गृहमागतम् ।
अर्घ्यपाद्यादिभिर्भक्त्या सभार्यः समपूपुजत् ॥ २८ ॥
तस्य पादोदकं पत्न्योरुपर्युक्षन्नभूत्र सः ।
ज्येष्ठाया न्यपतन्मूर्ध्नि नवपादोदबिन्दवः ॥ २९ ॥
एको मुरायास्तं भक्त्या मूर्ध्ना प्रह्वेण साग्रहीत् ।
तदादरं वीक्ष्य तस्यां प्रससादाधिकं द्विजः ॥ ३० ॥
मुरा प्रासूत तनयं मौर्याख्यं गुणवत्तरम् ।
सुनन्दा बहुगर्भाढ्यां मांसपेशीमसूत सा ॥ ३१ ॥

नवास्यां गर्भशकलान्यासंस्तानि तु राक्षसः ।
तैलद्रोणीषु निक्षिप्य यत्नेन समपूपुषत् ॥ ३२ ॥
बभूवुर्नव ते वीरा राक्षसेनाभिवर्धिताः ।
नन्दा इत्येव ते पित्रा व्यपदिष्टा महौजसः ॥ ३३ ॥
तेषु राज्यं समासज्य तत्सेनान्यं महामतिम् ।
विधाय मौर्यं राजासौ वृद्धः शमरतोऽभवत् ॥ ३४ ॥
चन्द्रगुप्तोत्तमास्तस्य मौर्यस्यासञ्शतं सुताः ।
अत्यशेतेव तान्नन्दान्मौर्यः पुत्रैर्महाबलैः ॥ ३५ ॥
ततो नन्दा दुरात्मानः सपुत्रं तमसूयया ।
प्रवेश्यान्तर्भूमिगृहं मन्त्रव्याजादजीघतन् ॥ ३६ ॥
मधूच्छिष्टमयं जातु जीवन्तमिव पञ्जरे ।
सिंहमाधाय नन्देभ्यः प्राहिणोत्सिंहलाधिपः ॥ ३७ ॥
यो द्रावयेदिमं क्रूरं द्रागनुद्घाट्य पञ्जरम् ।
स वोऽस्ति कश्चित्सुमतिरित्येवं सन्दिदेश च ॥ ३८ ॥
वाक्छलं तदजानद्भिर्मन्दैर्नन्दैर्विलोभितः ।
कथंचिदवशिष्टासुः समुत्तार्य समाहितः ॥ ३९ ॥
चन्द्रगुप्तस्तु मेधावी प्रतप्तायःशलाकया ।
व्यलापयत्पञ्जरस्थं व्यस्मयन्त ततोऽखिलाः ॥ ४० ॥
जिघांसितोऽपि भूच्छिद्रान्नन्दैरेतेन हेतुना ।
निष्कासितो जिजीवासौ भाविन्या दैवसम्पदा ॥ ४१ ॥
आजानुबाहुरित्यादिराजलक्षणलक्षितः ।
औदार्यशौर्यगाम्भीर्यनिधिर्विनयवारिधिः ॥ ४२ ॥
ईदृशोऽपि स तैर्दुष्टैरेर्ष्यालुभिरसह्यत ।
पुनश्छद्मवधे तस्य प्रायतन्त दुराशयाः ॥ ४३ ॥
अन्नसत्राधिकारे तैर्नियुक्तः कालपर्ययम् ।
प्रतीक्षमाणस्तत्रास्थास्स नन्दापचिकीर्षया ॥ ४४ ॥
स कदाचित् द्विजं कंचिदद्राक्षीदतिकोपनम् ।
पादलग्नकुशोन्मूलदाहे कृतमहोद्यमम् ॥ ४५ ॥
मत्वातिक्रोधनं मौर्यस्तं नन्दोन्मूलनक्षमम् ।
उपेत्य शरणं स्वेष्टसिद्धये समुपाचरत् ॥ ४६ ॥
विष्णुगुप्ताभिधानः स बाल एव द्विजोत्तमः ।
औशनस्यां दण्डनीत्यां ज्योतिःशास्त्रे च पारगः ॥ ४७ ॥
नीतिशास्त्रप्रणेता यश्चणकस्तस्य नन्दनः ।
चाणक्य इति विख्यातः श्रोत्रियः सर्वधर्मवित् ॥ ४८ ॥
गुणाढ्ये चन्द्रगुप्तस्य पक्षपातो महानभूत् ।
स च नन्दकृतं तस्मै व्यसनं स्वं न्यवेदयत् ॥ ४९ ॥
नन्दराज्यं तदा तस्मै प्रतिश्रुत्य बुभुक्षितः ।
भुक्तिशालां स नन्दानां प्रविश्याग्रासने स्थितः ॥ ५० ॥
नन्दाः क्रुद्धा महात्मानं कालोपहतचेतसः ।
बटुरित्यवमत्यैनमासनादुदतिष्ठिपन् ॥ ५१ ॥

धिग्धिग्मा मैवमित्येवं वादिष्वखिलमन्त्रिषु ।
अग्रासनात्ते चाणक्यं क्रोधाकुलमचीकृषन् ॥ ५२ ॥
मध्येशालं स रोषान्धः शिखामुन्मुच्य पाणिना ।
प्रतिज्ञामकरोत्तीव्रां नन्दवंशदिधक्षया ॥ ५३ ॥
दर्पान्धान्दुर्मतीनेतानेवं मामवजानतः ।
नन्दाधमाननुत्खाय न बध्नामि शिखामिमाम् ॥ ५४ ॥
इत्युक्त्वा निर्ययौ तूर्णं पुरात्क्षुभितमानसः ।
गतश्रियश्च ते क्रुद्धं न समादधतोद्धताः ॥ ५५ ॥
चन्द्रगुप्तोपि स तदा स्वनिग्रहभयाकुलः ।
निर्यायोपांशु नगराच्चाणक्यं समुपाश्रयत् ॥ ५६ ॥

नाटकीयवस्तुनिर्देशः ।

मौर्येन्दुमुपसंगृह्य कौटिल्यः कुटिलं नयम् ।
अनुसन्दधदातिष्ठद्यत्नं नन्दकुलोद्धृतौ ॥ ५७ ॥
स्वमित्रमिन्दुशर्माणं कृत्वा क्षपणकाकृतिम् ।
तेनाभिचारिकविदा राक्षसादीनवञ्चयत् ॥ ५८ ॥
नन्दराज्यार्द्धपणनात्समुत्थाप्य महाबलम् ।
पर्वतेन्द्रं म्लेच्छबलैर्न्यरुणत्कुसुमं पुरम् ॥ ५९ ॥
नन्दाः सर्वे सुसंरब्धा निरुद्धाः प्रबलारिभिः ।
दृप्ता राक्षसवीर्येण युद्धायैव मनो दधुः ॥ ६० ॥
घटमानोपि बहुधा दुर्जयं वीक्ष्य तद्बलम् ।
राक्षसश्छद्मना हन्तुं मौर्यं तेनाथ सन्दधे ॥ ६१ ॥
सर्वे नन्दाः पर्वतेन्द्रबलानिलसमेधिते ।
चाणक्यक्रोधदहने घोरे शलभतामयुः ॥ ६२ ॥
ततः स राक्षसः क्लिष्टः प्रक्षीणबलपौरुषः ।
निरुद्धाविविधासारप्रसारं क्षीणसञ्चयम् ॥ ६३ ॥
असुरक्ष्यं पुरं पश्यन्नसुरक्षणतत्परः ।
नन्दवृद्धस्य सर्वार्थसिद्धेरेनं सुरङ्गया ॥ ६४ ॥
पुरान्निःसार्य निभृतं पौरैर्नन्दानुरागिभिः ।
पुरं मौर्यवशीकृत्य तत्सख्यमिव नाटयन् ॥ ६५ ॥
अभिचारकृतां मौर्यायादिशद्विषकन्यकाम् ।
तच्छद्मवित्पर्वतेशं कौटिल्योघातयत्तया ॥ ६६ ॥
स्वच्छद्म बोधयित्वा तत्सुतं मलयकेतुकम् ।
उपांशु भीषयित्वाप्तैः पलाययत कूटधीः ॥ ६७ ॥
अराजकं वशीकृत्य कौटिल्यः कुसुमं पुरम् ।
नन्दानुरक्तपौराढ्यं सहसा न विवेश तत् ॥ ६८ ॥
पुरं प्रविष्टमप्याशु जिघांसू राक्षसो रिपुम् ।
सुहृद्भिर्दारुवर्माद्यैः कूटयन्त्राद्ययूयुजत् ॥ ६९ ॥
कौटिल्यः कुटिलप्रज्ञस्तत्सर्वमरिकल्पितम् ।
विषकन्याकूटयन्त्रगरदादि न्यबुध्यत ॥ ७० ॥

क्रूरेण राक्षसेनैव ह्यस्मत्पक्षजिघांसया ।
विषकन्या पर्वतेशे योजितेति समादधत् ॥ ७१ ॥

वैरोचकं पर्वतेशभ्रातरं चकिताशयम् ।
अस्थापयज्जिगमिषुं शपथैश्छलगर्भितैः ॥ ७२ ॥

स्वापवादं निह्नुवानः पर्वतेशवधोत्थितम् ।
प्राग्दिस्सितार्धराज्येन शठः प्रालोभयच्च तम् ॥ ७३ ॥

सर्वार्थसिद्धिरगमत्तपस्तप्तुं क्वचिद्वने ।
तत्रापि चारदृक्क्रूरः कौटिल्यस्तमजीघनत् ॥ ७४ ॥

सर्वार्थसिद्धिं निहतं श्रुत्वा शोचन्स राक्षसः ।
गत्वा मलयकेतुं तं प्रोत्साहयितुमूचिवान् ॥ ७५ ॥

अरूढमूलं मौर्यं द्रागुन्मूल्य सहसा बलात् ।
आनृण्यं गन्तुमिच्छामि स्वामिनां नाकवासिनाम् ॥ ७६ ॥

सर्वेऽस्मास्वनुरज्यन्ते पौरा गूढाभिसन्धयः ।
तस्योपांशु वधायाप्ताः पुरे जाग्रति मामकाः ॥ ७७ ॥

सर्वोपायैर्विक्रमैश्च घटेमहि हिताय ते ।
जहि मौर्यं सकौटिल्यं नन्दराज्यं तवास्तु तत् ॥ ७८ ॥

विषकन्यां योजयित्वा चाणक्येनैव पापिना ।
पिता ते मौर्यराज्यार्द्धहारी विनिहतश्छलात् ॥ ७९ ॥

सर्वथैव निहत्यैनमुपायेन बलेन वा ।
त्वय्यासज्याखिलं राज्यमानृण्यं स्वामिनामये ॥ ८० ॥

इति प्रोत्साह्य बहुधा धीमान्साहसिकाग्रणीः ।
मौर्यं जेतुं म्लेच्छबलैः समनह्यत राक्षसः ॥ ८१ ॥

उपोद्घातोऽत्र वृत्तायाः कथाया एवमीरितः ।
अतः परं कविर्वस्तु नाटकीयं प्रयोक्ष्यते ॥ ८२ ॥

क्रूरग्रहः स इत्यन्मिस्पद्ये प्रस्तावनामुखे ।
उक्तमर्थं श्लेषदिशा कविरन्ववदन्मनाक् ॥ ८३ ॥

इत्युपोद्घातप्रकरणम् ।

अथ

मुद्राराक्षसम् ।

प्रथमोऽङ्कः ।

धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः ।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥ १ ॥

अथेदं नाटकं साङ्गं लक्षणपुरःसरं व्याख्यायते । तत्र तावन्नान्दीपद्यद्वयं धन्या केयमित्यादि । अत्र श्रीमान्विशाखदत्तनामा महाकविः प्रारिप्सितस्य नाटकस्य निर्विघ्नपरिसमाप्तिप्रचयसिद्ध्यर्थं स्वेष्टदेवतागुणसंकीर्तनपूर्वकाशीर्वचनरूपं मङ्गलं शिष्यशिक्षायै नान्द्या निबध्नन्नर्थतः शब्दतश्च नाटकीयं वस्तु ध्वनयति । नान्दीलक्षणमग्रे वक्ष्यते । तत्राद्ये नान्दीपद्ये धन्या केयं स्थिता ते शिरसि इति जटाजूटकुहरनिलीनां दिव्ययुवतिरूपधारिणीं गङ्गामवलोक्य सेर्ष्यायाः शिवायाः शिवं प्रति प्रश्नः । परमप्रेयस्यहं वामाङ्गेवतिष्ठामि मत्तोप्युपरि उत्तमाङ्गे श्लाघ्ये स्थाने केयं स्थितेति ईर्ष्यास्फोटको धन्याशब्दः । किं च धन्या योषित्प्रलोभिकेति वचनादेवं प्रलोभनशीलायाः कथं वश्योसीति उपालम्भोपि ध्वन्यते । यद्वा । व्यतिरेकलक्षणया धन्याशब्दोऽधन्यावचनः । पूज्यस्य भर्तुर्या शिरः समारूढवती साधन्या अश्लाघ्या तस्याः कथं वश्योसीति ध्वन्यते । स्त्रियं तां निह्नोतुकामः शिवः शिरस्थमेव शशिनं कलाशब्दशिरस्कतया स्त्रीलिङ्गेन निर्दिश्य छलेनोत्तरयति । शशिकलेति । पुनरपि मया पृष्टाया एव युवत्याः शशिकलेति नाम स्यादिति मन्वानाया देव्या ऋजूक्तिः किं नु नामैतदस्या इति । पुनश्च शशिकलामेवोद्दिश्य अस्या इत्युभयसाधारण्येन शिवस्य छलोत्तरं नामैवास्यास्तदेतत्परिचितमित्यादिना । कस्य हेतोरिति केन हेतुनेत्यर्थः । निमित्तपर्यायप्रयोगे सर्वासां प्रायोदर्शनमिति षष्ठी । ते इति शेषे षष्ठी । अथ परिचितशशिकलानामकथनव्याजेन

अपि च।

पादस्याविर्भवन्तीमवनतिमवने रक्षतः स्वैरपातैः
सङ्कोचेनैव दोष्णां मुहुरभिनयतः सर्वलोकातिगानाम्।
दृष्टिं लक्ष्येषु नोग्रंज्वलनकणमुचं बध्नतो दाहभीते-
रित्याधारानुरोधात्त्रिपुरविजयिनः पातु वो दुःखनृत्तम्॥ २॥

मया बुभुत्सितां युवतिं निह्नुत इति शिवस्य कैतवं ज्ञात्वा जटाजूटनिलीना-परिचितनारीविषयकः प्रश्नः क्रियते न परिचितेन्दुविषय इति देव्याह नारीं पृच्छामि नेन्दुमिति। तत्र नारीमिति एकस्मिन्नेव पदे पृच्छतेरप्रधानकर्मत्वं देव्यभिमतत्वेनापाद्य वाक्छलेन पुनरपि शिव उत्तरयति। यदि नारीं प्रति प्रश्नः क्रियते न तु मां प्रति इन्दुप्रधानकर्मकः तर्हि सजातीयत्वाद्विश्रम्भपात्रं ते सखी पृष्टा सती कथयतु विजया न प्रमाणं यदीन्दुरिति। सुयोज्यमानोपीन्दुरूपोर्थः न प्रमाणं यदि तथ्यत्वेन न संमतश्चेदित्यर्थः। यद्वा। उभयोः कर्मकारकयोः सन्निहितयोः सतोरेकस्य त्यागायोगात् नारीमिन्दुमित्युभयमपि अप्रधानकर्मत्वे-नापाद्य शिव एवमाह। यदि नारीं प्रति प्रश्नः क्रियते नेन्दुं प्रति तर्हि कथयतु विजया। न प्रमाणं यदीन्दुर्विजातीयत्वादिन्दुः प्रष्टव्यत्वेन न संमतश्चेदित्यर्थः। देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः इत्येवं प्रकारेण देव्याः सकाशाद्बुद्धिकृतापादानत्वविवक्षया पञ्चमी। सुरसरितं गङ्गां निह्नोतुमपलपितु-मिच्छोर्वाक्छलेन देवीं वञ्चयत इति यावत्। विभोः परमेश्वरस्य शाठ्यं छलोक्ति-रव्यात्पायादिति पद्यस्य वाच्योर्थः। अत्र वक्रोक्तिरलङ्कारः। यदुक्तमन्यथा-वाक्यमन्यथात्वेन योज्यते। श्लेषेण काक्वा विज्ञेया सा वक्रोक्तिस्तथा द्विधेति लक्षणात्॥ तेन च वक्ष्यमाणं नाटकीयं वस्तु व्यज्यते अतोलङ्कारेण वस्तुध्वनिः॥ १॥

द्वितीयं नान्दीपद्यं पादस्येति। पादस्य स्वैरपातैः स्वच्छन्दस्फालनैराविर्भ-वन्तीमाविर्भविष्यन्तीं। वर्त्तमानसामीप्ये वर्त्तमानवद्वेति लट्। अवनेः पृथिव्याः अवनतिं न्यग्भावं भङ्गमिति यावत्। रक्षतः परिहरतः अवनिभङ्गभीत्या शनैः पादौ निक्षिपत इत्यर्थः। चोरं रक्षतीत्यत्र चोरस्य स्वच्छन्दचारनिषेधवद-त्रावनेरवनत्याविर्भावनिषेधो रक्षतेरर्थः। सङ्कोचेनेति। सर्पान् लोकानूर्ध्वं तिर-श्चातिक्रम्य गन्तुं समर्थानाम्। अतिविस्तारभाजां दोष्णां भुजानां सङ्कोचे-नैव भुजाघातेन लोकाः संहता मा भूवन्निति भुजानां क्रोडीकरणेनैव मुहुर-

---

१ नोग्रां. २ नः इति पाठः.

भिनयतः अङ्गविक्षेपं कुर्वतः । 'अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ' इत्यमरः । दृष्टिमिति । उग्रज्वलनकणमुचं तीव्रविस्फुलिङ्गकिरं दृष्टिं भाललोचनं लक्ष्येषु दृगभिनयदर्शनीयेषु वस्तुषु दाहभीतेर्दग्धानि मा भूवन्निति न बध्नतः न निक्षिपतः । इतीति । इत्याधारानुरोधादित्येवमुक्तस्याधारस्य नृत्तक्रियाश्रयस्य पृथिव्यादेरनुरोधाद्यथाक्रमं भङ्गसंहरणदाहा मा भूवन्निति अनुक्रोशात् त्रिपुरविजयिनः शिवस्य दुःखनृत्तं दुःखेन कृच्छ्रेण यथाकथंचित्सायन्तनावश्यकविधितयाङ्गवैकल्येनाप्यनुष्ठीयमानं नृत्तं वः पातु इति पद्यस्य वाच्योर्थः । नन्वत्र तृतीयलोचनाभिनयासंभवान्नृत्तवैकल्यप्रसञ्जनमयुक्तं तत्पिधायापि द्वाभ्यामेव लोचनाभ्यां लक्ष्याभिनयस्य सुकरत्वादिति चेन्मैवम् । द्विलोचनस्यैकस्मिंल्लोचने विकलेन्येनाभिनयवैकल्यवत्त्रिलोचनस्यापि तथात्वोपपत्तेः । तस्मादुक्तं दृगभिनयवैकल्यप्रयुक्तदुःखनृत्तत्वप्रसञ्जनं समञ्जसमिति सन्तोष्टव्यम् । अत्र त्रिपुरविजयिन इति पदेन मया त्रिपुरविजयिना विशिखवह्निना त्रिपुरं दग्धं एवं क्रोधाग्निना नन्दवंशवत्सराक्षसं मलयकेतुं दग्धुं समर्थस्यापि चाणक्यस्य राक्षससञ्जिघृक्षानुरोधात्कृच्छ्रेण कुटिलनीतिप्रयोगाभिनिवेश इति ध्वनितम् । अत्र अवन्यादीनामवनत्याद्ययोगेपि योगकल्पनात्संवन्धातिशयोक्तिरलङ्कारः । संबन्धातिशयोक्तिः स्यादयोगे योगकल्पनमिति तल्लक्षणात् । त्रिपुरविजयिन इति साभिप्रायविशेषणात्परिकरालङ्कारश्च । ताभ्यां कौटिल्यनीतिरूपवस्तुध्वनिः । अनयैव रीत्या गणपतिस्तुतिपरमस्मदीयं पद्यम् ।

> शेषाहेः फणभङ्गभीरुरवनौ मन्दं निधत्ते पदं
> चीत्कारं जगदण्डसंपुटभिदाभीत्या विधत्ते मनाक् ।
> नोड्डीयेत जगज्जवादिति शनैः कर्णाञ्चलं दोलय-
> त्येवं योखिललोकरक्षणचणः पायाद्गणेशः स वः ॥

अत्र पूर्वनान्दीपद्ये

> नान्दीपद्येभिधातव्यं चन्द्रनामेति शासनात् ।
> इन्दुरित्यमृतं बीजमायुःप्रदमुदीरितम् ॥
> सनामा सूचितस्तेन चन्द्रगुप्तोपि नायकः ।
> लक्ष्मीकृन्मगणश्चोक्तस्तल्लक्ष्मीस्थैर्यसूचनम् ॥
> नान्दीपद्येषु कुर्वीत मनाक्काव्यार्थसूचनम् ।
> इति शास्त्रात्कविः किंचिद्वस्त्वेवं समसूसुचत् ॥
> शृङ्गारो वाथवा वीरो मुख्यः स्यान्नाटके रसः ।
> करुणाद्भुतहास्याद्यास्तयोरङ्गतया मताः ॥

वीरो रसः प्रधानं स्यान्मुद्राराक्षसनाटके ।
अत्यद्भुतकरी शाठ्यनीतिरत्राङ्गमिष्यते ॥
नीतिर्द्विधेरिता धर्मशाठ्यप्राधान्यभेदतः ।
धर्मशाठ्ये सन्दधतो द्विविधा सा यथायथम् ॥
आद्या युधिष्ठिरादिभ्यो विदुरादिभिरीरिता ।
अन्योक्ता धृतराष्ट्राय दुर्दान्तैः कणिकादिभिः ॥
अत्यद्भुतविधादत्र संविधानान्महाकविः ।
प्रपञ्चयति चाणक्यमुखेन कुटिलं नयम् ॥
दण्डनीतिर्विनयनाल्लोकस्थितिविधायिनी ।
ऐशी तनुर्द्विधा सा स्याच्छिवा घोरा विभेदतः ॥
शिवा धर्मानुविद्धा स्याद्घोरा कौटिल्यगर्भिता ।
साध्वाचारः साधुनेति न्यायायोज्या द्वयोर्द्वयोः ॥
उमा सत्त्वप्रधानत्वादृजुनीतितयेष्यते ।
गङ्गा कुटिलगामित्वात्कुटिला नीतिरिष्यते ॥
तां धर्मनीतेर्निह्नुत्य प्रपञ्चयितुमुत्सुकः ।
चाणक्योद्धतधीरत्र विभुशब्देन सूचितः ॥
आधारवशतो दुःखनृत्तमित्युत्तरेण च ।
पद्येन ध्वनितं कृच्छ्राच्छाठ्यनीतिप्रकल्पनम् ॥
आधारो राक्षसो मौर्यराज्यनिर्वाहकत्वतः ।
तत्सङ्जिघृक्षयाधत्त कौटिल्यः कुटिलं नयम् ॥
कलौ पापिनि कौटिल्यनीतिः सद्यः फलप्रदा ।
इत्यभिप्रेत्य कौटिल्यस्तामेवात्र प्रयुक्तवान् ॥
इत्याराधानुरोधादित्युक्त्या राक्षसरक्षणम् ।
यत्नाद्विधेयं ध्वनितं क्रुद्धान्मलयकेतुतः ॥
भागुरायणवाक्येन तदेतत्स्फुटयिष्यते ।
रक्षणीया राक्षसस्य प्राणा इत्यादिना पुरः ॥
सचिवायत्तसिद्धित्वात्पौरुषं स्वमदर्शयन् ।
गभीरात्मा चन्द्रगुप्तो धीरोदात्तोऽत्र नायकः ॥
तद्राज्याङ्गधुरं वोढुं धृतिमान्राक्षसोऽर्हति ।
तत्संग्रहोत एवात्र साध्यो नीतिस्तु साधनम् ॥

एवमत्रार्थेत इन्दुः शाठ्यमिति शब्दतश्च मनाक्काव्यार्थो ध्वनितः

उदीरितस्त्र्यम्बकार्यैर्नान्दीपद्यध्वनिः शुभः ।
स एष ढुण्ढिनाकारि कारिकाडिण्डिमैः स्फुटः ॥

अथ नाटकादिलक्षणानि निरूप्यन्ते ।

रूप्यतेभिनयैर्यत्र वस्तु तद्रूपकं विदुः ।
नाटकाद्यैर्दशविधं तदित्यन्यत्र विस्तरः ॥

तदुक्तं दशरूपके ।

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहा मृगा इति ॥

एतेषां लक्षाणानि विस्तरभयान्नेहोच्यन्ते । अथैशां सामग्री निरूप्यते । तत्र पञ्च सन्धयः ।

मुखं प्रतिमुखं गर्भः सविमर्शो निवर्हणम् ॥ इति ॥

सन्धिर्नाम एकेन प्रयोजनेनान्वितानां कथांशानामवन्तरप्रयोजनसंबन्धः । तत्रारम्भबीजसंबन्धो मुखसन्धिः ॥ यत्नबिन्दुसंबन्धः प्रतिमुखसन्धिः । प्राप्त्याशापताकयोः संवन्धो गर्भसन्धिः । नियताप्तिप्रकर्षसंबन्धो विमर्शसन्धिः । फलागमकार्ययोः संबन्धो निर्वहणसन्धिः ।

बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः ।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥
अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः ।
यथासंख्येन जायन्ते मुखाद्याः पञ्च सन्धयः ॥ इति ॥

अर्थप्रकृतयः कार्यसिद्धिहेतवः बीजादयः पञ्चारम्भादिपञ्चावस्थासमन्विताः सन्तः यथासंख्यं मुखाद्याः पञ्चसन्धयो जायन्त इत्यर्थः । आरम्भादीनां लक्षणं निरूपितं दशरूपके ।

औत्सुक्यमात्रमारम्भः फललाभाय भूयसे ।
प्रयत्नस्तु तदप्राप्तौ व्यापारोतित्वरान्वितः ॥
उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसंभवः ।
अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता ॥
समग्रफलसंपत्तिः फलयोग उदाहृतः ।

अथ बीजादिपञ्चकं निरूप्यते ।

स्तोकोद्दिष्टः कार्यहेतुर्बीजं विस्तार्यनेकधा ।
अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥
प्रतिपाद्यकथाङ्गं स्यात्पताका व्यापिनी कथा ।
अव्यापिनी प्रकरिका कार्यं निर्वाहकृत्फले ॥

इति लक्षणसंग्रहः ।

अथ नान्दीस्वरूपं निरूप्यते ।

अर्थतः शब्दतो वापि मनाक्काव्यार्थसूचनम् ।
यत्राष्टभिर्द्वादशभिरष्टादशभिरेव वा ॥
द्वाविंशत्या पदैर्वापि सा नान्दी परिकीर्तिता ॥

नाटकादिरूपकाणामादौ विहितं पद्यं नान्दीत्युच्यते । कैश्चिन्नान्द्यां पदनियमो नाभ्युपगम्यते अतोत्र नाटके पदनियमो नादृतः । यद्वा पदशब्दः पादवचनः । तथा च पद्यद्वयेनाष्टपदा नान्दी कृतेति ज्ञेयम् । अत्र नाटके वीरो रसः । अतिगहनकौटिल्यनीतिरूपोद्भुतरसः प्रधानमङ्गं । अन्ये शृङ्गारकरुणादयो यथायथं द्रष्टव्याः । धीरोदात्तो नायकः । प्रख्यातमितिवृत्तम् । इतिहासनिबन्धनं प्रख्यातमिति लक्षणात् । चाणक्यकृतस्य नन्दवंशोद्धरणस्य चन्द्रगुप्ताभिषेकस्य च विष्णुपुराणबृहत्कथाकामन्दकादिषु संक्षेपेणोक्तत्वात् ।

विष्णुपुराणे ।

नव चैतान्नन्दान्कौटिल्यो ब्राह्मणः समुद्धरिष्यति । कौटिल्य एव चन्द्रगुप्तं राज्येभिषेक्ष्यति । अतःपरं शूद्राः पृथिवीं भोक्ष्यन्तीति ।

बृहत्कथायाम् ।

चाणक्यनाम्ना तेनाथ शकटारगृहे रहः ।
कृत्यां विधाय सप्ताहात्सपुत्रो निहतो नृपः ॥
शकटार क्षपणकलिङ्गधारी चाणक्यमित्रमिन्दुशर्मा ।
योगानन्दे यशःशेषे पूर्वनन्दसुतस्ततः ।
चन्द्रगुप्तः कृतो राज्ये चाणक्येन महौजसा ॥

कामन्दके ।

वंशे विशालवंशानामृषीणामिव भूयसाम् ।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥
जातवेदा इवार्चिष्मान्वेदान्वेदविदांवरः ।
योधीतवान्सुचतुरश्चतुरोप्येकवेदवत् ॥
यस्याभिचारवज्रेण वज्रज्वलनतेजसः ।
पपात मुलतः श्रीमान्सुपर्वा नन्दपर्वतः ॥
एकाकी मन्त्रशक्त्या यः शक्तः शक्तिधरोपमः ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥
नीतिशास्त्रामृतं धीमानर्थशास्त्रमहोदधेः ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥ इति ॥

(नान्द्यन्ते ।)

सूत्रधारः—अलमतिप्रसङ्गेन[1] । आज्ञापितोस्मि परिषदा यथाद्य त्वया सामन्तवटेश्वरदत्तपौत्रस्य[2] महाराजपदभाक्पृथुसूनोः कवेर्विशाखदत्तस्य[3] कृतिरभिनवं[4] मुद्राराक्षसं नाम नाटकं नाटयितव्यमिति । यत्सत्यं काव्यविशेषवेदिन्यां परिषदि प्रयुञ्जानस्य ममापि चेतसि सुमहान्परितोषः प्रादुर्भवति । कुतः ।

चीयते बालिशस्यापि सत्क्षेत्रपतिता[5] कृषिः ।
न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते ॥ ३ ॥

तद्यावदिदानीं गृहं गत्वा गृहिणीमाहूय गृहजनेन सह सङ्गीतकमनुतिष्ठामि । (परिक्रम्यावलोक्य च ।) इमे नो गृहाः । तद्यावत्प्रविशामि । (नाट्येन प्रविश्यावलोक्य च ।) अये तत्किमिदम-

---

नान्द्यनन्तरप्रविष्टेन सूत्रधारेण रङ्गप्रसादनपुरःसरं मृदुमधुरपदैः पद्यैः भारतीवृत्त्याश्रयणेन काव्यार्थः सूचनीयस्तदुक्तम् ।

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।
ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥ इति ॥

तदेतदाह नान्द्यन्त इति । परिषदा सन्दिष्टार्थस्य क्षिप्रं कर्तव्यत्वाद्वाचामतिप्रसङ्गो वारणीय इत्यर्थः । 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः । यत्सत्यमिति सङ्घातो ध्रुवमित्यर्थे । अत्र भारतीवृत्तेरङ्गं परिषदभिमुखीकरणफला कविकाव्यनटादीनां प्रशंसारूपा प्ररोचना कृता । तथा हि । सामन्तवटेश्वरेति महाकुलप्रसूतत्वकथनेन कविप्रशंसा काव्यविशेषवेदिन्यामिति काव्यपारिषदोः प्रशंसा ।

बालिशस्येति । स्वस्य बालिशकृषीवलदृष्टान्ताद्विनयप्रदर्शनेनात्मश्लाघापराङ्मुखत्वरूपमहागुणकथनान्नटस्तुतिः । बालिशस्य बीजावापानभिज्ञस्यापि सुक्षेत्रपतिता कृषिः कर्षणं कृषिर्लक्षणया तत्संबन्धि बीजमित्यर्थः । चीयते उपचिता अभिवृद्धा भवति । शालेः एकस्य शाल्यङ्कुरस्य स्तम्बकरिता सुक्षेत्रगुणकृतनिबिडीभवनशीलता वप्तुः बीजावापकर्तुः गुणं दक्षत्वादिकं नापेक्षते किंतु स्वयमेव भूसारगुणेनोपचिता भवतीत्यर्थः अत्र सुक्षेत्रदृष्टान्तोपि परिषत्प्रशंसैव । स्तम्बं स्तोमं करोतीति स्तम्बकरिः । स्तम्बशकृतोरिन्व्रीहिवत्सयोरिति वक्तव्यमित्यनुशासनात्स्त-

---

१ अतिविस्तरेण. २ वत्सेश्वर. ३ देवस्य. ४ अपूर्व. ५ सक्षे० इति पाठः.

स्मद्गृहेषु महोत्सव इव दृश्यते । स्वस्वकर्मण्यधिकतरमभियुक्तः परिजनः । तथा हि ।

वहति जलमियं पिनष्टि गन्धा-
नियमियमुद्ग्रथते स्रजो विचित्राः ।

न्वशब्दे उपपदे कृञ् इन्प्रत्ययः ॥ ३ ॥ अनुतिष्ठामि अनुष्ठास्यामीत्यर्थः । यावत्पुरानिपातयोरिति लट् । इदमामुखम् । तदुक्तम् ।

सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥
प्रस्तावना वा तत्र स्यात्कथोद्घातः प्रवृत्तकम् ।
प्रयोगातिशयश्चेति त्रीण्यङ्गान्यामुखस्य हि ॥ इति ॥

एषामङ्गानां स्वरूपं निरूपितं दशरूपके ।

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः ।
गृहीत्वा प्रविशेत्पात्रं कथोद्घातो द्विधैव सः ॥
प्रस्तूयमानपात्रस्य गुणवर्णनया स्वतः ।
प्रविशेत्सुचितं पात्रं यत्र तत्स्यात्प्रवृत्तकम् ॥
एषोयमित्युपक्षेपात्सूत्रधारप्रयोगतः ।
पात्रप्रवेशो यत्राय प्रयोगातिशयो मतः ॥ इति ॥
वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेत्र स्वभावतः ।
उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम् ॥
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृदवानि त्रयोदश ॥ इति ॥

एषां लक्षणानि । गूढार्थपदपर्यायमालारूपेण प्रश्नोत्तरमालारूपेण च द्विविधमुद्धत्यकम् । अवलगितमपि द्विविधम् । अन्यकार्यछद्मनान्यकार्यकरणम् । अन्यकार्यप्रसङ्गात्प्रकृतकार्यसिद्धिश्चेति । असद्भूतं मिथःस्तोत्रं प्रपञ्चः । पूर्वरङ्गे नटादिभिः साम्यादनेकार्थप्रयोजनं त्रिगतम् । प्रियसदृशैर्वाक्यैरप्रियैर्लोभनं छलम् । साकाङ्क्षस्य वाक्यस्य निवर्तनमुक्तिप्रत्युक्तिर्वा वाक्केलिः । स्पर्द्धयान्योन्यवाक्याधिक्यमधिबलम् । सहसोदितं प्रस्तुतविरोधि गण्डम् । रसावेशादुक्तान्यथाव्याख्यानमवस्यन्दितम् । सोपहासनिगूढार्थप्रहेलिका नालिका । प्रहेलिकावहेलनवचनम् । असंबद्धकथाप्रायः प्रलापोसत्प्रलापः । अन्यार्थं हास्यप्रलोभनकरवचनं व्याहारः । दोषाणां गुणवत्प्रतिपादनं मृदवमिति । एषां यथासंभवं कतिचित्प्रस्तावनायां प्रयोक्तव्यानि । अत्र अये

---

१ एतत्क्वचिन्नास्ति.

मुसलमिदमियं च पातकाले
मुहुरनुयाति कलेन हुंकृतेन ॥ ४ ॥

भवतु कुटुम्बिनीं तावदाहूय पृच्छामि । (नेपथ्याभिमुखमवलोक्य ।)

गुणवत्युपायनिलये स्थितिहेतोः साधिके त्रिवर्गस्य ।
मद्भवननीतिविद्ये कार्याचार्ये द्रुतमुपेहि ॥ ५ ॥

(प्रविश्य ।) **नटी**—आर्य इयमस्मि । आज्ञानियोगेन मामार्योनुगृह्णातु । (अज्ज इअह्मि । अण्णाणिओएण मं अज्जो अणुगेह्णदु ।)

सूत्र०—आर्ये तिष्ठतु तावदाज्ञानियोगः । कथम किमद्य भवत्या

तत्किमिदमित्यादिना गृहकृत्यप्रसङ्गेन क्रूरग्रहः स केतुरिति प्रस्तावनारूपकार्यसिद्धेःखलगनादवलगितं नाम आमुखाङ्गम् । वहति जलमिति स्वभावोक्तिरलङ्कारः ॥४॥

गुणवत्युपायेत्यार्या । अल्पसमासा ऋजुपदा भारती वृत्तिः । अत्र भार्याविषये सौशील्यगृहकृत्यदक्षत्वादयो गुणा उपायश्च । नीतिविषये गुणाः सन्धिविग्रहादयः षट् सामादय उपायाश्चत्वारः । विहितकार्योपदेष्टृत्वात्कार्याचार्यत्वमुभयत्र समम् । गार्हस्थ्यस्थितिहेतुत्रिवर्गसाधकत्वं पत्न्याः श्रुतिस्मृतिषु प्रसिद्धम् । नीतिविषये क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनामित्युक्तलक्षणस्त्रिवर्गो राज्यस्थितिहेतुः । अत्र ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेदिति वचनात्तृतीयाङ्के वर्णयिष्यमाणशरदृतूपादानं कृतमिति वोद्धव्यम् तथाहि अम्भःप्रसादादिगुणवति विजिगीषूणां सामाद्युपायनिलये तेषामेव दिग्विजयावसरप्रदायित्वनार्थसाधिके तन्निबन्धनत्वाद्धर्मकामयोस्तत्साधिके च । एवं लोकस्थितिहेतुत्रिवर्गस्य साधिके जैत्रयात्रादिकार्याणामाचार्येनुकूलत्वेन प्रवर्तिके भोः शरद् द्रुतमुपेहीति विजिगीषुणा चन्द्रगुप्तेन शरदागमः प्रार्थ्यते तन्मन्त्रिणा चाणक्येन राक्षसातिसन्धानार्थं स्वकुलविद्यानीतिरभिमुखीक्रियत इति च ध्वनितम् । उपायनिलये इत्यत्र निलीयतेत्रेति योगेन निलयशब्दो विशेष्यनिघ्नः । शरदृतोर्विजयानुकूलत्वं सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् । यात्रायै नोदयामास तं शक्तेः प्रथमं शरदित्यादि सर्वैर्महाकविभिः बहुशः प्रपञ्चितम् । अत्र श्लेषोलङ्कारः । ' नानार्थसंशयः श्लेषो वर्ण्यावर्ण्योभयास्पद ' इति तल्लक्षणात् । अत्रासद्भूतभार्यास्तोत्रं प्रपञ्चः । साम्यादनेकार्थप्रयोजनं त्रिगतं चामुखाङ्गं त्रिष्वनुगतत्वादन्वर्थम् ॥ ५ ॥

आर्ये तिष्ठत्विति । इयं साकाङ्क्षस्य वाक्यस्य निर्वतनरूपा वाकेलिः । कथ-

---

१ हेतो. २ कार्यादा.

भगवंतां ब्राह्मणानामुपनिमन्त्रणेन कुटुम्बकमनुगृहीतमभिमता वा भवनमतिथयः संप्राप्ता यत एष पाकविशेषारम्भः ।

नटी—आर्य आमन्त्रिता मया भगवन्तो ब्राह्मणाः । (अज्ज आमन्तिदा मए भअवन्तो बह्मणा ।)

सूत्र०—कथय कस्मिन्निमित्ते ।

नटी—उपरज्यते किल भगवान् चन्द्र इति । (उवरज्जदि किल भअवं चन्दो त्ति ।)

सूत्र०—आर्ये क एवमाह ।

नटी—एवं खलु नगरवासी जनो मन्त्रयते । (एवं खु णअरवासी जणो मन्तेदि ।)

सूत्र०—आर्ये कृतश्रमोऽस्मि चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे । तत्प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः । चन्द्रोपरागं प्रति तु केनापि विप्रलब्धासि । पश्य ।

क्रूरग्रहः स केतुश्चन्द्रं संपूर्णमण्डलमिदानीम् ।
अभिभवितुमिच्छति बलात्

येत्यादि । इदमन्यार्थं पाकक्रियासाफल्यार्थं कुटुम्बकमनुगृहीतमिति प्रलोभनकरं वचनं व्याहारः ॥

कस्मिन्निति । केन निमित्तेनेत्यर्थः । सर्वासां प्रायोदर्शनस्योक्तत्वात् ॥

उपरज्यतीति । इदं प्रियसदृशैर्वाक्यैर्विलोभनं छलम् । वक्ष्यति च विप्रलब्धासीति ॥ एवमिति अयं असंबद्धकथाप्रायः प्रलापः असत्प्रलापः । [उपरागो ग्रहग्रस्तत्वम् ।] अत्र वृथा पाकारम्भरूपदोषस्य तत्प्रवर्त्यतामिति गुणवत्प्रतिपादनं मृदवं नामाङ्गम् ।

क्रूरग्रह इति । नेपथ्ये स्थितस्य चाणक्यस्येदं सहसोदितं प्रस्तुतस्य चन्द्रग्रहस्य विरोधि गण्डम् । क्रूरग्रहः स प्रसिद्धः केतुः राहुरित्यर्थः । उभयोरेकशरीरत्वेनाभेदव्यपदेशः । चन्द्रमसमिदानीमद्य पौर्णमास्यां पूर्णमण्डलमभिभवितुं

---

१ तत्रभवताम् इति पाठः. २ परिश्रमः. ३ चन्द्रमसंपूर्ण इति पाठः.

(नेपथ्ये)

आः क एष मयि स्थिते चन्द्रमभिभवितुमिच्छति ।

रक्षत्येनं तु बुधयोगः ॥ ६ ॥

सूत्र०—

नटी०—आर्य कः पुनरेष धरणीगोचरो भूत्वा चन्द्रं ग्रहाभियोगाद्रक्षितुमिच्छति । (अज्ज को उण एसो धरणीगोअरो भविअ चन्दं ग्गहाभिजोआदो रक्खिदुं इच्छदि ।)

सूत्र०—आर्ये यत्सत्यं मयापि नोपलक्षितः । भवतु भूयोभियुक्तः स्वरव्यक्तिमुपलप्स्ये । (क्रूरग्रह इत्यादि पुनस्तदेव पठति ।)

(नेपथ्ये)

आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति ।

सूत्र०—(आकर्ण्य ।) आं ज्ञातम् । कौटिल्यः ।

नटी०—(भयं नाटयति ।)

ग्रसितुं बलादिच्छति परन्तु बुधस्य ग्रहस्य योगः संबन्ध एनं चन्द्रमसं रक्षतीति । तथा च ज्योतिःशास्त्रे व्याससंहितायां गर्गवचनम् ।

ग्रहपञ्चकसंयोगं दृष्ट्वा न ग्रहणं वदेत् ।
यदि न स्याद्बुधस्तत्र तं दृष्ट्वा ग्रहणं वदेत् ॥ इति ॥

चाणक्यावगतार्थस्तु क्रूरो घोरः ग्रहः चन्द्रगुप्ताभिभवं प्रति आग्रहो यस्य स क्रूरग्रहो राक्षसः केतुना मलयकेतुना सहितः सकेतुः भीमो भीमसेन इतिवत् । चन्द्रं चन्द्रगुप्तमिदानीमसंपूर्णमण्डलमवशीकृतचन्द्रम् असंपूर्णमण्डलमिति छेदः । चन्द्रं चन्द्रगुप्तमिदानीमसंपूर्णमण्डलमवशीकृतसर्वराष्ट्रमव्याप्यरूढमूलमिति यावत् । बलान्महता म्लेच्छबलेनाभिभवितुं पराभवितुमिच्छतीति । एनं तु बुधस्य नयज्ञस्य चाणक्यस्य योग उपायो रक्षतीति प्रस्तावनार्थः । प्रस्तावना तु तत्र स्यात्कथोद्घातप्रवर्तिकेति लक्षणात् इयं प्रस्तावना । अत्र वाशब्दस्य समुच्चयार्थत्वात् आमुखप्रस्तावनयोः समुच्चयः कृत इति बोध्यम् । अत्र मुद्रानामालङ्कारः । सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैरिति लक्षणात् ॥ ६ ॥

[अभियुक्तः निपुणं दत्तावधान इत्यर्थः । स्वरव्यक्त्या कस्यायं स्वर इति ज्ञास्यामीत्यर्थः ।]

आर्य इति । इदं सोपहासं निगूढार्थप्रहेलिका नालिका । क एष इति । इदं स्पर्धयान्योन्यवाक्याधिक्यरूपमधिबलम् ।

सूत्र०—

कौटिल्यः कुटिलमतिः स एष येन
क्रोधाग्नौ प्रसभमदाहि नन्दवंशः ।
चन्द्रस्य ग्रहणमिति श्रुतेः सनाम्नो
मौर्येन्दोर्द्विषदभियोग इत्यवैति ॥ ७ ॥

कौटिल्य इति । चन्द्रस्य ग्रहणमिति श्रुतेः श्रवणात्सनाम्नः समाननामकस्य मौर्येन्दोश्चन्द्रगुप्तस्य द्विषदभियोगः द्विषता मलयकेतुनाभियोगो निरोधः अभिषेणनमिति यावत् । इत्यवैति एवं जानातीत्यर्थः । अत्र सनाम्नो मौर्येन्दोः द्विषदभियोग इत्यवैतीति रसावेशादुक्तान्यथाव्याख्यानमवस्यन्दितं नामामुखाङ्गम् । गूढार्थपरपर्यायमालारूपं प्रश्नोत्तरमालारूपं च द्विविधमप्युद्धात्यकं नामाद्यमङ्गमाद्ये नान्दीपद्ये कृतमामुखाङ्गत्वेन संग्राह्यम् । नान्दीपद्यस्याप्यामुखप्राक्कालिकत्वेनामुखान्तर्भूतस्याप्युचितत्वात् । यदि नान्दी आमुखबहिर्भूतैवेत्याग्रहस्तर्हि क्रूरग्रहः सकेतुरित्यत्रैव गूढार्थपरपर्यायरूपमुद्धात्यकं बोध्यम् । अत्र रक्षत्येनं तु बुधयोग इति स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिण इति लक्षणात्कथोद्घातः । येन क्रोधाग्नौ प्रसभमदाहि नन्दवंश इति प्रस्तूयमानकार्यस्य गुणवर्णनया स्वत इति लक्षणसत्त्वात्प्रवृत्तकम् । स एष इति पदाभ्यां एषोयमित्युपक्षेपात्सूत्रधारप्रयोगत इति लक्षणस्य च सत्त्वात्प्रयोगातिशयश्चेति त्रीण्यङ्गानि प्रस्तावनाया उक्तानि । इति वीथ्यङ्गैस्त्रयोदशभिः स्वाङ्गैश्च त्रिभिः सहिता षोडशाङ्गा प्रस्तावना निरूपिता । अत्र प्रथमाङ्के वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः । इत्युक्तलक्षणो विष्कम्भो न कृतः । प्रस्तावनयैव क्रोधाग्नौ प्रसभमदाहि नन्दवंश इति वृत्तकथांशस्य मौर्येन्दोः द्विषदभियोग इति वर्तिष्यमाणकथांशस्य च निदर्शनात् । यद्वा । अन्तर्जवनिकासंस्थैश्चूलिकार्थस्य सूचनेति लक्षणान्नेपथ्यगतेनैव चाणक्येन नाटकीयार्थस्य सूचनात् प्रस्तावनान्तर्गतैव चूलिका कृतेति बोध्यम् । अथ प्रकृते नाटके मुखसन्धिरारभ्यते । सन्धेः सामान्यलक्षणानि दशरूपके—अवान्तरार्थसंबन्धः सन्धिरेकान्वये सतीति । एकेन प्रयोजनेनान्वितानां कथांशानां अवान्तरप्रयोजनेन संबन्धः सन्धिः । तत्रारम्भबीजसंबन्धो मुखसन्धिः ॥ ७ ॥

यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा ।
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम् ।

इति मुखसन्धिलक्षणम् ।

तदित आवां गच्छावः । (इति निष्क्रान्तौ ।)

इति प्रस्तावना ।

(ततः प्रविशति मुक्तां शिखां परामृशन्कुपितश्चाणक्यः ।)

चाण०—कथय क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति । पश्य ।

आस्वादितद्विरदशोणितशोणशोभां
सन्ध्यारुणामिव कलां शशलाञ्छनस्य ।
जृम्भाविदारितमुखस्य मुखात्स्फुरन्तीं
को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम् ॥ ८ ॥

ततः प्रविशति इत्यादिसन्दर्भो मुखसन्धिः । मौर्यलक्ष्मीस्थैर्यहेतुराक्षससंग्रहरूपमुख्यप्रयोजनार्थायाश्चाणक्योपायविचारकथाया अनुकूलदैवकृतराक्षसमुद्रालाभाद्यवान्तरप्रयोजनेन सह संबन्धस्य सामान्यलक्षणस्यारम्भबीजसंबन्धस्य च वक्ष्यमाणविशेषलक्षणस्य वक्ष्यमाणाया बीजसमुत्पत्तेश्च सत्त्वात् ।

मुक्तां शिखामिति । नन्दकुलप्रतिज्ञावसरे मुक्ता शिखा न बद्धा चन्द्रगुप्तलक्ष्मीस्थैर्यस्याद्याप्यनिष्पन्नत्वात् । अत्र सिंहवदतिक्रूरमपि मां परिभूय मया महता संरम्भेण साधितां मौर्यलक्ष्मीं राक्षसो हर्तुमिच्छतीति रूपकातिशयोक्त्या ध्वनितम् । रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः । इति लक्षणात् । को नामेति राक्षसस्य साहसिकत्वदुःसाध्यसाधकत्वादयो गुणाः सूचिताः । हरेर्दंष्ट्रामिति मौर्यश्रियो दुरुद्धरत्वं सूचितम् । आस्वादितेति । अचिरकृतनन्दवंशवधरोषः अद्यापि न शान्त इति सूचितम् । सन्ध्यारुणचन्द्रकलादृष्टान्तेन मौर्यश्रीरभिनवा वर्द्धिष्णुर्विश्वाभिनन्द्येति च सूचितम् । जृम्भाविदारितमुखस्येति स्वस्यास्मिन्विषयेतिजाग्रता ध्वनिता । स्फुरन्तीमिति समग्राङ्गतया लक्ष्म्या वैरिदुःसाध्यत्वमुक्तम् । एवं जाग्रतोपि मम पौरुषं परिभूय अवज्ञाय मौर्यलक्ष्मीं हर्तुं यतत इत्यहोतिशूरो दण्डनीतिपारदृश्वा स्वामिकार्यधुर्यो राक्षसोवश्यं संग्राह्य इति चाणक्यौत्सुक्यमात्ररूपा बीजस्यारम्भावस्थार्थतः सूचिता । चन्द्रगुप्तलक्ष्मीस्थैर्यफलकस्य राक्षससंग्रहरूपकार्यस्य हेतुरनुकूलदैवश्चाणक्यनीतिप्रयोगो बीजम् । यथा रत्नावल्यां वत्सराजस्य सागरिकाप्राप्तिहेतुरनुकूलदैवो यौगन्धरायणोद्योगः । यथा वा वेणीसहारे द्रौपदीकेशसंयमनहेतुर्भीमक्रोधोपचितो युधिष्ठिरोत्साहो बीजम् । तच्च बीजं महाकार्यावान्तरकार्यभेदादनेकप्रकारमित्यनकधाविस्तारीत्युक्तम् । राक्षससंग्रहश्च मलयकेतुनिग्रहं विना न घटत इति निग्रहोप्य-

अपि च ।

नन्दकुलकालभुजगीं कोपानलबहल[1]नीलधूमलताम् ।
अद्यापि बध्यमानां वध्यः [2]को नेच्छति शिखां मे ॥ ९ ॥

अपि च ।

उल्लङ्घयन्मम समुज्ज्वलतः प्रतापं
कोपस्य नन्दकुलकाननधूमकेतोः ।
सद्यः परात्मपरि[3]माणविवेकमूढः
कः शालभेन विधिना लभतां विनाशम् ॥ १० ॥

शार्ङ्गरव शार्ङ्गरव ।

(प्रविश्य ।) शिष्यः । उपाध्याय आज्ञापय ।

चाण०—वत्स उपवेष्टुमिच्छामि ।

शिष्यः—उपाध्याय नन्वियं सन्निहितवेत्रासनैव द्वारप्रकोष्ठशाला । तदस्यामुपवेष्टुमर्हत्युपाध्यायः ।

चाण०—वत्स कार्याभिनियोग एवास्मान्व्याकुलयति न पुनरुपाध्यायसमभूः शिष्यजने दुःशीलता । (नाट्येनोपविश्यात्मगतम् ।)

वान्तरप्रयोजनत्वेन सूचनीयः ॥ ८ ॥ तदेतदाह नन्देति । नैल्यकौटिल्यगुणेन कालभुजगीधूमलतात्वेन निरूपणम् । वध्यो मलयकेतुरित्यर्थः । मलयकेतुनिग्रहं विना शिखां न बध्नामीति पद्यस्य निष्कृष्टोर्थः ॥ ९ ॥

इममेव संरम्भं वीररसेनोपोद्बलयति । उल्लङ्घयन्निति । मम मदीयस्य समुज्ज्वलतः प्रदीप्तस्य नन्दकुलदाहकवह्निरूपस्य कोपस्य प्रतापमुग्रत्वं ज्वालां चोल्लङ्घयन्नतिक्रमिष्यन्नित्यर्थः । कः मलयकेतुः परात्मनोः परिमाणं तारतम्यं तद्विवेकशून्यः शालभेन विधिना दहनज्वालापतयालुशलभरीत्या विनाशं लभताम् । [अत्र कामन्दकः–आत्मानं च पार्श्वेव ज्ञात्वा धीरः समुत्पतेत् । एतदेवहि विज्ञानं यदात्मपरवेदनम् ॥ अन्यत्र च नाग्नि पतङ्गवद्गच्छेत् स्पृश्यमेव हि संस्पृश्येत् । किमन्यत्स्यादृते दाहात्पतङ्गस्याग्निमृच्छतः ॥ इति ।] अत्र पद्यद्वयेनुभयतादूप्यरूपकालङ्कारः । विषय्यभेदताद्रूप्यं रञ्जनं विषयस्य यत् । रूपकं तु त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः । इति लक्षणात् ॥ १० ॥

कार्यसंरम्भवैयग्र्येण द्विरुक्तिः शार्ङ्गरवेति । वत्सेति । इदमुपालम्भगर्भवचनम् । अधुनाप्यासनं त्वया न सज्जीकृतमित्याशयः । वत्स कार्याभि-

---

१ लोल. २ को नाम इति पाठः. ३ परिणाम.

कथं प्रकाशतां गतोयमर्थः पौरेषु यथा किल नन्दकुलविनाशजनितरोषो राक्षसः पितृवधामर्षितेन सकलनन्दराज्यपरिपणनप्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह सन्धाय तदुपगृहीतेन च महता म्लेच्छराजबलेन परिवृतो वृषलमभियोक्तुमुद्यत इति । (विचिन्त्य ।) अथवा येन मया सर्व लोकप्रकाशं नन्दवंशवधं प्रतिज्ञाय निस्तीर्णा दुस्तरा प्रतिज्ञासरित्सोहमिदानीं प्रकाशीभवन्तमप्येनमर्थं समर्थः प्रशमयितुम् । कुतः—यस्य मम

श्यामीकृत्याननेन्दूनरियुवतिदिशां सन्ततैः शोकधूमैः
कामं मन्त्रिद्रुमेभ्यो नयपवनहृतं मोहभस्म प्रकीर्य ।
दग्ध्वा संभ्रान्तपौरद्विजगणरहितान्नन्दवंशप्ररोहान्
दाह्याभावान्न खेदाज्ज्वलन इव वने शाम्यति क्रोधवह्निः । ११ ॥

नियोग इति । कार्ये राक्षससंग्रहं प्रति अभिनियोगः अभिनिवेश एवं त्वदुपालम्भत्वेनास्मान्व्याकुलयति । न पुनरुपाध्यायसहभूरुपाध्यायत्वव्याप्येत्यर्थः । शिष्यजने विषये दुःशीलता उपालम्भनशीलता । अल्पेप्यपराधे शिष्यजनं प्रति उपालम्भनमुपाध्यायानां सहजो दोष इत्यर्थः । त्वं तु सेवायामत्यन्तं समवहितोसि कार्यव्यग्रत्वादहं त्वामुपालब्धवानस्मीत्यर्थः । अत्र कार्याभिनियोग इत्यनेनानिर्वाहणाद्विन्द्वादिरूपेणानेकधा विस्तारिणः कार्यहेतोश्चाणक्योद्योगस्य बीजस्य स्तोकोद्देशः कृत इति बोध्यम् । अथास्य सन्धेरङ्गान्युच्यन्ते । अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् । बीजारम्भानुगुण्येन मुखसन्धेरङ्गानि प्रयोक्तव्यानि ।

उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ॥
उद्भेदभेदकरणान्यन्वर्थानि यथाक्रमम् ॥ इति ॥

कथमित्यादि । अयमाशयः । पुरं सर्वं नन्दमौलबलाक्रान्तं प्रकृतयश्च सर्वा नन्दकुलामात्ये राक्षसेनुरक्ताः । अतस्तदुद्यममुपश्रुत्य महान्तमन्तःकोपमुत्पादयेयुस्ततश्च महात्सङ्कटमापतितं कथं कर्तव्यमिति चिन्ता । अथ वेति चिन्तापरिहारः । समागतमप्येनं दण्डेन निग्रहीतुं समर्थः इत्यर्थः ।

सामर्थ्यमेवोद्भावयति द्वाभ्याम् । श्यामीकृत्यति । अरियुवतय एव दिश इत्यादिरूपकम् । मन्त्रिद्रुमेभ्य इति क्रियया यमभिप्रेति स संप्रदानमिति सोह-

---

१ रोषामर्षः. २ असमर्थः-न समर्थः, किं प्रश०. ३ रिपु. इति पाठः.

अपि च ।

शोचन्तोवनतैर्नराधिपभयाद्धिक्शब्दगर्भैर्मुखै-
र्मामग्रांसनतोवकृष्टमवशं ये दृष्टवन्तः पुरा ।
ते पश्यन्ति तथैव संप्रति जना नन्दं मया सान्वयं
सिंहेनेव गजेन्द्रमद्रिशिखरात्सिंहासनात्पातितम् ॥ १२ ॥

सोहमिदानीमवसितप्रतिज्ञाभारोपि वृषलापेक्षया शस्त्रं धारयामि येन मया

समुत्खाता नन्दा नव हृदयशल्या इव भुवः
कृता मौर्ये लक्ष्मीः सरसि नलिनीव स्थिरपदा ।
द्वयोः सारं तुल्यं द्वितयमभियुक्तेन मनसा
फलं कोपप्रीत्योर्द्विषति च विभक्तं सुहृदि च ॥ १३ ॥

अथवा अगृहीते राक्षसे किमुत्खातं नन्दवंशस्य किं वा स्थैर्य-

भस्मविक्षेपक्रियया भिप्रेतानां मन्त्रिद्रुमाणां संप्रदानत्वं पत्ये शेत इतिवत् । राक्षसवक्रनासादीन्मन्त्रिणः स्वमन्त्रशक्त्या मोहयित्वा प्रतिविधातुमसमर्थान् कृत्वत्यर्थः पौरद्विजेति । वेणुवनदाहे द्विजगणाः पक्षिगणा उड्डीय पलायन्त इति भावः ॥ मन्त्रिणः पौरांश्च हित्वा यत्प्रतिज्ञातं नन्दसंहरणं तदेव मया कृतमिति स्वस्योचितकारित्वं सूचितम् । न खेदान्न निर्वेदात् । संप्रति दाह्यो वध्यो मलयकेतुः प्राप्तस्तस्मिन् क्रोधवह्निर्ज्वलिष्यतीति भावः ॥ ११ ॥

शोचन्त इति । अवशं तदानीं प्रतिकर्तुमसमर्थं तथैव यथाग्रासनतोहमवकृष्टस्तथैवेत्यर्थः । ते पश्यन्तीति । ईदृशो मदीयः क्रोधः सर्वलोकप्रत्यक्ष इति भावः ॥ १२ ॥

शस्त्रं उद्योगम् । अयं बीजन्यास उपक्षेपः अङ्गम् । काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः । राक्षससंग्रहरूपकार्यबीजस्य स्वोद्योगस्य बीजन्यासादुपक्षेपात् । शस्त्रधारणमावश्यकमित्याह । येनेति । सारं न्याय्यं । 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' । इत्यमरः । फलं निग्रहानुग्रहरूपमभियुक्तेन निग्रहानुग्रहाभिनिवेशवता मनसा द्विषत्सुहृदोरतुल्यं युगपद्विभक्तं विभज्य स्थापितमित्यर्थः ॥ १३ ॥ सोहमिति पूर्वेणान्वयः । इदं बीजस्य बहुलीकरणं परिकरः । चन्द्रगुप्तलक्ष्मीस्थैर्योत्पादनहेतोर्बीजस्यावश्यं कर्तव्यत्वेन प्रचुरीकरणाद्द्वितीयमङ्गम् । अहो इति । इयं बीज-

---

१ अग्र्या०. २ भरः ३ रोगाः.

मुत्पादितं चन्द्रगुप्तलक्ष्याः । (विचिन्त्य ।) अहो राक्षसस्य नन्दवंशे निरतिशयो भक्तिगुणः । स खलु कस्मिंश्चिदपि जीवति नन्दान्वयावयवे वृषलस्य साचिव्यं ग्राहयितुं न शक्यते । तदभियोगं प्रति निरुद्योगः शक्योवस्थापयितुमस्माभिः । अनयैव बुद्ध्या तपोवनगतोपि घातितस्तपस्वी नन्दवंशीयः सर्वार्थसिद्धिः । यावदसौ मलयकेतुमङ्गीकृत्यास्मदुच्छेदाय विपुलतरं प्रयत्नमुपदर्शयत्येव । (प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा ।) साधु अमात्य राक्षस साधु । श्रोत्रिय साधु । साधु मन्त्रिबृहस्पते साधु । कुतः ।

ऐश्वर्यादनपेतमीश्वरमयं लोकोर्थतः सेवते
तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया ।
भर्तुर्ये प्रलयेपि पूर्वसुकृतासङ्गेन निःसङ्गया
भक्त्या कार्यधुरां वहन्ति कृतिनस्ते दुर्लभास्त्वादृशाः ॥ १४ ॥

अत एवास्माकं त्वत्संग्रहे यत्नः कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति । कुतः ।

विषये आश्चर्यावेशः परिभावना तृतीयमङ्गम् । राक्षसभक्तिगुणविषयकाश्चर्यावेशस्य तत्संग्रहबीजविषयत्वोपपत्तेः । अहो एवं श्लाघ्यो मदीयोद्योग इति । स खल्विति । तस्य नन्दान्वयावयवस्याभियोगं प्रति प्रतिष्ठापनाभिमानं प्रति निरुद्योगो व्यवसायहीनश्चद्रुशे स्थापयितुं शक्य इत्यर्थः । तदभियोगं प्रति निरुद्यमो वावस्थाप्येत इति पाठान्तरम् । वा अथवा तदभियोगं प्रति निरुद्यमो व्यवसायहीनोवस्थाप्येत वशीक्रियेतेत्यर्थः । अस्माभिरिति । इदं गूढबीजप्रकाशनमुद्भेदः । पूर्वं गूढतया कृतस्य बीजस्य प्रकाशनात् । यावदेवं सत्यपि नन्दान्वये समूलमुन्मूलिते पीत्यर्थः ।

साधुत्वमेवाह ऐश्वर्यादिति । बहवो दुर्लभा भवानेको जगति दिष्ट्योपलब्धोस्माभिरित्यर्थः कृतिन इति कतिपाठः । कुशला इत्यर्थः । [प्रशस्तं कृतं कर्म येषां ते कृतपवित्रकार्या धन्या इत्यर्थः ।] तस्य भर्तुः पुनःप्रतिष्ठाशयानुगच्छन्तीत्यनुषज्यते । पूर्वसुकृतासङ्गेन पुराकृतसंरक्षणादिसुकृताविस्मरणेनेत्यर्थः । निःसङ्गया सम्प्रति निरुपाधिकया फलाशारहितयेत्यर्थः । इदं बीजगुणवर्णनं विलोभननामाङ्गम् । कार्यगुणवर्णनेन कारणगुणवर्णनस्यार्थसिद्धत्वात् ॥ १४ ॥ अत एवेति । अत्रात्सुक्यमारम्भः ।

---

१ नन्दवंशोद्यमं ; निरुद्योगैरस्माभिरवस्थातुमयुक्तामिन्गनयैव इति पाठः. २ ऊरीकृत्य, उररीकृत्यः. ३ बहवः इति पाठः.

अप्राज्ञेन च कातरेण च गुणः स्याद्भक्तियुक्तेन कः
प्रज्ञाविक्रमशालिनोपि हि भवेत्किं भक्तिहीनात्फलम् ।
प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये
ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु च ॥ १५ ॥

तन्मयाप्यस्मिन्वस्तुनि नशयानेन स्थीयते यथाशक्ति क्रियते तद्ग्रहणं प्रति यत्नः । कथमिव । अत्र तावद्वृषलपर्वतकयोरन्यतरविनाशेनापि[1] चाणक्यस्यापकृतं भवतीति विषकन्यया राक्षसेनास्माकमत्यन्तोपकारि मित्रं घातितस्तपस्वी पर्वतक[2] इति सञ्चारितो जगति जनापवादः । लोकप्रत्ययार्थमस्यैवार्थस्याभिव्यक्तये पिता ते चाणक्येन घातित इति रहसि त्रासयित्वा भागुरायणेनापवाहितः पर्वतकपुत्रो मलयकेतुः । शक्यः खल्वेष राक्षसमतिपरिगृहीतोपि व्युत्तिष्ठमानः प्रज्ञया निग्रहीतुम् । न पुनरस्य निग्रहात्पर्वतकवधोत्पन्नं राक्षसस्यायशः प्रकाशीभवत्प्रमार्ष्टुमिच्छामि । प्रयुक्ताश्च स्वपक्षपरपक्षयोरनुरक्तापरक्तजनजिज्ञासया बहु-

---

अप्राज्ञेनेति । [प्रज्ञाविक्रमाभ्यां शालते स तथोक्तस्तस्मात् ।] ते भृत्या नृपतेर्भूतये भवन्ति इतरे उक्तविलक्षणाः संपत्सु चापत्सु च कलत्रं कुटुम्बवत् केवलं पोष्याः । न कापि तैः स्वामिकार्यसिद्धिरिति भावः । इदं बीजगुणप्रोत्साहनं भेदः अङ्गम् । कार्यगुणैः स्वोद्योगस्य बीजस्य प्रोत्साहनादुपबृंहणात् ॥ १५ ॥

नशयानेनेति । नशब्देन समासः । सावधानेन स्थीयत इत्यर्थः । इदं बीजसंविधानं समाधानमङ्गं बीजस्य सम्यग्विधानात् । [विषमयी कन्या विषकन्या । लावण्यभूषणां कान्तां योषितं क्रमशो विषैः । युवतीं योजयेत्कामिरिपुभूपालघातने ॥ इत्युक्तत्वात् ।] लोक इति । लोका अयमेवार्थस्तथ्य इति यथा मन्येरन् यथा चास्मासु विश्वस्युस्तदर्थम् । किंचास्यैव लोकप्रतीतस्यार्थस्याभिव्यक्तये निर्वहणसन्धौ कथं राक्षसेन घातितस्तातो न चाणक्येनेत्येवं मलयकेतुं प्रत्ययभुमेवार्थमभिव्यञ्जयितुं प्रत्यापयितुमित्यर्थः । भागुरायणनाम्ना स्वाप्ततमेन मलयकेतोः कृतकाप्तीकृतेन गूढप्रणिधिना अपवाहितः कटकान्निःसारितः । मलयकेतुरर्धराज्यप्रदानेनात्रैव स्थापितश्चेद्राक्षस उदासीनः अन्यत्र क्वापि गच्छेत् । अमर्षाद्वान्यं कंचित्प्रबलं प्रतिपक्षमुत्थाप्य प्रत्यवतिष्ठेत नास्मद्वशमेयात् । अपवाहिते

---

१ विनाशेपि. २ पर्वतेश्वरः इति पाठः.

विधदेशवेषभाषाचारसञ्चारवेदिनो नानाव्यञ्जनाः प्रणिधयः । अन्विष्यते च कुसुमपुरवासिनां नन्दामात्यसुहृदां निपुणं[1] प्रचारगतम् । तत्तत्कारणमुत्पाद्य कृतकृत्यता[2]मापादिताश्चन्द्रगुप्तसहोत्थायिनो भद्रभटप्रभृतयः प्रधानपुरुषाः । शत्रुप्रयुक्तानां च तीक्ष्णरसदायिनां प्रतिविधानं प्रत्यप्रमादिनः परीक्षितभक्तयः क्षितिपतिप्रत्यासन्ना नियोजितास्तत्र तत्राप्तपुरुषाः । अस्ति चास्माकं सहाध्यायि मित्रमिन्दु[3]शर्मा नाम ब्राह्मणः । स चौशनस्यां दण्डनीत्यां चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे च परं प्रावीण्यमुपगतः । स मया क्षपणकलिङ्गधारी नन्दवंशवधप्रतिज्ञानन्तरमेव कुसुमपुरमुपनीय सर्वनन्दामात्यैः सह सख्यं ग्राहितो विशेषतश्च तस्मिन् राक्षसः समुत्पन्नविश्रम्भः । तेनेदानीं महत्प्रयोजनमनुष्ठेयं भविष्यति । तदेवमस्मत्तो न किंचित्परिहीयते । वृषल एव केवलं प्रधानप्रकृति[4]ष्वस्मास्वारोपितराज्यतन्त्रभारः सतत-

---

तु मलयकेतौ प्राय एनमेव परिगृह्य प्रत्यवतिष्ठेत । तदानेनैव जनापवादेन निर्वहणे जीवसिद्धिप्रत्यायितेन राक्षसमलयकेत्वोर्विरोधं संपाद्य कार्यप्रनाड्या राक्षसो वशयितुं शक्यः स्यादिति भावः । वक्ष्यति चैतद्वनगज इव तस्मात्सोऽभ्युपायैर्विनेय इति । प्रज्ञयेति । प्रज्ञया निर्वहणे संपत्स्यमानयाधुनैव निग्रहीतुं शक्यः । तन्न युक्तमित्याह । न पुनरस्येति । मलयकेतुर्निगृहीतश्चेत् पर्वतकवधोऽपि मयैव कृत इति स्यात् । ततश्च राक्षसोपरि पातितमयशः परिमार्जितं स्यात्तथा सति निर्वहणे कुटिलनयेन संविधास्यमानो राक्षसमलयकेतुविरोधो न सिध्येदिति भावः । निपुणेति । निपुणं गूढत्वेन क्रियमाणं प्रचारगतं कपटाचरणप्रकारः तत्तत्कारणं स्त्रीमद्यमृगयाशीलावित्यादि तृतीयाङ्के वक्ष्यमाणमुत्पाद्य इतो निःसार्य मलयकेतुना सह सन्धाय कृतकृत्यतां एते वयं देवकार्येवहिताः स्म इत्येवंरूपां वक्ष्यमाणां आपादिताः सहोत्थायिनो बाल्यात्प्रभृति स्वसमानतया दानमानादिभिर्वर्धिता इत्यर्थः । इदानीं कार्यनिर्वहणप्रसङ्गसमय इत्यर्थः । यथाशक्ति क्रियत इत्यारभ्य भविष्यतीत्यन्तं बीजानुगुणप्रस्तुतकार्यारम्भःकरणम् अत्रैव करणे अत्र तावद्वृषलेत्यारभ्य प्रमार्ष्टुमिच्छामीत्यन्तः सन्दर्भः बीजानुकूलसङ्घटनप्रयोजनविचारो युक्तिः । शत्रुप्रयुक्तानामित्यादि तत्राप्तपुरुषा इत्यन्तं बीजसुखदुःखहेतुर्विधानम् । सुखदुःखहेतोर्विचारस्यात्र विधानात् । तीक्ष्णरसदायिनो दुःखहेतवः तत्प्रतिविधानं प्रति अप्रमादिनः सुखहेतवः । न किंचित्परिहास्यत इति । परिहीनं न्यूनं न भविष्यतीत्यर्थः । इयं

---

१ निपुणतरम्. २ तत्तत्कृत्यताम्. ३ विष्णु. ४ निश्वस्मा.

मुदास्ते । अथवा यत्स्वयमभियोगदुःखैरसाधारणैरपाकृतं तदेव राज्यं सुखयति । कुतः ।)

स्वयमाहृत्य भुञ्जाना बलिनोपि स्वभावतः ।
गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥ १६ ॥

(ततः प्रविशति यमपटेन चरः ।)

प्रणमत यमस्य चरणौ किं कार्यं दैवतैरन्यैः ।
एष खल्वन्यभक्तानां हरति जीवं परिस्फुरन्तम् ॥ १७ ॥

पणमह जमस्स चलणे किं कज्जं देवएहि अण्णेहिं ।
एसो खु अण्णभत्ताणं हरइ जीअं चडफडन्तं[1] ॥

अपि च । (अवि अ ।)

पुरुषस्य जीवितव्यं विषमाद्भवति भक्तिगृहीतात् ।
मारयति सर्वलोकं यस्तेन यमेन जीवामः ॥ १८ ॥

पुरिसस्स जीविदव्वं विसमादो होइ भत्तिगहिआदो ।
मारेइ सव्वलोअं जो तेण जमेण जीआमो ॥

बीजनिष्पत्तिः परिन्यासः । न किंचित्परिहास्यते सर्वं समाहितमिति परितः सर्वैरुपायैर्बीजस्य न्यासात् ।

अभियोगदुःखैः कार्याभिनिवेशजनितखेदैरित्यर्थः । अयं बीजसुखागमः प्राप्तिर्नामाङ्गम् । बीजेन स्वनीतिप्रयोगेण वृषलस्य सुखागमात्सुखप्राप्तेः । इत्थं मुखसन्धेर्द्वादशाङ्गानि निरूपितानि । अतः परं यमपटचरवृत्तान्तः सर्वोपि अवान्तरार्थसंबन्धः सन्धेरेकान्वये सतीत्युक्तस्य स्वपरपक्षानुरक्तापरक्तजनजिज्ञासाराक्षसमुद्रालाभाद्यवान्तरप्रयोजनसंबन्धस्य कथनार्थः । प्रयुक्ताश्च परपक्षेत्यनेन सूचितस्य यमपटचरस्य प्रवेशः ।

परिस्फुरन्तमिति । देशीयं क्रियमाणमित्यर्थः ।

विषमादपि क्रूरादपि यमाद्भक्तिगृहीताद्भक्तिवशीकृताद्भक्तितोषितादिति यावत् । पुरुषस्य जीवितव्यं जीवनं भवतीत्यर्थः । यमभक्तिरपमृत्युहारिणीति तात्पर्यम् । अनेन गीतिद्वयेन चाणक्यस्य यमवत्क्रूरस्य स्वपक्षपरपक्षानुग्रहनिग्रहसामर्थ्यं द्योतयन् स्वस्य गूढचरत्वं सूचयति ।

---

१ तडफडन्तम्.

यावदिदं गृहं प्रविश्य यमपटं दर्शयन् गीतानि गायामि । (जाव एदं गेहं पविसिअ जमपडं दंसअन्तो गीआइं गाआमि ।)

(इति परिक्रामति ।)

शिष्यः—(विलोक्य ।) भद्र न प्रवेष्टव्यम् ।

चरः—अहो ब्राह्मण कस्येदं गृहम् । (हंहो बह्मण कस्स एदं गेहं ।)

शिष्यः—अस्माकमुपाध्यायस्य सुगृहीतनाम्न[1] आर्यचाणक्यस्य ।

चरः—(विहस्य ।) अहो ब्राह्मण आत्मीयस्यैव मम धर्मभ्रातुर्गृहं भवति । तस्माद्देहि मे प्रवेशं यावत्तवोपाध्यायस्य यमपटं प्रसार्य धर्ममुपदिशामि । (हंहो बह्मण अत्तकेरअस्स जेव्व मह धम्मभादुणो घरं होदि । ता देहि मे पवेसं जाव दे उवज्झाअस्स जमपडं पसारिअ धम्मं उपदिसामि ।)

शिष्यः—(सक्रोधम् ।) धिङ् मुर्ख किं भवानस्मदुपाध्यायादपि धर्मवित्तरः[2] ।

चरः—अहो ब्राह्मण मा कुप्य । न हि सर्वः सर्वं जानाति । तत्किमपि ते उपाध्यायो जानाति किमपि अस्मादृशा जानन्ति । (हंहो बह्मण मा कुप्प । ण हि सव्वो सव्वं जाणादि । त्ता किंवि ते उवज्झाओ जाणादि किंवि अह्मारिसा जाणन्दि ।)

शिष्यः—मूर्ख सर्वज्ञतामुपाध्यायस्य चोरयितुमिच्छसि ।

चरः—अहो ब्राह्मण यदि तवोपाध्यायः सर्वं जानाति तर्हि जानातु तावत्कस्य चन्द्रोऽनभिप्रेत इति । (हंहो बह्मण जइ तव उवज्झाओ सव्वं जाणादि ता जाणादु दाव कस्स चन्द्रो अणभिप्पेदो[3] त्ति ।)

[सुगृहीतं शुभावहत्वान्नाम यस्य । तदुक्तं–' स सुगृहीतनामा स्यात्प्रातर्यः स्मर्यते जनैः ।']

धर्मस्य राजकार्यस्य भ्राता प्रवर्तकः धर्मं पुरवृत्तान्तं निवेदयामीति गूढाभिसन्धानवचनम् । याचकस्य सर्वेपि धर्मतो भ्रातर एवेति बहिरर्थः ।

चोरयितुमपलपितुम् चन्द्रगुप्तोनभिप्रत इति गूढम् ।

---

१ नामधेयस्य. २ त्तमः. ३ अणभिमदो, अणप्पेक्खिदो.

शिष्यः—मूर्ख किमनेन ज्ञातेनाज्ञातेन वा[1]।

चरः—तवोपाध्याय एव ज्ञास्यति यदेतेन ज्ञातेन भवति। त्वं तावदेतावत् जानासि कमलानां चन्द्रोनभिप्रेत इति। ननु पश्य (तव उवज्झाओ एव्व जाणिस्सदि जं इमिणा जाणिदेव होदि। तुमं दाव एत्तिअं जाणासि कमलाणं चन्दो अणभिप्पेदो त्ति। णं पेक्ख।)

कमलानां मनोहरणामपि रूपाद्विसंवदति शीलम्।
सम्पूर्णमण्डलेपि यानि चन्द्रे विरुद्धानि॥ १९॥
कमलाण मणहराण वि रूवाहिंतो विसंवदई शीलं।
संपुण्णमण्डलम्मि वि जाइं चन्दे विरुद्धाइं॥

चाण०—(आकर्ण्यात्मगतम्।) अये चन्द्रगुप्तादपरक्तान् पुरुषान् जानामीत्युपक्षिप्तमनेन।

शिष्यः—मूर्ख किमिदमसंबद्धमभिधीयते।

चरः—अहो ब्राह्मण सुसंबद्धमेवैतद्भवेत्। (हंहो बह्मण सुसंबद्धं ज्जेव्व एदं भवे।)

शिष्यः—यदि किं स्यात्।

चरः—यदि श्रोतुं जानन्तं लभे। (जदि सुणिदुं[2] जाणन्तं लहे।)

चाण०—भद्र विश्रब्धं प्रविश लप्स्यसे श्रोतारं ज्ञातारं च।

चरः—एष प्रविशामि। (प्रविश्योपसृत्य च।) जयतु आर्यः। (एसो पविसामि। जेदु अज्जो।)

चाण०—(विलोक्यात्मगतम्।) [3]कथमयं प्रकृतिचित्तपरिज्ञाने नियुक्तो निपुणकः। (प्रकाशम्।) भद्र स्वागतमुपविश।

[कमलानि सूर्यविकासीनि। न ह्याकृतिः सुसदृशं विजहाति वृत्तमित्यन्यत्रोक्तत्वाद् मनोहरणामपि गुणग्राहकत्वाभात् शीलस्य विसंवादिता।] कमलानामित्यनेन पद्येन मनोहरगुणस्यापि राक्षसपक्षपातिजनस्य स्वरूपाननुगुणं शीलमसम्पूर्णमण्डले चन्द्रगुप्ते विरुद्धमाचरतीति गूढार्थः सूचितः। चन्द्रगुप्तस्य भाविसंपूर्णमण्डलत्वं न सहत इति यावत्॥ १९॥

---

१ गुरोर्भविष्यति इत्यधिकं क्वचित्. २ सुणितारं जाणिचारं भ ३ अतः प्राक् 'कथं प्रभूतत्वात्कार्याणां कस्य परिज्ञाने नियुक्तो निपुणक इति न ज्ञायते, आः ज्ञातम् अये तत्कथ इत्यधिकं क्वचित्.

चरः—यदार्य आज्ञापयति। (जं अज्जो आणवेदि।) (भूमावुपविष्टः।)

चाण०—भद्र वर्णयेदानीं स्वनियोगवृत्तान्तम्। अपि वृषलमनुरक्ताः प्रकृतयः।

चरः—अथ किम्। आर्येण खलु तेषु तेषु विरागकारणेषु परिहृतेषु सुगृहीतनामधेये देवे चन्द्रगुप्ते दृढमनुरक्ताः प्रकृतयः। किंतु पुनरस्त्यत्र नगरे अमात्यराक्षसेन सह प्रथमं समुत्पन्नस्नेहबहुमानास्त्रयः पुरुषा देवस्य चन्द्रश्रियः श्रियं न सहन्ते। (अह इं। अज्जेण खु तेसु तेसु विराअकारणेसु परिहरिदेसु[1] सुगहीदणामहेए देवे चन्दउत्ते दिढं अणुरत्ताओ पकिदिओ। किंदु उण अत्थि एत्थ णअरे अमच्चरक्खसेण सह पढमं समुप्पण्णसिणेहबहुमाणा तिण्णि पुरीसा देवस्स चन्दसिरिणो सिरिं ण सहन्दि।)

चाण०—(सक्रोधम्।) ननु वक्तव्यं स्वजीवितं न सहन्त इति। भद्र अपि ज्ञायन्ते नामधेयतः।

चरः—कथमज्ञातनामधेया आर्यस्य निवेद्यन्ते। (कहं अजाणिअणामहेआ अज्जस्स णिवेदीअन्ति।)

चाण०—तेन हि श्रोतुमिच्छामि।

चरः—शृणोत्वार्यः। प्रथमं तावदार्यस्य रिपुपक्षे बद्धपक्षपातः क्षपणको[2]— (सुणादु अज्जो। पढमं दाव अज्जस्स रिपुपक्खे बद्धपक्खवादो खवणओ—)

चाण०—(आत्मगतम्[3]।) अस्माद्रिपुपक्षे बद्धपक्षपातः क्षपणकः[4]।

[चन्द्रश्रियः श्रीमतः चन्द्रगुप्तस्य श्रियं राज्यम्।] न सहन्ते यत्तदस्तीति वाक्यार्थः कर्ता। चरवाक्ये। आर्यस्य रिपुपक्ष इति तव शत्रुष्वित्यर्थः। [बद्ध पक्षपाता दृढमनुरक्ताः।] क्षपणको जैनाकृतिः।

सहर्षमात्मगतमिति। अयमभिसन्धिः अस्मत्सहाध्यायि मित्रमिन्दुशर्मा नाम ब्राह्मणः। तेनेदानीं महाप्रयोजनमनुष्ठेयं भविष्यतीति पूर्वोक्तः क्षपणको रिपुपक्षपातित्वेन दृढां प्रसिद्धिं गतः। अतस्तन्मुखेनास्माकं इष्टसिद्धिर्भविष्यतीति

---

१ हरिअन्तेसु. २ जीवसिद्धी इत्य. पु०. ३ सहर्षमा. ४ अस्मात्परं—(प्रकाशम्) कित्रामधेयो हि सः. चरः—जीवसिद्धी णाम. चाण०—अस्मद्रिपुपक्षे बद्धपक्षपात इति कथमवगतं भवता. चरः—जेण सो अमच्चरक्खसेण पउत्ता—इति पाठः.

चरः—जीवसिद्धिर्नाम स येन सा अमात्यराक्षसप्रयुक्ता विषकन्या देवे पर्वतेश्वरे समावेशिता । (जीवसिद्धी णाम सो जेण सा अमच्चरक्खसप्पउत्ता विसकण्णा देवे पव्वदीसरे समावेसिदा ।)

चाण०—(स्वगतम् ।) जीवसिद्धिः । एष तावदस्मत्प्राणिधिः । (प्रकाशम् ।) भद्र अथापरः कः ।

चरः—आर्य अपरः खल्वमात्यराक्षसस्य प्रियवयस्यः कायस्थः शकटदासो नाम । (अज्ज अवरो अमच्चरक्खसस्स पिअवअस्सो काअत्थो सअडदासो णाम ।)

चाण०—(विहस्यात्मगतम् ।) कायस्थ इति लघ्वी मात्रा । तथापि न युक्तं प्राकृतमपि रिपुमवज्ञातुम् । तस्मिन्मया सुहृच्छद्मना सिद्धार्थको विनिक्षिप्तः । (प्रकाशम् ।) भद्र तृतीयमपि श्रोतुमिच्छामि ।

चरः—तृतीयोपि अमात्यराक्षसस्य द्वितीयमिव हृदयं पुष्पपुरनिवासी मणिकारश्रेष्ठी चन्दनदासो नाम यस्य गेहे कलत्रं न्यासीकृत्य अमात्यराक्षसो नगरादपक्रान्तः । (तिदीओ वि अमच्चरक्खसस्स दुदीअं हिअअं पुष्पउरणिवासी मणिआरसेठ्ठी चन्दणदासो णाम । जस्स गेहे कलत्तं णासीकदुअ अमच्चरक्खसो णअरादो अवक्कन्तो ।)

चाण०—(आत्मगतम् ।) नूनं सुहृत्तमः । न ह्यनात्मसदृशेषु राक्षसः कलत्रं न्यासीकरिष्यति । (प्रकाशम् ।) भद्र चन्दनदासस्य गृहे राक्षसेन कलत्रं न्यासीकृतमिति कथमवगम्यते ।

हर्षकारणम् । जीवसिद्धौ निवेदिते तमजानन्तमिव तूष्णीभूतं चाणक्यं जगति तत्तत्कमकथनेन ज्ञापयति जीवसिद्धिर्नाम स इति ।

अस्मादिति । अस्माकं प्रणिधिर्गूढचरः राक्षसमित्रीभूतः सन्निमं जनापवादं निर्वहणे मलयकेतुं प्रत्यापयिष्यतीति भावः । कायस्थो लेखकः लघ्वी मात्रा फाल्गुस्तस्मादस्माकं नात्याहितं तथापि नोपेक्षणीयः । [तदुक्तं– ‘ अल्पायसोप्यरेर्वृद्धिर्महानर्थाय रोगवत् ।’]

[द्वितीयमिव हृदयं सर्वविश्रम्भस्थानमित्यर्थः ।]

---

१ च्छद्मा. २ (विहस्य) इत्यधिकम्.

चरः—आर्य इयमङ्गुलिमुद्रा आर्यमेवगतार्थं करिष्यति । (अज्ज इअं अङ्गुलिमुद्दा अज्जं अवगदत्थं करिस्सदि ।) (इति मुद्रामर्पयति ।)

चाण०—(मुद्रामवलोक्य गृहीत्वा राक्षसस्य नाम वाचयति । सहर्षं स्वगतम् ।) ननु वक्तव्यं राक्षस एवास्मदङ्गुलिप्रणयी संवृत्त इति । (प्रकाशम् ।) भद्र अङ्गुलिमुद्राधिगमं विस्तरेण श्रोतुमिच्छामि ।

चरः—श्रृणोत्वार्यः । अस्ति तावदहमार्येण पौरजनचरितान्वेषणे नियुक्तः परगृहप्रवेशे परस्यानाशङ्कनीयेन अनेन यमपटेन हिण्डमानो मणिकारश्रेष्ठिनश्चन्दनदासस्य गृहं प्रविष्टोस्मि । तत्र यमपटं प्रसार्य प्रवृत्तोस्मि गीतानि गातुम् । (सुणादु अज्जो । अत्थि दाव अहं अज्जेण पौरजणचरिदअण्णेसणे णिउत्तो परघरप्पवेसे परस्स अणासङ्कणिज्जेण इमिणा जमपडेण हिण्डन्तो[3] मणिआरसेट्ठिणो चन्दणदासस्स गेहं पविठ्ठोह्मि । तहिं जमपडं पसारिअ पउत्तोह्मि गीदाइं गाइदुं ।)

चाण०—ततः किम् ।

चरः—ततश्च एकस्मादपवरकात्पञ्चवर्षदेशीयः प्रियदर्शनीयशरीराकृतिः कुमारको बालत्वसुलभकौतूहलोत्फुल्लनयनो निष्क्रमितुं प्रवृत्तः । ततो हा निर्गतो हा निर्गत इति शङ्कापरिग्रहनिवेदयिता तस्यैवापवरकस्याभ्यन्तरे स्त्रीजनस्योत्थितो महान् कलकलः । (ततो एक्कादो अवॅवरकादो पञ्चवरिसदेसीओ पिअदंसणीअसरीराकिदी कुमारओ बालत्तणसुलहकोदुहलोप्फुल्लणअणो णिक्कमिदुं पउत्तो । तदो हा णिग्गदो हा णिग्गदोत्ति सङ्कापरिग्गहणिवेदइत्तिओ तस्स एव्व अववरकस्स अब्भन्तरे इत्थिआजणस्स उठ्ठिदो महन्तो कलअलो ।)

अङ्गुलिप्रणयी इति प्रणयी हस्तगतः इत्यर्थः [वशे यात इति यावत् । अपवरकादत्प्रकोष्ठात् ०देशीयः । ईषदसमाप्तौ कल्पब्देश्यदेशीयरः । पा. ५. ३. ६७.]

बालत्वसुलभं कौमारसहभु ।

---

१ गम्यते भवता. २ अवगमइस्सादि (अवगमयिष्यति). ३ ०न्तो अज्ज (अद्य). ४ आवरकादो. ५ सुउमारो कु०. ६ णअणजुअलो (युगलः). ७ परिग्गहणिभृदगुरुओ (निभृतगुरुकः) इति पाठः.

५९८

तत ईषद्वारदेशदापितमुख्या एकया स्त्रिया स कुमारको निष्क्रामन्नेव निर्भर्त्स्यावलम्बितः कोमलया बाहुलतया । तस्याः कुमारसंरोधसंभ्रमप्रचलिताङ्गुलेः करात्पुरुषाङ्गुलिपरिणाहप्रमाणघटिता विगलितेयमङ्गुलिमुद्रिका देहलीबन्धे पतिता उत्थिता तया अनवबुद्धैव मम चरणपार्श्वे समागत्य प्रणामनिभृता कुलवधूरिव निश्चला संवृत्ता । मयापि अमात्यराक्षसस्य नामाङ्कितेति आर्यस्य पादमूलं प्रापिता । तस्मादेषोस्या मुद्राया आगमः । (तदो ईसि दारदेशदाविदमुहीए एक्काए इत्थिआए सो कुमारओ णिक्कमन्तो एव्व णिब्भच्छिअ अवलम्बिदो कोमलाए बाहुलदाए । तस्साए कुमारसंरोधसंभमप्पचलिदङ्गुलिदो करादो पुरिसअङ्गुलिपरिणाहप्पमाणघडिआ विअलिआ इअं अङ्गुलिमुद्दिआ देहलीबन्धम्मि पाडिआ उठ्ठिदा ताए अणवबुद्धा एव्व मम चलणपासं समागच्छिअ पणामणिहुदा कुलवंहु विह णिच्चला संवुत्ता । मए वि अमच्चरक्खसस्स णामङ्किदेत्ति अज्जस्स पादमूलं पाविदा । ता एसो इमाए आअमो ।)

चाण०—भद्र श्रुतम् । अपसर । नचिरादस्य परिश्रमस्यानुरूपं फलमाधिगमिष्यसि ।

चरः—यदार्य आज्ञापयति । (जं अज्जो आणवेदि ।) (इति निष्क्रान्तः ।)

चाण०—शार्ङ्गरव शार्ङ्गरव ।

[कुमारस्य संरोधस्तत्र संभ्रमस्त्वरा । परिणाहो विस्तारः । देहली उदुम्बरः । उत्थिता उत्पतिता । अनवबुद्धा अज्ञाता ।]

इत्थं नानार्थरससंभवा बीजसमुत्पत्तिर्निरूपिता । अतोयं मुखसन्धिः साङ्गो व्याख्यातः । अतः परं प्रतिमुखसन्धिः । 'लक्ष्यालक्ष्यस्य बीजस्य व्यक्तिः प्रतिमुखं मतम्' इति लक्षणात् । पूर्वं लक्ष्यस्य व्यक्तस्य मध्ये यमपटचरवृत्तान्तेनालक्षितचाणक्यनीतियोगबीजस्य पुनरत्र व्यक्तेरुद्भेदात् । यत्नबिन्दुसंबन्धस्य च सत्त्वात् । बिन्दुयत्नौ चाग्रे वक्ष्येते । बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश ।

---

१ णववहु (नववधु०) इति पाठः

(प्रविश्य ।)

शिष्यः—उपाध्याय आज्ञापय ।

चाण०—वत्स मसीभाजनं पत्रं चोपानय ।

शिष्यः—(तथा[1] करोति ।)

चाण०—(पत्रं गृहीत्वा स्वगतम् ।) किमत्र लिखामि । अनेन खलु लेखेन राक्षसो जेतव्यः ।

(प्रविश्य ।)

प्रतीहारी—जयत्वार्यः । (जेदु अज्जो ।)

चाण०—(सहर्षमात्मगतम् ।) गृहीतो जयशब्दः । (प्रकाशम् ।) शोणोत्तरे किमागमनप्रयोजनम्[2] ।

प्रती०—आर्य देवश्चन्द्रश्रीः शीर्षे कमलमुकुलाकारमञ्जलिं निवेश्य आर्यं विज्ञापयति । इच्छाम्यार्येणाभ्यनुज्ञातो देवस्य पर्वतेश्वरस्य पारलौकिकं कर्तुम् । तेन च धारितपूर्वाणि आभरणानि ब्राह्मणेभ्यः प्रतिपादयामीति । (अज्ज देवो चन्द्रसिरी सीसे कमलमुउलाआरम-ञ्जलिं णिवेसिअ अज्जं विण्णवेदि । इच्छामि अज्जेण अब्भणुण्णादो देवस्स पव्वदीसरस्स पारलोइअं कादुं तेण अ धारिदपुव्वाइं आहरणाइं बह्मणाणं[3] पडिवादिमित्ति ।)

बिन्दुप्रयत्नानुगुण्येनास्य सन्धेस्त्रयोदशाङ्गानि प्रयोक्तव्यानि । 'विलासः परिसर्पश्च विधूतं शमनर्मणी । नर्मद्युतिः प्रशमनं विरोधः पर्युपासनम् । वज्रं पुष्पं परि-न्यासो वर्णसंहार इत्यपि ।'

किमत्रेति । अयं चाणक्यस्य पुनरुद्योगो बिन्दुः । अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणमिति लक्षणात् । अवान्तरार्थेन यमपटचरवृत्तान्तेन विच्छिन्न-स्यान्तरितस्य बीजस्य पुनः प्रवर्तनात् । तदुक्तं दशरूपके– 'अवान्तरितस्य बीजस्य संज्ञान्तरमाह ।' अवान्तरार्थेति । बिन्दुवद्बिन्दुः । जले तैलबिन्दुवत्प्रसृतत्वात् । प्रतीहारीलक्षणं तु– 'सान्धिविग्रहसन्नद्धनानाचारसमुत्थितम् । निवेदयन्ति याः कार्यं प्रतीहार्यस्तु ता मताः ॥ इति ॥ गृहीत इति । अयं कार्यसिद्धिविषयमनोरथो विलासः । प्रथममङ्गम् ।

---

१ यदाज्ञापयत्युपाध्यायः । इति निष्क्रम्य पुनः प्रविश्य । उपाध्याय इदं मसीभाजनं पत्रं च. २ कारणम्. ३ गुणवन्ताण (गुणवतां), भअवन्ताणं इत्यधिकम्.

चाण०—(सहर्षमात्मगतम् ।) साधु वृषल ममैव हृदयेन सह संमन्त्र्य सन्दिष्टवानसि । (प्रकाशम् ।) शोणोत्तरे उच्यतामस्मद्वचनाद्वृषलः-साधु वत्स अभिज्ञः खल्वसि लोकव्यवहाराणां तदनुष्ठीयतामात्मनोभिप्रायः । किंतु पर्वतेश्वरधृतपूर्वाणि गुणवन्ति भूषणानि गुणवद्भ्य एव प्रतिपादनीयानि । तदहं स्वयमेव परीक्षितगुणान् ब्राह्मणान् प्रेषयामीति ।[1]

प्रति०—यत् आर्य आज्ञापयति । (जं अज्जो आणवेदि ।) (इति निष्क्रान्ता ।)

चाण०—शार्ङ्गरव उच्यन्तामस्मद्वचनाद्विश्वावसुप्रभृतयस्त्रयो भ्रातरः वृषलात्प्रतिगृह्याभरणानि भवद्भिरहं द्रष्टव्य इति ।

शिष्यः—तथेति[2] (निष्क्रान्तः ।)

चाण०—उत्तरोयं लेखार्थः । पूर्वः कथमस्तु (विचिन्त्य ।) आः ज्ञातम् । उपलब्धवानस्मि प्रणिधिभ्यो यथा तस्य म्लेच्छराजलोकस्य[4] मध्यात्प्रधानतमाः पञ्च राजानः परया सुहृत्तया[5] राक्षसमनुवर्तन्ते । ते यथा ।

कौलूतश्चित्रवर्मा मलयनरपतिः सिंहनादो नृसिंहः
काश्मीरः पुष्कराक्षः क्षतरिपुमहिमा सैन्धवः सिन्धुषेणः ।

साधु वृषल इति । मन्मनोनुगतमेव त्वया चिकीर्षितमित्यर्थः । वृषलादिति । अलङ्कारत्रयस्य पृथक् पृथक् प्रतिग्रहाय त्रयो भ्रातर इत्युक्तम् । अलङ्कारत्रयं च सत्यवता यदनुप्रेषितं तदुपगतमिति निर्वहणे वाचयिष्यमाण इत्यर्थः । इह दृष्टनष्टबीजानुसरणं परिसर्पः पूर्वसङ्घौ दृष्टस्य मध्ये नष्टस्य बीजस्यानुसन्धानात् ।

[गुणवन्ति प्रकृष्टगुणानि महार्घाणीति यावत् प्रतिपादयितव्यानि दातव्यानि । प्रणिधयश्चराः ।

[कौलूतेति । कौलूतः कुलूतदेशाधिपतिः । चित्र वर्म सन्नाहो यस्य । सिंहस्येव नादो यस्य । क्षतो नाशितो रिपूणां महिमा येन शत्रुंदम इत्यर्थः ।]

---

१ ब्राह्मणेभ्यः इत्यधिकम्. २ यदाज्ञापयत्युपाध्याय इति पाठः. ३ अस्मात्पूर्व-विचिन्त्य इत्यधिकम्. ४ बलस्य इति पाठः. ५ भक्त्या.

मेघाख्यः[1] पञ्चमोस्मिन्पृथुतुरगबलः पारसीकाधिराजो
नामान्येषां लिखामि ध्रुवमहमधुना चित्रगुप्तः प्रमार्ष्टु ॥ २० ॥

(विचिन्त्य ।) अथवा न लिखामि पूर्वमनभिव्यक्तमेवास्ताम् । (नाट्येन लिखित्वा ।) शार्ङ्गरव ।

(प्रविश्य ।) **शिष्यः**—उपाध्याय आज्ञापय ।

चाण॰—वत्स श्रोत्रियाक्षराणि[2] प्रयत्नलिखितान्यपि नियतमस्फुटानि भवन्ति । तदुच्यतामस्मद्वचनात्सिद्धार्थकः । एभिरक्षरैः[3] केनापि कस्यापि स्वयं वाच्यमिति अदत्तवाह्यनामानं लेखं शकटदासेन लेखयित्वा मामुपतिष्ठस्व । न चाख्येयमस्मै चाणक्यो लेखयतीति ।

शिष्यः—तथा[4] (इति निष्क्रान्तः ।)

चाण॰—(स्वगतम् ।) हन्त जितो मलयकेतुः ।

(प्रविश्य लेखहस्तः ।) **सिद्धार्थकः**—जयत्वार्यः । आर्य अयं स शकटदासेन लिखितो लेखः । (जेदु अज्जो । अज्ज अअं सो सअडदासेण लिहिदो लेहो ।)

चाण॰—(गृहीत्वा) अहो दर्शनीयान्यक्षराणि[5] । (अनुवाच्य[6] ।) भद्र अनया मुद्रया मुद्रयैनम् ।

सिद्धा॰–(तथा कृत्वा ।) आर्यायं मुद्रितो लेखः । किमपरमनुष्ठीयताम् । (अज्ज अअं मुद्दिदो लेहो । किं अवरं अणुचिट्ठीअदु ।)

नामान्येषामिति । अस्मिन् पत्रे मदीयेन लेखनेनैते मरिष्यन्ति अतश्चित्रगुप्तः स्वगणिताकरपत्रे जीवितत्वेन लिखितानामेषां नामानि प्रमार्क्ष्यतीति भावः ॥ २० ॥

अथवेति । नामानि लिखितानि चेच्छकटदासोस्माभिश्छलेन लेखयिष्यमाणं पत्रं न लेखिष्यतीत्याशयः । इदमनिष्टवस्तुक्षेपरूपं विधूतम् । अनिष्टवस्तुनि नामलेखने क्षेपान्निषेधात् । विक्षेप इति पाठे स एवार्थः ।

अदत्तानि वाह्यानां कौलूतराक्षसादीनां नामानि यस्मिन् । [वाह्यस्य यस्मै लेखः प्रेष्यते तस्य नाम]

---

१ मेघाक्षः. २ यजनलिखितानि इति पाठः. ३ अस्मात्प्राक्–(कर्णे कथयित्वा) इत्य॰. ४ यदाज्ञापयत्युपाध्याय इति पाठः. ५ दर्शनीयताक्षराणाम् इति पाठः. ६ अस्मात्प्राक्–ता आणवेदु अज्जो इत्यधिकम्.

चाण०—भद्र कस्मिंश्चिदाप्तजनानुष्ठेये कर्मणि त्वां व्यापारयितुमिच्छामि ।

सिद्धा०—(सहर्षम् ।) आर्य अनुगृहीतोस्मि । आज्ञापयत्वार्यः किमनेन दासजनेनार्यस्यानुष्ठातव्यम् । (अज्ज अणुग्गिहिदोह्मि । आणवेदु अज्जो किं इमिणा दासजणेण अज्जस्य अणुचिट्ठिदव्वं ।)

चाण०—प्रथमं तावद्वध्यस्थानं गत्वा घातकाः सरोषदक्षिणाक्षिसङ्कोचसंज्ञां ग्राहयितव्यास्ततस्तेषु गृहीतसंज्ञेषु भयापदेशादितस्ततः प्रद्रुतेषु शकटदासो वध्यस्थानादपनीय राक्षसं प्रापयितव्यः । तस्माच्च सुहृत्प्राणपरितुष्टात्पारितोषिकं ग्राह्यम् । राक्षस एव कंचित्कालं सेवितव्यः । ततः प्रत्यासन्नेषु परेषु प्रयोजनमिदमनुष्ठेयम् । (कर्णे एवमेवम् ।)

सिद्धा०—यदार्य आज्ञापयति । (जं अज्जो आणवेदि ।)

चाण०—शार्ङ्गरव शार्ङ्गरव ।

(प्रविश्य ।) शिष्यः—उपाध्याय आज्ञापय ।

चाण०—उच्यतामस्मद्वचनात्कालपाशिको दण्डपाशिकश्च यथा वृषलः समाज्ञापयति य एष क्षपणको जीवसिद्धिर्नाम राक्षसप्रयुक्तो विषकन्यया पर्वतकं घातितवान्स एनमेव दोषं प्रख्याप्प सनिकारं नगरान्निर्वास्यर्तामिति ।

शिष्यः—तथे (इति परिक्रम्य ।)

कस्मिंश्चिदिति । [आप्तो विश्वसनीयः । 'आप्तः प्रत्ययितस्त्रिषु ।' इत्यमरः । दक्षिणाक्षिसङ्कोचेन संज्ञा ताम् । भयापदेशाद्भयव्याजेन ।] अयमिष्टजनानुनयः पर्युपासनम् । प्रथममिति । अयं भावः । शकटदासशूलः रोपणसमये मया सरोषदक्षिणाक्षिसङ्कोचसंज्ञायां क्रियमाणायां तं विहाय भवद्भिः पलायितव्यमिति सङ्केतयितव्या इत्यर्थः ।

[पारितोषिकं परितोषः प्रयोजनमस्य । प्रयोजनमिति ठञ् । सनिकारं सापमानम् ।]

---

१ आत्मनानु. २ नियोजयितुम्. ३ संङ्केतेषु. ४ परिगृह्य. ५ कालान्तरम्. ६ ०कन्यया. ७ पर्वतेश्वरम्. ८ बहिर्निःसार्यताम्. ९ यदाज्ञापयत्युपाध्याय इति सर्वत्र.

चाण०—वत्स तिष्ठ तिष्ठ । योयमपरः कायस्थः शकटदासो नाम राक्षसप्रयुक्तो नित्यमस्मच्छरीरमभिद्रोग्धुमिह प्रयतते स चाप्येनं दोषं प्रख्याप्य[1] शूलमारोप्यतां गृहजनश्चास्य बन्धनागारं प्रवेश्यतामिति ।

शिष्यः—तथा (इति निष्क्रान्तः ।)

चाण०—(चिन्तां नाटयति । आत्मगतम् ।) अपि नाम दुरात्मा राक्षसो गृह्येत ।

सिद्धा०—आर्य गृहीतः । (अज्ज गहीदो ।)

चाण०—(सहर्षमात्मगतम् ।) हन्त गृहीतो राक्षसः । (प्रकाशम् ।) भद्र[2] कोयं गृहीतः ।

सिद्धा०—गृहीत आर्यसन्देशः । तस्माद्गमिष्यामि कार्यसिद्धयै । (गिहीदो अज्जसन्देसो । ता गमिस्सं कज्जसिद्धीए ।)

चाण०—(साङ्गुलिमुद्रं लेखमर्पयित्वा ।) गम्यताम् । अस्तु ते कार्यसिद्धिः ।

सिद्धा०—तथा[3] (तह) (इति निष्क्रान्तः ।)

(प्रविश्य ।) **शिष्यः**—उपाध्याय कालपाशिको दण्डपाशिकश्च उपाध्यायं विज्ञापयतः । इदमनुष्ठीयते देवस्य चन्द्रगुप्तस्य शासनमिति ।

चाण०—शोभनम् । वत्स मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि ।

गृहजनस्य बन्धनागारप्रवेशनफलमुत्तरत्र चतुर्थेऽङ्के तव च पुत्रदारैः सह समागम इति वक्ष्यमाणेन राक्षसवचनेन मलयकेतुमनसि स्मृतं स्यात्पुत्रदारस्येति राक्षसस्य च मनसि विकल्पापादनमिति सूक्ष्मदृग्भिरवधेयम् ।

शत्रुपक्षमाश्रित इति । रोषावेशेन दुरात्मेति गालनम् । हन्तेति । अयमरत्युपशमनं शमः पञ्चममङ्गम् । अरतेश्चिन्ताया उपशमनात् । साङ्गुलीति । उत्तरोत्तरवाक्यैः कार्यसिद्धिबीजप्रकाशनादिदं प्रशमनम् । मलयकेतुराक्षसयोर्विरोधापादनार्थं लेखरूप उपायः कृतः । अतः परं राक्षसस्य मौर्यसाचिव्यप्रवणीकरणाय सप्तमेऽङ्के करिष्यमाणोपायबीजमुपक्षेप्तव्यमित्याह । चन्दनदासमिदानीं द्रष्टुमिच्छामीति ।

---

१ आरोप्य. २ भद्र सिद्धार्थक. ३ जं अज्जो आणवेदित्ति प्रणम्य.

शिष्यः—तथा (इति निष्क्रम्य चन्दनदासेन सह प्रविश्य।) इत इतः श्रेष्ठिन्।

चन्दनदासः—(स्वगतम्।)

चाणक्येनाकरुणेन सहसा शब्दायितस्यापि जनस्य।
निर्दोषस्यापि शङ्का किं पुनर्मम जातदोषस्य॥ २१॥

चाणक्कम्मि अकरुणे सहसा सद्दाविदस्स वि जणस्स।
णिद्दोसस्स वि सङ्का किं उण मह जाददोसस्स॥

तस्माद्भणिता मया धनसेनप्रमुखा निजनिवेशसंस्थिताः कदापि चाणक्यहतको गेहं मे विचि[1]नोति। तस्मादवहिता। निर्वहत भर्तुरमात्य-राक्षसस्य गृहजनम्। मम तावद्यद्भवति तद्भवत्विति। (ता भणिदा मए धणसेणप्पमुहा णिअणिवेससण्ठिआ[2] कदावि चाणक्कहदओ गेहं मे विचिण्णावेदि। ता अवहिदा णिव्वहेह भट्टिणो अमच्चरक्खसस्स घरअणं। मह दाव जं होदि तं होदि तं होदु त्ति।)

शिष्यः—भोः श्रेष्ठिन् इत इतः।

चन्द०—अयमागच्छामि। (अअमाअच्छामि।) (उभौ परिक्रमतः।)

शिष्यः—(उपसृत्य।) उपाध्याय अयं श्रेष्ठी चन्दनदासः।

चन्द०—जयत्वार्यः। (जेदु अज्जो।)

चाण०—(नाट्येनावलोक्य।) श्रेष्ठिन् स्वागतमिदमासनमास्यताम्।

चन्द०—(प्रणम्य।) किं न जानात्यार्यः यथानुचित उपचारो हृदयस्य परिभवादपि महद्दुःखमुत्पादयति। तस्मादिहैवोचितायां भूमावुपविशामि। (किं ण जाणादि अज्जो जह अणुचिदो उवआरो हिअअस्स[3] परिहवादोवि महॆन्तं[4] दुःखमुप्पादेदि। ता इह ज्जेव उचिदाए भूमीए उवविसामि।)

चाणक्येऽकरुणत्वेन प्रसिद्धे तेन सहसाकस्माच्छाब्दितस्याहूतस्येत्यर्थः।

---

१ विचाययति. २ तिण्णि वाणिज्जआ (त्रयो वाणिज्याः), सावकाः इति पाठः. ३ सहिअअस्स (सहृदयस्य). ४ महन्तं इति नास्ति पुस्तके.

चाण०—भोः श्रेष्ठिन् मा मैवम् । संभावितमेवेदमस्मद्विधैः[1] भवतः । तदुपविश्यतामासन एव ।

चन्द०—(स्वगतम् ।) उपक्षिप्तमनेन दुष्टेन किमपि । (प्रकाशम् ।) यदार्य आज्ञापयति । (इत्युपविष्टः ।) (उवक्खित्तमणेण[2] दुट्ठेन किंवि । जं अज्जो आणवेदि ।)

चाण०—भोः श्रेष्ठिन् चन्दनदास अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः[3] ।

चन्द०—(स्वगतम् ।) अत्यादरः शङ्कनीयः । (प्रकाशम् ।) अथ किम् । आर्यस्य प्रसादेन अखण्डिता मे वणिज्या । (अच्चादरो सङ्कणीओ ।) (अहइं[4] । अज्जस्स प्पसाएण अखण्डिदा मे वणिज्जा)

चाण०—न खलु चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणानधुना स्मरयन्ति प्रकृतीः ।

चन्द०—(कर्णौ पिधाय ।) शान्तं पापम् । शारदनिशासमुद्गतेनेव पूर्णिमाचन्द्रेण चन्द्रश्रियाधिकं नन्दन्ति प्रकृतयः । (सन्तं पावं । सारअणिसासमुग्गएण विअ पुण्णिमाचन्देण चन्दसिरिणा अहिअं णन्दन्ति पकिदिओ ।)

चाण०—भोः श्रेष्ठिन् यद्येवं प्रीताभ्यः[5] प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः ।

भोः श्रेष्ठिन्निति । एतदादि चन्दनदासातिसन्धानार्थं परिहासवचनं नर्म । संभावितमिति । एतदुपचारकरणं संभावितमेवेति बहिरुपचारः । परिभवकरणमिति तु निगूढ आशयः । [उपक्षिप्तं प्रस्तावेन पुरस्कृतम् । प्रचीयन्ते प्रकर्षेण वर्धन्ते । संव्यवहाराणां वृद्धिलाभाः निर्व्याजवाणिज्यसम्पादिता आयाः । अखण्डिता निष्प्रत्यूहा प्रवर्तते ।]

प्रकृतिभिरिति पाठः साधुः । यद्वा स्मरतिर्ज्ञानसामान्यवचनोतो गतिबुद्धीत्यादिना कर्मत्वम् । चन्द्रश्रिया चन्द्रगुप्तेनेत्यर्थः । इयमनुगुणोद्घाटनार्था प्रीतिर्नर्मस्तुतिरष्टममङ्गम् ।

---

१ उचितमेवैतद०. २ उवक्खिदं. ३ लाभाः. ४ अज्ज अह०. इ. पा. ५ प्रतीताभ्यः.

चन्द०—आज्ञापयतु आर्यः। किं कियदस्माज्जनादिष्यत इति। (आणवेदु अज्जो किं कित्तिअं इमादो जणादो इच्छीअदि त्ति।)

चाण०—भोः श्रेष्ठिन् चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। यतो नन्दस्यैवार्थरुचेरर्थसम्बन्धः प्रीतिमुत्पादयति चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

चन्द०—(सहर्षम्।) आर्य अनुगृहीतोस्मि। (अज्ज अणुग्गहीदोह्मि।)

चाण०—भोः श्रेष्ठिन् स चापरिक्लेशः कथमाविर्भवतीति ननु भवता प्रष्टव्याः स्मः।

चन्द०—आज्ञापयतु आर्यः। (आणवेदु अज्जो।)

चाण०—संक्षेपतो राजनि अविरुद्धाभिर्वृत्तिभिर्वर्तितव्यम्[1]।

चन्द०—आर्य कः पुनरधन्यो राज्ञा विरुद्ध इति आर्येणावगम्यते। (अज्ज को उण अधण्णो रण्णा विरुद्धोत्ति अज्जेण अवगच्छीअदि।)

चाण०—भवानेव तावत्प्रथमम्।

चन्द०—(कर्णौ पिधाय।) शान्तं पापं शान्तं पापम्। कीदृशस्तृणानामग्निना सह विरोधः। (सन्तं पावं सन्तं पावं। कीदिसो तिणाणं अग्गिणा सह विरोहो।)

चाण०—अयमीदृशो विरोधः। यत्त्वम्[2]द्यापि राजापथ्यकारिणोमात्यराक्षसस्य गृहजनं स्वगृहे[3] रक्षसि।

[किं कियदिति। कीदृग्द्रव्यं किं परिमाणं च। अर्थरुचेः अर्थलोलुपस्य न तु प्रजाहितैषिणः। अपरिक्लेशः अपरिक्लेशनं दण्डपारुष्याभावात् सुखस्थितिरिति यावत्। अविरुद्धाभिर्वृत्तिभिरिति। राज्ञ आनुकूल्येन वर्तितव्यमित्यर्थः।]

इयं राजानुरागहेतुर्वाक्यरचना उपन्यासः। भवितव्यमिति युष्माभिरिति शेषः। भवानेवेति इदं प्रतिमुखनिष्ठुरवचनं वज्रम्। यत्त्वमद्यापीति। पुरा पुरादपक्रमणसमये रक्षणं भवतु नाम अद्यापि मलयकेतुमाश्रित्य राजापथ्यकरणसमये [राजापथ्यकारिणो राज्ञोऽहितमाचरतः।] तत्कलत्ररक्षणमनुचितमिति भावः।

---

१ भवितव्यम्. २ यस्त्वम्. ३ इमाभि-उपनीयाभिर, इति पाठः.

चन्द०—आर्य अलीकमेतत्केनाप्यनभिज्ञेन आर्यस्य निवेदितम् । (अज्ज अलीअं एदं केणावि अणंभिण्णेण अज्जस्स णिवेदिदं ।)

चाण०—भोः श्रेष्ठिन् अलमाशङ्कया । भीताः पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति । ततस्तत्प्रच्छादनं दोषमुत्पादयति ।

चन्द०—एवं नु इदम् । तस्मिन् समय आसीदस्मद्गृहे अमात्य राक्षसस्य गृहजन इति । (एवंण्णेदं । तस्सिं समये आसि अह्मघरे अमच्चरक्खसस्स घरअणो त्ति ।)

चाण०—पूर्वमनृतमिदानीमासीदिति परस्परविरोधिनी वचने ।

चन्द०—एतावदेवास्ति मे वाक्छलम् । (एत्तिअं जेव्व अत्थि मे वाआच्छलम् ।)

चाण०—भोः श्रेष्ठिन् चन्द्रगुप्ते राजन्यपरिग्रहश्छलानाम् । तत्समर्पय राक्षसस्य गृहजनम् । अच्छलं भवतु भवतः ।

चन्द०—आर्य ननु विज्ञापयामि आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति । अज्ज णं विण्णवेमि आसी अह्मघरे अमच्चरक्खस्स घरअणो त्ति)

चाण०—अथेदानीं क्व गतः ।

चन्द०—न जानामि । (ण जाणामि ।)

चाण०—(स्मितं कृत्वा ।) कथं न ज्ञायते नाम । भोः श्रेष्ठिन् शिरसि भयमतिदूरे तत्प्रतीकारः । अन्यच्च नन्दमिव विष्णुगुप्तः ।

[अलीकमसत्यम् । अनभिज्ञेन याथार्थ्यमजानता । प्रच्छादनं गुप्तिरपराधतामापद्यते । वाच्छलं न तु परमार्थतो विसंवादि । शिरसिभयं राजदण्डः समापन्न एव । तत्प्रतिविधानं राक्षसश्चन्द्रगुप्तं निपात्य मे रक्षणं करिष्यतीत्याशा

१ अणज्जेन (अनार्येण). २ दनमेव. ३ ननु परस्पर०, परस्परम् इति पाठः ४ जाणीमे. ५ फणी. ६ इत्यस्मात्परं-चन्द०—(स्वगतम् ।)

उपरि घनं घनरटितं दूरे दयिता किमेतदापतितम् ।
हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः ॥
उवरि घणं घणरडिअं दूरे दइदा किमेतदावडिअम् ।
हिमवदि दिव्वोसहिओ सीसे सप्पो समाविट्टो ॥

(इत्यर्धोक्ते लज्जां नाटयित्वा ।) चन्द्रगुप्तममात्यराक्षसः समुच्छेत्स्यतीति मामेवं मंस्थाः । पश्य ।

विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीर्वक्रनासादिभि-
र्नन्दे जीवति या तदा न गमिता स्थैर्यं चलन्ती मुहुः ।
तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत्
कश्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत्पृथक् ॥ २२ ॥

अपि च ।

आस्वादितद्विरदशोणितशोणशोभाम् (इति पूर्वोक्तं पठति ।)

चन्द०—फलेन संवादितमस्य विकत्थितम् । (स्वगतम् ।) (फलेण संवादिदं से विकत्थिदम् ।)

(नेपथ्ये कलकलः ।)

चाण०—शार्ङ्गरव ज्ञायतां किमेतत् ।

शिष्यः—तथा (इति निष्क्रम्य पुनः प्रविश्य ।) उपाध्याय एष राज्ञश्चन्द्रगुप्तस्याज्ञया राजापथ्यकारी क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वास्यते ।

चाण०—क्षपणकः अहह । अथवा अनुभव राजापथ्यकारित्वस्य फलम् । भोः श्रेष्ठिन् चन्दनदास एवमयमपथ्यकारिषु तीक्ष्णदण्डो राजा । तत्क्रियतां पथ्यं सुहृद्वचः । समर्प्यतां राक्षसगृहजनः । अनुभूयतां चिरं विचित्रो राजप्रसादः ।

सुरतां दूरापेता इत्यर्थः ।] उपरीति इयमार्या प्रक्षिप्ता । नन्द इति जातावेकवचनम् ।

[नयशालिभिः नीतिकुशलैरित्यर्थः । सुसचिवैः मन्त्रिश्रेष्ठैः ।] नवसु नन्देषु जीवत्सु व्यासज्य स्थितापि या मया चालिता सती स्थैर्यं न गमिता तां चन्द्रगुप्ते एकत्वमुपागत्य दृढतया स्थितामविद्यमानेषु नन्देषु कश्चालयेदिति भावः ॥ २२ ॥
[कः पृथक् कर्तुं व्यवस्येदपृथक्करणव्यवसाये सिद्धिभाग्भवेदित्यर्थः ।]

मुण्डी निष्परिग्रहस्तपस्वी निकारानर्ह इति कारुण्याविष्करणार्थोऽहहशब्दः । अथवेति राजापथ्यकारी यः कश्चिदपि निग्राह्य एवेति समाधानम् ।

---

१ श्रीव०. २ संपादिदं. ३ उत्सारणा क्रियते. ४ देवस्य. ५ कथं क्षपणकः । अहहकष्टम्, अथवानुभवतु. ६ अनुभूयन्तां विचित्रा राजप्रसादाः.

चन्द०—नास्ति मे गेहे अमात्यगृहजनः । (णत्थि मे गेहे अमच्चघरअणो ।)

(नेपथ्ये पुनः कलकलः ।)

चाण०—शार्ङ्गरव ज्ञायतां किमेतत् ।

शिष्य०—तथा (इति निष्क्रम्य पुनः प्रविश्य) उपाध्याय अयमपि राजापथ्यकार्येव कायस्थः शकटदासः शूलमारोपयितुं नीयते ।

चाण०—स्वकर्मफलमनुभवतु । भोः श्रेष्ठिन् एवमयं राजापथ्यकारिषु तीक्ष्णदण्डो राजा न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः । तद्रक्ष परकलत्रेणात्मनः कलत्रं जीवितं च ।

चन्द०—आर्य किं मे भयं दर्शयसि । सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि किं पुनरसन्तम् । (अज्ज किं मे भअं दावेसि । सन्तं वि गेहे अमच्चरक्खसस्स घरअणं ण समप्पेमि किं उण असन्तं ।)[1]

चाण०—चन्दनदास एष ते निश्चयः ।

चन्द०—बाढम् । एष मे निश्चयः । (वाढं । एसो[2] मे णिच्चओ ।)

चाण०—(स्वगतम् ।) साधु चन्दनदास साधु ।

सुलभेष्वर्थलाभेषु परसंवेदने जने[3] ।
क इदं दुष्करं कुर्यादिदानीं शिबिना विना ॥ २३ ॥

(प्रकाशम् ।) चन्दनदास एष ते निश्चयः ।

चन्द०—बाढम् । (वाढम्)

सुलभेष्विति । परस्य परकीयार्थस्य संवेदने समर्पणे कृते सति स्वस्यार्थलाभेषु सत्सु स्वार्थं तृणीकृत्य परसंरक्षणरूपमेवं दुष्करम् कर्म जने लोके एकेन शिविना विना त्वदन्यः कः कुर्यात् । शिबिरपि कृते पुरा कृतयुगे कृतवान् । त्वं तु इदानीं पापिनि कलौ करोषीति ततोप्यतिशयितसुचरितस्त्वमिति भावः । इदमपि पुष्पम् ॥ २३ ॥

---

१ अज्ज गेहे सन्तं समप्पेमि कुदो असन्तं समप्पआदि इति पाठः. २ स्थिरो, धीरो. ३ जनः ४ श्रेष्ठिन्

चाण०—(सक्रोधम् ।) दुरात्मन् दुष्टवणिक् अनुभूयतां तर्हि नरपतिक्रोधः ।

चन्द०—सज्जोस्मि । अनुतिष्ठतु आर्यः आत्मनोधिकारसदृशम् । (सज्जोह्मि । अणुचिट्ठदु अज्जो अत्तणो अहिआरसरिसं ।)

चाण०—शार्ङ्गरवोच्यतामस्मद्वचनात्कालशिको दण्डपाशिकश्च । शीघ्रमयं दुष्टवणिक् निगृह्यताम् । अथवा तिष्ठतु । उच्यतां दुर्गपालो विजयपालः गृहीतगृहसारमेनं सपुत्रकलत्रं संयम्य तावद्रक्ष यावन्मया वृषलाय कथ्यते । वृषल एवास्य प्राणहरं दण्डमाज्ञापयिष्यति ।

शिष्यः—यदाज्ञापयत्युपाध्यायः । श्रेष्ठिन् इत इतः ।

चन्द०—आर्य अयमागच्छामि । (स्वगतम् ।) दिष्ट्या मित्रकार्येण मे विनाशो न पुरुषदोषेण । (अज्ज अअमाअच्छामि । दिट्ठिआ मित्तकज्जेण मे विणासो ण पुरिसदोसेण ।)

(परिक्रम्य शिष्येण सह निष्क्रान्तः ।)

चाण०—(सहर्षम् ।) हन्त लब्ध इदानीं राक्षसः । कुतः ।

त्यजत्यप्रियवत्प्राणान्यथा तस्यायमापदि ।
तथैवास्यापदि प्राणा नूनं तस्यापि न प्रियाः ॥ २४ ॥

(नेपथ्ये कलकलः ।)

चाण०—शार्ङ्गरव शार्ङ्गरव ।

वृषल एवेति । इदं छद्मना हितागमननिरोधनं निरोधः । छद्मना कपटेन हितागमनाय स्वेष्टसिद्धये चन्दनदासनिरोधात् । यद्वा हितं राक्षसमागमयतीति हितागमः हितागमनस्य हितराक्षसागमनहेतुभूतस्य चन्दनदासस्य निरोधात् ।

[पुरुषदोषान्मानुषतासुलभापराधात् । त्यजतीति । तस्य राक्षसस्यापदि तत्पुत्रकलत्रादीनां समर्पण उत्पस्यमानायामापदि तन्निवारणार्थमित्यर्थः । अप्रियवदनिष्टवस्तुत्यागवत् । तथा अस्यापदि प्राणहानिरूपायामुत्पस्यमानायां तद्वारणाय ।]

---

१ ०त्मन् तिष्ठ २ नरपतेः-राज-कोपः. ३ बाहू प्रसार्य. ४ अणुरूअं. ५ सक्रोधं खड्गमाकृष्य दुरात्मन् दुष्ट इत्यधिकम्. ६ उच्यतामस्मद्वचनात् दुर्गपालको विजयपालकः; पालश्च. ६ प्राणहरणं, सर्वस्वहरं. ७ जणिदो इत्यधिकम्. ८ ध्रुवम् इति पाठः.

(प्रविश्य ।)

शिष्यः—उपाध्याय आज्ञापय ।

चाण०—किमेष कलकलः[1] ।

शिष्यः—(निष्क्रम्य विभाव्य पुनः प्रविश्य ।) उपाध्याय एष खलु शकटदासं वध्यमानं वध्यभूमे[2]रादाय समपक्रान्तः सिद्धार्थकः ।

चाण०—(स्वगतम् ।) साधु सिद्धार्थक कृतः कार्यारम्भैः[3] । (प्रकाशम् ।) प्रसह्य किमपक्रान्तः । (सक्रोधम्[4] ।) वत्स उच्यतां भागुरायणो यथा त्वरितं संभावयेति ।

(निष्क्रम्य प्रविश्य च ।)

शिष्यः—(सविषादम् ।) उपाध्याय हा धिक् कष्टमपक्रान्तो भागुरायणोपि ।

चाण०—(स्वगतम् ।) व्रजतु कार्यसिद्धये । (प्रकाशम् । सक्रोधमिव ।) वत्स उच्यन्तामस्मद्वचनाद्भद्रभटपुरुषदत्तडिङ्गरातबलगुप्तराजसेनरोहिताक्षविजयवर्माणः शीघ्रमनुसृत्य गृह्यतां दुरात्मा भागुरायण इति ।

शिष्यः—तथा (इति निष्क्रम्य पुनः प्रविश्य सविषादम् ।) हा धिक् कष्टं सर्वमेव तन्त्रमाकुलीभूतम् । तेपि खलुभद्रभटप्रभृतयः प्रथमतरमुषस्येवो[5]पक्रान्ताः ।

चाण०—(स्वगतम् ।) सर्वेषा[6]मेव शिवाः पन्थानः सन्तु । (प्रकाशम् ।) वत्सालं विषादेन । पश्य ।

कृतः कार्यारम्भ इति । अयमपि बिन्दुः । त्वरितं सम्भावयेति निगृह्य समाधाय वा सिद्धार्थकमानयेति बाह्योर्थः । त्वमपि तेन सह गत्वा कार्यं साधयेति आन्तरो गूढार्थः ।

[अपक्रान्तो गूढं पलायितः । तन्त्रं प्रकृतिमण्डलमाकुलीभूतं व्यत्यस्तम् । अनिष्टं सर्वतः प्रसक्तमित्यर्थः ।]

---

१ ज्ञायतां किमेतत्. २ वध्यस्थानात्. ३ त्वयेत्यधिकम्. ४ सक्रोधमिव. ५ अप्रभातायमिव रजन्याम्. ६ सर्वथा.

ये याताः किमपि प्रधार्य हृदये पूर्वं गता एव ते
ये तिष्ठन्ति भवन्तु तेपि गमने कामं प्रकामोद्यमाः।
एका केवलमेव साधनविधौ सेनाशतेभ्योऽधिका
नन्दोन्मूलनदृष्टवीर्यमहिमा बुद्धिस्तु मा गान्मम ॥ २५ ॥

(उत्थायं) एष दुरात्मनो भद्रभटप्रभृतीनाहरामि । (प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा । आत्मगतम् ।) दुरात्मन् राक्षस क्वेदानीं गमिष्यसि । एषोऽहमचिराद्भवन्तम् ।

स्वच्छन्दमेकचरमुज्ज्वलदानशक्ति-
मुत्सेकिना मदबलेन विगाहमानम् ।
बुद्ध्या निगृह्य वृषलस्य कृते क्रियाया-
मारण्यकं गजमिव प्रगुणी करोमि ॥ २६ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति मुद्रालाभो नाम प्रथमोऽङ्कः ।

ये इति । किमपि प्रधार्य हृदये अस्मद्विरोधं मनसि कृत्वेति वहिः । अस्मत्कार्यमेव साधयितुमिति गूढम् । सर्वा अपि प्रकृतयः सुखेन यान्तु न हि तदवलम्बेनाहं कार्यं साधये बुद्धिबलेनैव सर्वं साधयामीत्यर्थः । अयं चतुर्वर्णनिवर्णनं वर्णसंहारः । ब्राह्मणादिचतुर्वर्णान्तःपातिनीनां प्रकृतीनां ये याता इत्यादिना निर्वर्णनान्निर्देशात् त्रयोदशमङ्गम् । तृतीयाङ्के वक्ष्यमाणं तेषामुदन्तमानेष्यामीति गूढाशयः ॥ २५ ॥

स्वच्छन्दमिति । स्वच्छन्दं निरङ्कुशं स्वपक्षमनाश्रित्य विजातीयं परपक्षं कथमाश्रितोसीति तव कोपि नियन्ता नास्तीत्यर्थः । एकचरमिति । वयमत्र नन्दवंशसंबन्धिनः सर्वे स्वजना वर्तामहे तान्विहाय तत्रैकश्चरसीति भावः । उज्ज्वलदानशक्ति परकृत्योपजापार्थं महता कोशसञ्चयेन स्थापितः शकटदास इति वक्ष्यमाणबहुव्ययकारिणम् उत्सेको दुरभिमानः । अरातिहस्तगतो विनश्येन्न तु चन्द्रगुप्तेन सन्दधीतेति षष्ठाङ्के वक्ष्यमाणदुरभिमानवता मदबलेन विगाहमानमस्मदपकाराय चेष्टमानं त्वामारण्यकं गजमिव प्रगुणीकरोमि । यथा आरण्यको दुष्टगजः शनैर्गर्तपातदृढरज्जुबन्धनादिनोपायेन संवाहना-

---

१ सका०. २ नन्दोत्पाटन. ३ उत्थाय प्रत्यक्षवदाका०. ४ उत्सेकिनम्. ५ बलमदेन. ६ विगाह्यमानम्. ७ ०प्रवणं, ०णीकरोमि. ८ इति मुद्राराक्षसे प्रथमोऽङ्कः.

दिक्रियायां प्रगुणीक्रियत एवं त्वामतिसङ्कटे पातयित्वागतिकतया यथा स्वयमेव प्रवणो भवसि तथा क्रियायां वृषलसाचिव्यक्रियायां वशीकरोमीत्यर्थः । एष यत्नः । 'प्रयत्नस्तु तदप्राप्तौ व्यापारोतित्वरान्वित' इति लक्षणात् । इत्थं यत्न-बिन्दुसंबन्धरूपप्रतिमुखसन्धिः । बिन्दुप्रयत्नानुगुण्येनास्य सन्धेः त्रयोदशान्य-प्यङ्गानि च यथामति योजितानीति सूक्ष्मदृष्टिभिरवधार्य सन्तोष्टव्यम् ॥ २६ ॥

प्रथमोऽङ्क इति । अङ्कलक्षणं निरूपितं दशरूपके—'प्रत्यक्षनेतृचरितो बीजव्य-क्तिपुरस्कृतः । अङ्को नानाप्रकारार्थः संविधानरसाश्रयः' ॥ इति ॥

कर्तैतन्नाटकस्याद्भुतरसविलसत्संविधानप्रवीणः
क्लेशं चाणक्यनीतौ बहुविधमतनोल्लक्षणाद्यैर्वचोभिः ।
तत्तल्लक्ष्ये तदङ्गानुसरणविषयक्लेशमस्मद्विधानां
राजश्रीत्र्यम्बकार्योनुमतिसुविहितं वीक्ष्य तुष्यन्तु सन्तः ॥ १ ॥

इति त्र्यम्बकयज्वप्रभुवर्याश्रित ढुण्ढिराजव्यासयज्वविरचिते
मुद्राराक्षसनाटकव्याख्याने प्रथमोऽङ्कः समाप्तः ॥

द्वितीयोऽङ्कः ।

(ततः प्रविशत्याहितुण्डिकः ।)

आहितुदण्डिकः—

जानन्ति तन्त्रयुक्तिं यथास्थितं मण्डलमभिलिखन्ति ।
ये मन्त्ररक्षणपरास्ते सर्पनराधिप उपचरन्ति ॥ १ ॥

जाणन्ति तन्तजुत्तिं जहट्ठिअं मण्डलं अहिलिहन्ति ।
जे मन्तरक्खणपरा ते सप्पणराहिवे उवअरन्ति ॥

(आकाशे ।) आर्य किं त्वं भणसि कस्त्वमिति । आर्य अहं खलु आहितुण्डिको जीर्णविषो नाम । किं भणासि अहमपि अहिना खेलितुमिच्छामीति । (अज्ज किं तुमं भणासि को तुमं त्ति । अज्ज अहं खु आहितुण्डिओ जिण्णविसो णाम । किं भणासि । अहं वि अहिणा खेलिदुं इच्छामि त्ति ।)

अथ राक्षसकृतोपायवृत्तान्तकथनाय प्राप्त्याशापताकासंबन्धरूपो गर्भसन्धिर्द्वितीयेनाङ्केनारभ्यते । 'गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ।' इति लक्षणात् । पूर्वाङ्के दृष्टस्यात्र राक्षसाहितुण्डिकसंवादरूपया व्यापिन्या कथया पताकाख्यया नष्टस्यादृष्टस्य चाणक्यनीतिरूपस्य बीजस्याग्रे मुहुरन्वेषणात् । पताकाप्राप्त्याशानुगुण्येन गर्भसन्धेरङ्गानि । 'अभूताहरणं मार्गो रूपोदाहरणे क्रमः । संग्रहश्चानुमानं च तोटकाधिबले तथा ॥ उद्वेगसंभ्रमाक्षेपा द्वादशाङ्गानुन्यक्रमात् ॥' तत्राहितुण्डिकच्छद्मधारिणो विराधगुप्तस्य सर्वं प्राकृतं वचनं प्रस्तुतोपयोगिच्छद्माचरणमभूताहरणम् । प्रस्तुतस्य राक्षसं प्रति कुसुमपुरवृत्तान्तकथनस्योपयोगे छद्माचरणात् ।

जानन्तीति । तन्त्रं स्वराष्ट्रचिन्तायां शास्त्रौषधमखेष्वपीति वैजयन्ती । तन्त्रे स्वराष्ट्रचिन्तायां विषौषधविशेषे च युक्तिं यथावज्जानन्ति । मण्डलं [सप्तप्रकृतिकं] राष्ट्रं [द्वादशविधर जमण्डलं वा] माहेन्द्रादिदेवतायन्त्रं चाभिलषन्ति चिन्तयन्ति रेखाकारेण लिखन्ति च । [सर्प एव नराधिपः । पक्षे सर्प इव नराधिपः ।] तन्त्रमन्त्रादिष्वत्यन्तमवहितात्मना सर्पनराधिपोपचरणं कर्तव्यमितिमीत्यर्थः ॥ १ ॥

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषणम् । 'अप्रविष्टैः सहालापो भवेदाकाशभाषणम् ।' तदाह आकाश इति ।

अथ कतरां पुनरार्यो वृत्तिमुपजीवति। किं भणसि राजकुलसेवक इति। ननु खेलति एव आर्योहिना। कथमिव। अमन्त्रौषधिकुशलो व्यालग्राही प्रमत्तो मतङ्गजारोही लब्धाधिकारो जितकाशी राजसेवक इत्येते त्रयोप्यवश्यं विनाशमनुभवन्ति। कथं दृष्टमात्रोतिक्रान्त एषः। (पुनराकाशे।) आर्य किं त्वं भणसि किमेतेषु पेटकसमुद्गकेष्विति। आर्य जीविकायाः संपादकाः सर्पाः। किं भणसि प्रेक्षितुमिच्छामीति। प्रसीदत्वार्यः अस्थानं खलु एतत्। तद्यदि कौतूहलं एहि एतस्मिन्नावासे दर्शयामि। किं भणसि इदं खलु भर्तुरमात्यराक्षसस्य गृहं नास्त्यस्मादृशानामिह प्रवेश इति। तेन हि गच्छत्वार्यः[1]। मम पुनर्जीविकायाः प्रसादेन अस्तीह प्रवेशः। कथमेषोपि अतिक्रान्तः। (अह कदरं उण अज्जो वित्तिं उवजविदि। किं भणासि राअउलसेवकोह्मि त्ति। णं खेलदि एव्व अज्जो अहिणा। कहं विअ। अमन्तोसहिकुसलो वालग्गाही पमत्तो मतङ्गआरोही लद्धाहिआरो जिदकासी राअसेवओ त्ति एदे तिण्णि वि अवस्सं विणासमणुहोन्ति। कहं दिट्ठमेत्तो अदिक्कन्तो एसो। अज्ज किं तुमं भणासि किं एदेसु पेडालससुग्गएसु त्ति। अज्ज जीविआए संपादआ सप्पा। किं भणासि पेक्खिदुमिच्छामित्ति। पसीददु अज्जो। अट्ठाणं खु एदं। ता जइ कोदूहलं एहि एदस्सिं आवासे दंसेमि। किं भणासि एदं खु भट्टिणो अमच्चरक्खसस्स गेहं णत्थि अह्मारिसाणं इह पवेसो त्ति। तेण हि गच्छदु अज्जो। मम उण जीविआए पसादेण अत्थि एत्थ पवेसो। कधं एसोवि अतिक्कन्तो।)

(स्वगतम्। संस्कृतमाश्रित्य।) अहो आश्चर्यम्। चाणक्यमतिपरिगृहीतं

[**नन्विति**। राजसेवाया दुष्करत्वात्क्वापि स्खलने प्राणनाशस्यापि प्रसङ्गादहिना खेलत्येवार्य इत्युक्तम्। एतदेव विशदीकरोति अमन्त्रौषधीत्यादिना। व्यालः सर्पः। जितकाशी अवलिप्तोनात्मज्ञ इत्यर्थः। पेटकानां समुद्गकाः संपुटकाश्चास्तेषु पेटकान्तरेषु इत्यर्थः। यद्वा पेटकाश्चसमुद्गकाः संपुटकाश्च तेषु।] **संस्कृतमाश्रित्येति**। वस्तुतः स्वस्योत्तमत्वात्स्वगतं संस्कृतवचनम्।

१ मत्तमतंङ्गा., अग्गिहदकुसो; मत्तगअवरारोही इति पाठः २ अप्पजी (आत्मजी).
३ दिशोवलोक्य संस्कृतमाश्रित्य स्वगतम् इति पाठः

चन्द्रगुप्तमवलोक्य विफलमिव राक्षसप्रयत्नमवगच्छामि । राक्षसमतिपरिगृहीतं मलयकेतुमवलोक्य चलितमिवाधिराज्याच्चन्द्रगुप्तमवगच्छामि । कुतः ।

कौटिल्यधीरज्जुनिबद्धमूर्तिं
मन्ये स्थिरां मौर्यनृपस्य लक्ष्मीम् ।
उपायहस्तैरपि[2] राक्षसेन
निकृष्यमाणामिव लक्षयामि ॥ २ ॥

तदेवमनयोः बुद्धिशालिनोः सुसचिवयोर्विरोधे संशयितेव नन्दकुल[3]लक्ष्मीः ।

विरुद्धयोर्भृशमिह मन्त्रिमुख्ययो-
र्महावने वनगजयोरिवान्तरे ।
अनिश्चयाद्गजवशयेव भीतया
गतागतैर्ध्रुव[4]मिह खिद्यते श्रिया ॥ ३ ॥

तद्यावदमात्यराक्षसं पश्यामि । (इति परिक्रम्य स्थितः ।)

(ततः प्रविशत्यासनस्थः स्वभवनगतः पुरुषेणानुगम्यमानः सचिन्तो राक्षसः ।)

राक्ष०—(सबाष्पम् ।) कष्टं भोः कष्टम् ।

[कौटिल्यस्य धीरेव रज्जुस्तया निबद्धाद्दृढं बद्धा मूर्तिर्यस्यास्तादृशीम् ।] कौटिल्यधीरज्जुनिबद्धमूर्त्तिमित्यत्र रूपकानुप्राणिता उत्प्रेक्षा ॥ २ ॥

अनिश्चयादिति । अनिश्चयादन्यतरविजयानिर्धारणात् । अत्रोपमानुप्राणितोत्प्रेक्षा । इयं प्राप्त्याशा । उपायापायशङ्काभ्यां प्राप्त्याशा कार्यसंभव इति लक्षणात् । कौटिल्यधीरज्जुनिबद्धेति उपायशङ्का राक्षसेन निकृष्यमाणा इति अपायशङ्का ताभ्यां कार्यस्य मौर्यश्रीस्थैर्यस्य संभवः कादाचित्कत्वेन संभावना । विराधराक्षसयोर्महती संवादकथा पताका । प्रतिपाद्यकथाङ्गं स्यात्पताका व्यापिनी कथेति लक्षणात् । अनयोः संबन्धादयं गर्भसन्धिः ॥ ३ ॥

तद्यावदिति । इदमङ्कास्यम् । अङ्कान्तपात्रैरङ्कास्यमुत्तराङ्कार्थसूचनेति लक्षणात् । पूर्वाङ्कान्ते चाणक्येन मदबलेन विगाहमानमिति राक्षसकृतस्य विगाहनस्य नीतिप्रयोगस्यास्मिन्नङ्के वक्ष्यमाणस्य सूचनात् । यद्वा अङ्कावतरणम् । 'यत्र स्यादुत्तराङ्कार्थः पूर्वाङ्कार्थानुसङ्गतः । असूचिताङ्गपात्रं तदङ्कावतरणं मतम् ।' इति लक्षणात् । अत्र वक्ष्यमाणस्य क्षपणकशकटदासादिनिग्रहस्य पूर्वाङ्कार्थानुसङ्गतत्वादाहितुण्डिकप्रवेशस्यासूचनाच्च ।

---

१ कुलस्य. २ इह. ३ लक्ष्यते इत्यधिकम्. ४ भृशम्. ५ द्वारि स्थित इति पाठः.
६ ऊर्ध्वमवलोक्य इत्यधिकम्.

वृष्णीनामिव नीतिविक्रमगुणव्यापारशान्तद्विषां
नन्दानां विपुले कुलेऽकरुणया नीते नियत्या क्षयम् ।
चिन्तावेशसमाकुलेन मनसा रात्रिंदिवं जाग्रतः
सैवेयं मम चित्रकर्मरचना भित्तिं विना वर्तते ॥ ४ ॥

अथवा ।

नेदं विस्मृतभक्तिना न विषयव्यासङ्गरूढात्मना
प्राणप्रच्युतिभीरुणा न च मया नात्मप्रतिष्ठार्थिना ।
अत्यर्थं परदास्यमेत्य निपुणं नीतौ मनो दीयते
देवः स्वर्गगतोपि शात्रववधेनाराधितः स्यादिति ॥ ५ ॥

(आकाशमवलोकयन् सास्रम् ।) भगवति कमलालये भृशमगुणज्ञासि कुतः ।

आनन्दहेतुमपि देवमपास्य नन्दं
सैक्तासि किं कथय वैरिणि मौर्यपुत्रे ।
दानाम्बुराजिरिव गन्धगजस्य नाशे
तत्रैव किं न चपले प्रलयं गतासि ॥ ६ ॥

अपि च अनभिजाते ।

पृथिव्यां किं दग्धाः प्रथितकुलजा भूमिपतयः
पतिं पापे मौर्यं यदसि कुलहीनं वृतवती ।

वृष्णीनामिति । नीतिविक्रमरूपौ गुणौ तयोर्व्यापारेण प्रयोगेण शान्ता गमिताः । ण्यर्थोन्तर्भावितः । द्विषो वैरिरिति बहुव्रीहिः । अकरुणया नियत्या दैवेन । सैवेयं नन्देषु जीवत्सु यादृशी तादृश्येव चित्रकर्मरचना विचित्रपौरुषव्यापारः भित्तिमाश्रयं विना वर्तते । स्वामिनो विनैव मुधा व्याप्रिय इति खेदः ॥ ४ ॥

नेदमिति । विषयव्यासङ्गो विषयोपभोगप्रवणता । [तत्ररूढो बद्ध आत्मा मनो यस्य । नीतौ सामादिप्रयोगे । किंतु परदास्यमप्येत्य] स्वर्गगतस्वाम्याराधनेच्छया नीतौ मनो दीयते न पूर्वोक्तहेतुभिरित्यर्थः । इदं तत्त्वानुकीर्तनं मार्गः ॥ ५ ॥

आनन्दहेतुमिति । स्पष्टम् [गन्धप्रधानो गजो गन्धगजस्तस्य नाशे तस्य मदजलधारेव । प्रलयं गतासि अत्यन्तानुचिताचरणान्मरणमपि श्रेय इति भावः ॥ ६ ॥

दुःखावेशेन अनभिजाते इत्यादि गालनम् । अभिजाताः कुलीनाः ।

पृथिव्यामिति । [प्रथितं विख्यातं कुलं तत्र जायन्ते इति । यद्यस्मात्कारणात् । पापे असत्कुलजातत्वात्पापाचरणप्रवृत्ते ।] पुरन्ध्रीणामित्यर्थान्तरन्या-

---

१ व्यापार०; रूढ, मूढ. २ ०श्वेच्छुना ३ रक्तासि. ४ दुःकुलमौ०. ५ पापं. ६ क्रन.

प्रकृत्यां वा काशप्रभवकुसुमप्रान्तचपला
पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ॥ ७ ॥

अयि अविनीते तदहमाश्रयोन्मूलनेनैव त्वामकामां करोमि । (विचिन्त्य ।) मया तावत्सुहृत्तमस्य चन्दनदासस्य गृहे गृहजनं निक्षिप्य नगरान्निर्गच्छता न्याय्यमनुष्ठितम् । कुतः । कुसुमपुराभियोगं प्रति अनुदासीनो राक्षस इति तत्रस्थानामस्माभिः सहैककार्याणां देवपादोपजीविनां नोद्यमः शिथिलीभविष्यति । चन्द्रगुप्तशरीरमभिद्रोग्धुमस्मत्प्रयुक्तानां तीक्ष्णरसदायिनामुपसंग्रहार्थं परकृत्योपजापार्थं च महता कोशसञ्चयेन स्थापितः शकटदासः । प्रतिक्षणमरातिवृत्तान्तोपलब्धये तत्संहतिभेदनाय च व्यापारिताः सुहृदो जीवसिद्धिप्रभृतयः । तत्किमत्र बहुना ।

इष्टात्मजः सपदि सान्वय एव देवः
शार्दूलपोतमिव यं परिपोष्य नष्टः ।
तस्यैव बुद्धिविशिखेन भिनद्मि मर्म
वर्मीभवेद्यदि न दैवमदृश्यरूपम् ॥ ८ ॥

सोलङ्कारः । 'उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः' इति । भगवति कमलालय इत्यादि राक्षसस्य वितर्कप्रतिपादनं वाक्यरूपं नामाङ्गम् ॥ ७ ॥

विचिन्त्येति । आश्रयोन्मूलनहेतुमुपायं विचिन्त्य तमेव प्रपञ्चयति । मया तावदित्यादिना । [न्यायादनपेतं न्याय्यमुचितम् । अभियोगोभियानम् ।]

चन्द्रगुप्तेत्यादि । तत्संहतयो भद्रभटादयः जीवसिद्धिना भेदिता इत्यस्य भ्रमः । इदं प्रकृतोत्कर्षाभिधानमुदाहरणं राक्षसेन प्रकृतकार्यस्योत्कर्षाभिधानात् ।

इष्टात्मज इति । इष्टा आत्मजा यस्येति हेतुगर्भविशेषणम् । निकृष्टक्षेत्रजातमपि यं मौर्यं इष्टात्मजत्वात्प्रियापत्यत्वादुत्तमक्षेत्रजापत्यवत् परिपोष्य नष्टः । स्वपोषकघातकत्वेन शार्दूलपोतदृष्टान्तः । तस्यैव मौर्यस्य मर्म बुद्धिविशिखेन भिनद्मि भेत्स्यामि यदि दैवं न वर्मीभवेत् । वर्मरूपं रक्षकं न भवेद्यदि तदा भिनद्मीत्यन्वयः । अदृश्येति । दैवं दृश्यं चेत्तदपि प्रतिकर्तुं शक्नुयामिति भावः । अत्र मया तावदित्यारभ्यादृश्यरूपमित्यन्तेन राक्षसस्योपायापायशङ्के ॥ ८ ॥

---

१ प्रकृत्यैवाकाश. २ किंकारणमिति. ३ उदासीनः. ४ कृत्योपक्षेपसंग्रहार्थम ५ अदृष्ट०, अमृश्यमानम् इति पाठः.

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी—

कामं नन्दमिव प्रमथ्य जरया चाणक्यनीत्या यथा
धर्मो मौर्य इव क्रमेण नगरे नीतः प्रतिष्ठां मयि ।
तं संप्रत्युपचीयमानमनु मे लब्धान्तरः सेवया
लोभो राक्षसवज्जयाय यतते जेतुं न शक्नोति च ॥ ९ ॥

(परिक्रम्योपसृत्य च ।) इदममात्यराक्षसस्य गृहम् । प्रविशामि । (प्रविश्यावलोक्य च ।) स्वस्ति भवते ।

राक्ष०—आर्य अभिवादये । प्रियंवदक आसनमानीयताम् ।

पुरु०—इदमासनमुपविशतु आर्यः । (एदं आसणं । उपविसदु अज्जो ।)

कञ्चु०—(उपविश्य ।) कुमारो मलयकेतुरमात्यं विज्ञापयति । चिरात्प्रभृत्यार्यः परित्यक्तोचितशरीरसंस्कार इति पीड्यते मे हृदयम् । यद्यपि सहसा स्वामिगुणा न शक्यन्ते विस्मर्तुं तथापि मद्विज्ञापनां मानयितुमर्हत्यार्यः । (इत्याभरणानि प्रदर्श्य ।) इमान्याभरणानि कुमारेण स्वशरीरादवतार्य प्रेषितानि धारयितुमर्हत्यार्यः ।

कामं नन्दमिति । यथा चाणक्यनीत्या नन्दं प्रमथ्य कुसुमपुरे मौर्यः प्रतिष्ठापितः तद्वज्जरसा कामं विषयाभिलाषमुपमर्द्य मयि धर्मः प्रतिष्ठापितः । वार्द्धके विषयवैराग्ये कामं विहाय धर्ममेव सेवितुमुत्सहे इति भावः । संप्रति मलयकेतुसेवया लब्धान्तरः लब्धावसरः राक्षसः यथा तमुपचीयमानं वर्द्धिष्णु मौर्यमनुलक्ष्यीकृत्य जयाय मौर्यजयायेत्यर्थः । लक्षणेत्थंभूतेति कर्मप्रवचनीयेनानुना योगे द्वितीया । यतते जेतुं च न शक्नोति न शक्ष्यति चाणक्यनीतेः प्रबलत्वात् । एवं सेवया कुलाचारादावश्यकत्वेन गले पतितया राजकुलसेवया लब्धावसरः मे मम लोभः सेवाविषयोभिलाषः वार्द्धकोचितस्य धर्मस्य जयाय यतते जेतुं न शक्नोति च । कुलाचारतया यथाशक्ति राजकुलं सेवमानोपि वार्द्धकोचितं शमदमादिकं धर्मं नोपेक्षे इति भावः । उपचीयमानमपीति पाठे उपचीयमानं जेतुं यतते जयाय न शक्नोतीति व्यवहितान्वयः क्लिष्टः । अनेन कञ्चुकिनिर्वेदेन राक्षसोयमस्य चाणक्यनीत्या भावी उपमर्दः सूचितः ॥ ९ ॥

---

१ प्रसह्य. २ अपि. ३ नाट्येन परिक्रम्य. ४ दृष्ट्वा । अयममात्यराक्षसः । परिक्रम्योपसृत्य च. ५ आसनमत्रभवतः. ६ अस्मात्प्राक्--नाट्येन इति. ७ अमात्य कु०. ८ इदमाभ.

राक्ष०—आर्य जाजले विज्ञाप्यतामस्मद्वचनात्कुमारः । विस्मृता[1] एव भवद्गुणपक्षपातेन स्वामिगुणाः । किंतु ।

न तावन्निर्वीर्यैः परपरिभवाक्रान्तिकृपणै-
र्वहास्यङ्गैरेभिः प्रतनुमपि संस्काररचनाम् ।
न यावन्निःशेषक्षपितरिपुचक्रस्य निहितं
सुगाङ्गे हेमाङ्कं नृवर तव सिंहासनमिदम् ॥ १० ॥

कञ्चु०—अमात्ये नेतरि सुलभमेतत्कुमारस्य । तत्प्रतिमान्यता कुमारस्य प्रथमः प्रणयः ।

राक्ष०—आर्य कुमार इवानतिक्रमणीयवचनो भवानपि । तदनुष्ठी-[2]यतां कुमारस्याज्ञा ।

कञ्चु०—(नाट्येन भूषणानि परिधाप्य ।) स्वस्ति भवते साधयाम्यहम्[3] ।

राक्ष०—आर्य अभिवादये ।

कञ्चुकी०—(निष्क्रान्तः ।)

राक्ष०—प्रियंवदक ज्ञायतां कोस्मद्दर्शनार्थी द्वारि तिष्ठतीति ।

[भवद्गुणपक्षपातेन भवद्गुणानुरागेण । न तावदिति । निर्वीर्यैः तेजोहीनैः ।] सुगाङ्गेति । सुगाङ्गनामकप्रासादे परपरिभवकर्तृकाक्रान्तिराक्रमणं तेन कृपणैर्दीनैरित्यर्थः । [प्रतनुमत्यल्पामपि संस्काररचनां देहमार्जनालङ्कारधारणादिरूपाम् । निःशेषं यथा तथा क्षपितं क्षयं प्रापितं रिपुचक्रं यस्य । तस्य तव सिंहासनं यावन्नस्थापितं तावदित्यन्वयः । नेतरि कार्यधुरन्धरे सतीत्यर्थः । अनतिक्रमणीयमलङ्घ्यं वचनं यस्य ।] इदमितिबुद्धिस्थपरामर्शः ॥ १० ॥

साधयामीति । प्रायेण ण्यन्तकः साधिर्गमेरर्थे प्रयुज्यते ।

निष्क्रान्त इति । इदं प्रस्तुतोपयोगि समाधानवचनं संग्रहः । प्रस्तुतस्य राक्षसस्योत्साहस्योपयोगित्वात् । यद्वा प्रस्तुतस्य चाणक्योपायरूपस्य बीजस्योपयोगि इदं भूषणदानं समाधानवचनम् । अनुपदमेव राक्षसेन सिद्धार्थकाय पारितोषिकतया दास्यमानानामेषामेव भूषणानां निर्वहणे कूटलेखे उपयोक्ष्यमाणत्वात् ।

---

१ विस्मृता मया स्वामिगुणास्तव पक्षपातिना इति पाठः. २ अनुष्ठीयते. ३ स्वनियोग साधयाम्यहमिति सञ्चुकी निष्क्रान्तः ।

पुरु०—यदमात्य आज्ञापयति । (इति परिक्रम्य आहितुण्डिकं दृष्ट्वा ।) आर्य कस्त्वम् । (जं अमच्चो आणवेदि । अज्ज को तुमं ।)

आहि०—भद्र अहं खल्वाहितुण्डिको जीर्णविषो नाम । इच्छाम्यमात्यस्य पुरतः सर्पैः खेलितुम् । (भद्द अहं खु आहितुण्डिओ जिण्णविसो णाम । इच्छामि अमच्चस्स पुरदो सप्पेहिं खेलिदुं ।)

पुरु०—तिष्ठ यावदमात्याय निवेदयामि । (राक्षसमुपसृत्य ।) अमात्य एष खलु सर्पोपजीवी इच्छति सर्पं दर्शयितुम् । (चिट्ठ जाव अमच्चस्स णिवेदेमि । अमच्च एसो खु सप्पोपजीवी इच्छदि सप्पं दंसेदुं ।)

राक्ष०—(वामाक्षिस्पन्दनं सूचयित्वा आत्मगतम् ।) कथं प्रथममेव सर्पदर्शनम् । (प्रकाशम् ।) प्रियंवदक न नः कौतूहलं सर्पदर्शने तत्परितोष्य विसर्जयैनम् ।

प्रियं०—तथा[3] (इत्याहितुण्डिकमुपसृत्य ।) आर्य एष खलु ते दर्शनकार्येणामात्यः प्रसादं करोति । न पुनः सर्पदर्शनेन । (अज्ज एसो खु दे दंसणकज्जेण अमच्चो पसादं करेदि । ण उण सप्पदंसणेण ।)

आहि०—भद्रमुख विज्ञापयामात्यं न केवलमहं सर्पोपजीवी प्राकृतकविः खल्वहम् । तस्माद्यदि मे दर्शनेनामात्यः प्रसादं न करोति तदा एतत्पत्रकं वाचयितुं प्रसीदत्विति । (भद्दमुह विण्णवेहि अमच्चं ण केवलं अहं सप्पोपजीवी पाउडकवी क्खु अहं । तां जइ मे दंसणेण अमच्चो पसादं ण करेदि ता एदं पत्तअं वाचेदुं पसीदद् त्ति ।)

प्रियं०—(पत्रं गृहीत्वा राक्षसमुपसृत्य ।) आर्य एष खल्वमात्यं विज्ञापयति न केवलमहं सर्पोपजीवी प्राकृतकविः खल्वहम् । तस्माद्यदि

[जीर्णविषः जीर्णं निराबाधं कृतं विषं येन । वामाक्षिस्पन्दनं पुरुषाणां तस्यानिष्टत्वात् ।] कथं प्रथममेव सर्पदर्शनमिति शङ्कारूपः संभ्रमः । [दर्शनकार्येण दर्शनस्य सर्पदर्शनस्य यत्कार्यं पारितोषिकलाभादि तेन तद्दत्वेत्यर्थः । प्राकृतकविः प्राकृते प्राकृतो वा कविः । प्रकृतिभ्यो यल्लब्धं तत्र कविः पण्डितः । कुसुमपुरवासिजनकृत्यज्ञ इति च ध्वनिः ।]

१ सप्पेहिं अमच्चस्स पुरदो खेलितुम्. २ सर्पेषु. ३ जं अज्जो-अमच्चो आणवेदि त्ति निष्क्रम्य. ४ अमच्चो अदंसणेण फलं देदि न उण दंसणेण. ५ वाचेदु त्ति.

मे अमात्यो दर्शनेन प्रसादं न करोति तदा एतदपि तावत्पत्रकं वाचयत्विति । (अज्ज एसो खु अमच्चं विण्णवेदि ण केवलं अहं सप्पोपजीवी पाउडकवी खु अहं । ता जइ मे अमच्चो दंसणेण पसादं ण करेदि तदो एदं वि दाव पत्तअं वाचेदुं पसीददु त्ति ।

राक्ष०—(पत्रं गृहीत्वा वाचयति ।)

पीत्वा निरवशेषं कुसुमरसमात्मनः कुशलतया ।
यदुद्गिरति भ्रमरः अन्येषां करोति तत्कार्यम् ॥ ११ ॥

पाऊण निरवसेसं कुसुमरसं अत्तणो कुसलदाए ।
जं उग्गिरेइ भमरो अण्णाणं कुणइ तं कज्जं ॥

(विचिन्त्य स्वगतम् ।) अये कुसुमपुरवृत्तान्तज्ञो भवत्प्रणिधिरिति गाथार्थः । कार्यव्यग्रत्वान्मनसः प्रभूतत्वाच्च प्रणिधीनां विस्मृतम् । इदानीं स्मृतिरुपलब्धा । व्यक्तमाहितुण्डिकच्छद्मनो विराधगुप्तेनानेन भवितव्यम् । (प्रकाशम् ।) प्रियंवदक प्रवेशयैनं सुकविरेष श्रोतव्यमस्मात्सुभाषितम् ।

प्रियं०—(तथेति आहितुण्डिकमुपसृत्य ।) उपसर्पतु आर्यः । (उपसप्पदु अज्जो ।)

आहि०—(नाट्येनोपसृत्य विलोक्य च स्वगतम् । संस्कृतमाश्रित्य ।) अयममात्यराक्षसः । स एषः ।

[पीत्वेति । आत्मनः कुशलतया नैपुण्येन समग्रं कुसुमरसं कुसुमपुरवृत्तान्तं पीत्वा सम्यग्ज्ञात्वा भ्रमरः भ्रमणशीलः स्पशः यदुद्गिरति कथयति तदन्येषां तज्जिज्ञासूनां स्वाम्यादीनां कार्यं करोति इति गूढोर्थः ॥ ११ ॥]

अये कुसुमपुरवृत्तान्तज्ञ इति । इयं सञ्चिन्तितार्थप्राप्तिः क्रमः । पूर्वं द्वारि कस्तिष्ठतीति कुसुमपुरवृत्तान्तहरचारगमनस्य सञ्चिन्तितस्य प्राप्तेः । कार्यव्यग्रत्वादिति । इष्टजनानुसन्धानरूपमाधिबलमङ्गम् । व्यक्तमाहितुण्डिकेति [आहितुण्डिकलिङ्गधारिणा ।] इदं लिङ्गादभ्यूहनमनुमानमङ्गम् ।

---

१ उग्गिरन्दि भमरा. २ अस्मात्पर-कुसुमपुरादागतेन.

वामां बाहुलतां निवेश्य शिथिलं कण्ठे विवृत्तानना
स्कन्धे दक्षिणया बलान्निहितयाप्यङ्के पतन्त्या मुहुः ।
गाढालिङ्गनसङ्गपीडितमुखं यस्योद्यमाशङ्किनी
मौर्यस्योरसि नाधुनापि कुरुते वामेतरं श्रीः स्तनम् ॥ १२ ॥

(प्रकाशम् ।) जयतु अमात्यः । (जेदु अमच्चो) ।

राक्ष०—(विलोक्य ।) अये विराध । (इत्यर्धोक्ते ।) ननु प्ररूढश्मश्रुः । प्रियंवदक भुजङ्गैरिदानीं विनोदयितव्यम् । तद्विश्रम्यतामितः परिजनेन । त्वमपि स्वाधिकारमशून्यं कुरु ।

प्रियं०—तथेति । (सपरिवारो निष्क्रान्तः ।)

राक्ष०—सखे विराधगुप्त इदमासनमास्यताम् ।

विरा०—(नाट्येनोपविष्टः ।)

राक्ष०—(निर्वर्ण्य ।) अये देवपादपद्मोपजीविनोवस्थेयम् । (इति रोदिति ।)

विरा०—अमात्यलं शोकेन । नातिचिरादमात्योस्मान् पुरातनीमवस्थामारोपयिष्यति ।

राक्ष०—सखे वर्णय कुसुमपुरवृत्तान्तम् ।

वामामिति । [वामां स्त्रीणां वामभागस्य श्रेष्ठत्वात्] अनुरागबलात्स्कन्धे निहितयापि यदुद्यमभयान्मुहुरङ्के पतन्त्या दक्षिणया बाहुलतयोपलक्षिता इति शेषः । गाढालिङ्गनसङ्गेनासक्त्या पीडितमुखं चिपिटीकृतचूचुकं यथा तथा चन्द्रगुप्तेत्यन्तमनुरक्तापि राक्षसोद्यमाशङ्किनी [राक्षसः स्वोद्यमेन चन्द्रगुप्तं राज्याद्भ्रंशयेदिति शङ्कया मौर्यस्योरसि दक्षिणं स्तनं न करोति । गाढालिङ्गनं न ददातीत्यर्थः ।] सती स्वाभिलषितं गाढालिङ्गनरूपमुपभोगं न संपादयतीति संभोगाभिलाषः शृङ्गारः । अत्र गाढालिङ्गनाकरणस्य यदुद्यमाशङ्कित्वेन समर्थनात्काव्यलिङ्गमलङ्कारः । समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनमिति लक्षणात् ॥ १२ ॥

अये विराध इति परिजनं प्रति रहस्यगोपनार्थमर्धोक्तिः । प्ररूढश्मश्रुरिति चोक्तवाक्यस्यान्यथाकरणेन पूरणम् । विराधप्ररूढश्मश्रुरित्येककरणम् । विकृतो राधो वेषः तद्रूपाणि प्ररूढानि श्मश्रूणि यस्य ।

स्वाधिकारमशून्यमिति । [स्वनियोगानुष्ठानपरो भव] परप्रवेशनमदत्वा द्वारि अवहितस्तिष्ठेत्यर्थः । सखे वर्णय इति । इयं व्यापिनी कथा पताका । [तीक्ष्णरसोविषम् ।]

---

१ शिथिलाम्. २ निवृ०. ३ जअदु जअदु अमच्चो; अज्जो. ४ विरूढस्मृतिः विरूढश्मश्रुः इति पाठः. ५ विनोदयामः, न विनो०. ६ अस्मात्पाक–यदाज्ञापयत्यमात्य इति. ७ विराधगुप्त इत्यधिकम्.

विरा०---अमात्य विस्तीर्णः कुसुमपुरवृत्तान्तस्तत्कुतः प्रभृति वर्णयामि ।

राक्ष०—सखे चद्रगुप्तस्यैव तावन्नगरप्रवेशात्प्रभृति अस्मत्प्रयुक्तैः तीक्ष्णरसदायिभिः किमनुष्ठितमित्याद्यादितः श्रोतुमिच्छामि ।

विरा०—एष कथयामि । अस्ति तावच्छकयवनकिरातकाम्बोजपारसीकबाह्लीकप्रभृतिभिः चाणक्यमतिपरिगृहीतैश्चन्द्रगुप्तपर्वतेश्वरबलैरुदधिभिरिव प्रलयोच्चलितसलिलैः समन्तादुपरुद्धं कुसुमपुरम् ।

राक्ष०—(शस्त्रमाकृष्य ससम्भ्रमम् ।) अयि मयि स्थिते कः कुसुमपुरमुपरोत्स्यति । प्रवीरक प्रवीरक क्षिप्रमिदानीम् ।

प्राकारं परितः शरासनधरैः क्षिप्रं परिक्रम्यतां
द्वारेषु द्विरदैः प्रतिद्विपघटाभेदक्षमैः स्थीयताम् ।
त्यक्त्वा मृत्युभयं प्रहर्तुमनसः शत्रोर्बले दुर्बले
ते निर्यान्तु मया सहैकमनसो येषामभीष्टं यशः ॥ १३ ॥

विरा०—अमात्यालमावेगेन । वृत्तमिदं वर्ण्यते ।

राक्ष०—(निःश्वस्य ।) कष्टं वृत्तमिदम् । मया पुनर्ज्ञातं स एवायं काल इति । (शस्त्रमुत्सृज्य ।) हा देव नन्द स्मरामि ते राक्षसं प्रति प्रसादातिशयम् । त्वमत्र सङ्ग्रामकाले

अस्तीति क्रियाया वाक्यार्थः कर्ता । [चाणक्यमतिपरिगृहीतैश्चाणक्यबुद्ध्यनुवर्तिभिः । प्रलये उच्चलितानि सलिलानि येषां तैः उददिभिरिवेत्यनेन बलानां विस्तीर्णत्वमुक्तम्] प्रवीरकस्तदानीन्तनः सन्निहितोनुचरः ।

प्राकारमिति । [शरा अस्यन्ते क्षिप्यन्ते अनेनेति शरासनं धनुस्तस्य धरैः धानुष्कैः प्राकारं परितः परिक्रम्यताम् । प्रतिगता द्विपाः परगजास्तेषां घटानां भेदने क्षमैः । येषां यशोऽभीष्टं । न तु नश्वरो देहः । ये यशोर्थिन इत्यर्थः । ये च त्यक्तमृत्युभयाः शत्रोर्दुर्बले बले प्रहर्तुं मनो येषां ते तथा । इत्यर्थः ।] शत्रुबलस्य दुर्बलत्वकथनं सहानुयायिनां प्रोत्साहनार्थम् । इदं रोषसंभ्रमवचनं तोटकम् । अयं वीररसः स्थायीभावः । विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । आनीयमानः स्वादुत्वं स्थायीभावो रसः स्मृतः ॥ १३ ॥

---

१ खलु इत्यधिकम् ; तत्कुतः ; तदाज्ञापय कुतः. २ प्रलयकालचलितसलिलसच्छ्रयैः. ३ पर. ४ स्मरति ते राक्षसः प्रसादानाम्.

यत्रैषा मेघनीला चरति गजघटा राक्षसस्तत्र याया-
देतत्पारिप्लवाम्भःप्लुति तुरगबलं वार्यतां राक्षसेन ।
पत्तीनां राक्षसोऽन्तं नयतु बलमिति प्रेषयन्मह्यमाज्ञा-
मज्ञासीः प्रीतियोगात्स्थितमिव नगरे राक्षसानां सहस्रम् ॥१४॥

ततस्ततः ।

विरा०—ततः समन्तादुपरुद्धं कुसुमपुरमवलोक्य बहुदिवसप्रवृत्तमतिमहदुपरोधवैशसमुपरि पौराणां परिवर्तमानमसहमाने तस्यामप्यवस्थायां पौरजनापेक्षया सुरङ्गामेत्यापक्रान्ते तपोवनाय देवे सर्वार्थसिद्धौ स्वामिविरहात्प्रशिथिलीकृतप्रयत्नेषु युष्मद्बलेषु,जयघोषणाव्याघातादिसाहसानुमितेष्वन्तर्नगरवासिषु पुनरपि नन्दराज्यप्रत्यानयनाय सुरङ्गया बहिरपगतेषु युष्मासु चन्द्रगुप्तनिधनाय युष्मत्प्रयुक्तया विषकन्यका घातिते तपस्विनि पर्वतेश्वरे ।

राक्ष०—सखे पश्याश्चर्यम् ।

कर्णेनेव विषाङ्गनैकपुरुषव्यापादिनी रक्षिता
हन्तुं शक्तिरिवार्जुनं बलवती या चन्द्रगुप्तं मया ।
सा विष्णोरिव विष्णुगुप्तहतकस्यात्यन्तिकश्रेयसे
हैडिम्बेयमिवैत्य पर्वतनृपं तद्वध्यमेवावधीत् ॥ १५ ॥

[यत्रेति । एषा मेघवत् श्यामला शत्रुगजघटा यत्र चलति तत्र राक्षसो यातु । तद्वारणायेतिशेषः ।] पारिप्लवाम्भोवत्समीरणलोलसागरकल्लोलवत् प्लुतिरुड्डीयनं यस्य तत् [एवं स्नेहयोगात्कार्यसहस्रकरणाय मामादिशन् राक्षसानां सहस्रं स्थितमिवामंस्थाः] ॥ १४ ॥

[उपरोधवैशसं पुरपरिवेष्टनजनितक्लेशान् ।] जयघोषणेति । पौरजनापेक्ष अनुमतिः । जयस्याघोषणा डिण्डिमाघातरूपा कर्तव्येत्याज्ञापिते तदकरणं जयघोषणाव्याघातः । तदादिसाहसे राजाज्ञाभङ्गादिरूपैरनिष्ठाचरणैरनुमितेषु शत्रूपजापदूषिता इत्येवमुन्नीतेषु अन्तर्नगरवासिषु युष्मद्बलेषु सत्सु इत्यन्वयः । अतः परमत्रावस्थानमनुचितमिति बहिर्गत्वा सुहृद्बलोत्थापनादिना नन्दराज्यप्रत्यानयनाय युष्मासु बहिरपगतेष्वित्यन्वयः तपस्विनीति । दीने इत्यर्थः ।

कर्णेनेति । कर्णेनार्जुनं हन्तुं बलवती एकपुरुषव्यापादिनी शक्तिरिव चन्द्रगुप्तं हन्तुं या विषाङ्गना मया रक्षितेति व्यवहितान्वयः । [विष्णुगुप्तहततस्य चाणक्यबटोः आत्यन्तिकं श्रेयसे समधिकाभीष्टसिद्धये ।] श्रीकृष्णवध्यं [हिडिम्बासुतं] हैडिम्बेयं घटोत्कचमिव पर्वतकमेत्य प्राप्य तद्वध्यं तेन विष्णुगुप्तेन परिपणितराज्यार्द्धलुब्धेन वध्यमेवावधीत् ॥ १५ ॥

---

१ स्नेह. २ ०नुमितान्तर्नगरवासिषु. ३ प्रीतये, अत्यन्तनिःश्रेयसे.

विरा०—अमात्य दैवस्यात्र कामचारः किं क्रियताम् ।

राक्ष०—ततस्ततः ।

विरा०—ततः पितृवधत्रासादपक्रान्ते कुमारे मलयकेतौ विश्वासिते पर्वतकभ्रातरि वैरोचके प्रकाशिते च चन्द्रगुप्तस्य नन्दभवनप्रवेशे चाणक्यहतकेन आहूयाभिहिताः सर्व एव कुसुमपुरनिवासिनः सूत्रधाराः यथा सांवत्सरिकादेशादर्धरात्रसमये चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यति । ततः पूर्वद्वारात्प्रभृति संस्क्रियतां राजभवनमिति । ततः सूत्रधारैरभिहितमार्य प्रथममेव देवस्य चन्द्रगुप्तस्य नन्दभवनप्रवेशमुपलभ्य सूत्रधारेण दारुवर्मणा कनकतोरणन्यासादिभिः संस्कारविशेषैः संस्कृतं प्रथमराजभवनद्वारम् । अस्माभिरिदानीमभ्यन्तरे संस्कार आधेय इति । ततश्चाणक्यबटुना अनादिष्टेनैव सूत्रधारेण दारुवर्मणा संस्कृतं राजभवनद्वारमिति परितुष्टेनेव सुचिरं दारुवर्मणो दाक्ष्यं प्रशस्याभिहितम् । अचिरादस्य दाक्ष्यस्यानुरूपं फलमधिगमिष्यसि दारुवर्मन्निति ।

राक्ष०—(सोद्वेगम् ।) सखे कुतश्चाणक्यबटोः परितोषः । अफलमनिष्टफलं वा दारुवर्मणः प्रयत्नमवगच्छामि । यदनेन बुद्धिमोहादथवा राजभक्तिप्रकर्षान्नियोगकालमप्रतीक्षमाणेन जनितश्चाणक्यबटोश्चेतसि बलवान्विकल्पः । ततस्ततः ।

विरा०—ततश्चाणक्यहतकेनानुकूललग्नवशादर्द्धरात्रसमये चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यतीति शिल्पिनः पौरांश्च गृहीतार्थान्

[कामेन चारः कामचारः] सूत्रधाराः शिल्पिनः । संस्कारविशेषैरिति । चन्द्रगुप्तोपरि तोरणपातनोद्यमादिरूपैः । अभ्यन्तरे संस्कार इति । तीक्ष्णरसदानशयनगृहशायितहननादिरूप इति गूढोभिसन्धिः । [दाक्ष्यं दक्षतां] अनुरूपं फलमिदं वधरूपं फलमिति गूढम् ।

राजभक्तीति । राज्ञि सर्वार्थसिद्धौ भक्तिप्रकर्षः वैरिनिधनेन भक्त्यतिशयप्रदर्शनम् । अयमपकारिजनाद्भयमुद्वेगः । [नियोगकालमाज्ञाकालमप्रतिपालयता] ततश्चाणक्यहतकेनेत्यादि । [लग्नवशाल्लग्नानुरोधात्] इदं चाणक्यस्येष्टार्थोपायानुसरणमाक्षेपो नामान्त्यमङ्गम् ।]

---

१ किमत्र क्रियते. २ वचनात् दत्तलग्नवशात्. ३ एव अभिमतः चन्द्रगुप्तस्य. ४ पूर्वपुर-द्वार-प्रवेशात्. ५ अभिनन्द्य. ६ प्रकर्षतया; नियोग-अभियोग.

कृत्वा तस्मिन्नेव क्षणे पर्वतेश्वरभ्रातरं वैरोचकमेकासने चन्द्रगुप्तेन सहोपवेश्य कृतः पृथ्वीराज्यविभागः।

राक्ष०—किं वातिसृष्टः पर्वतकभ्रात्रे वैरोचकाय पूर्वप्रतिश्रुतः राज्यार्धविभागः।

विरा०—अथ किम्।

राक्ष०—(स्वगतम्।) नियतमतिधूर्तेन चाणक्यबटुना तस्यापि तपस्विनः कमप्युपांशुवधमाकलय्य पर्वतेश्वरविनाशेन जनितमयशः प्रमार्ष्टुमेषा लोकप्रसिद्धिरुपचिता। (प्रकाशम्।) ततस्ततः।

विरा०—ततः प्रथममेव प्रकाशिते रात्रौ चन्द्रगुप्तस्य नन्दभवनप्रवेशे कृताभिषेके किल वैरोचके विमलमुक्तामणिपरिक्षेपविरचितचित्रपटमयवारबाणप्रच्छादितशरीरे मणिमयमुकुटनिबिडनियमितरुचिरतरमौलौ सुरभिकुसुमदामवैकक्ष्यावभासितविपुलवक्षःस्थले परिचिततमैरप्यनभिज्ञायमानाकृतौ चाणक्यहतकादेशाच्चन्द्रगुप्तोपवाह्यां चन्द्रलेखां नाम गजवशामारुह्य चन्द्रगुप्तानुयायिना राजलोकेनानुगम्यमाने देवस्य नन्दस्य भवनं प्रविशति वैरोचके युष्मत्प्रयुक्तेन दारुवर्मणा सूत्रधारेण चन्द्रगुप्तोयमिति मत्वा तस्योपरि पातनाय सज्जीकृतं यन्त्रतोरणम्। अत्रान्तरे बहिर्निगृहीतवाहनेषु स्थितेषु चन्द्रगुप्तानुयायिषु नृपेषु युष्मत्प्रयुक्तेनैव चन्द्रगुप्त-

---

[अतिसृष्टो दत्तः। उपांशुवधो रहसि हननम्। उपचितेति। अभिवर्द्धितेत्यर्थः। किलेत्यलीके। चित्रपटमयेति। [विमलमुक्तामणीनां परिक्षेपेण परितः स्थापनेन विरचितः। चित्रपटमयः वारवाणः कञ्चुकसदृशरचनाविशेष इत्यर्थस्तेन प्रच्छादितं शरीरं यस्य तस्मिन्। 'कञ्चुको वारबाणोऽस्त्री' इत्यमरः। मौलयः संयताः कचाः। ते मुकुटे निबिडं नियमिता यस्य। कुसुमदाम्नो वैकक्ष्यमुपवीतत्वेन निधानम्। ['कण्ठाद्वैकाक्षिकं तु तद्यत्तिर्यक् क्षिप्तमुरसि।' इत्यमरः। चन्द्रगुप्त उपवाह्यो यस्यास्तां चन्द्रगुप्तवाहनभूताम्।] राक्षसेनैव चन्द्रगुप्तोपांशुवधार्थं तस्य निषादित्वेन हास्तिपकत्वेन बर्बरकनामा स्वपुरुषो नियोजितः इत्यर्थः।

---

१ पृथक्, ०राज्यार्धविभागः इति पाठः. २ पर्वतेश्वरभ्रात्रे अतिसृष्टं राज्यार्धम्. ३ अयशसः परिहारार्थम्. ४ चरिता. ५ हिमविमलमुक्तागुणपरिक्षेपोपरचितपट्टवार०. ६ वैकक्षका. ७ मन्यमानेन वैरोचकस्योपरि. ८ भूमिपालेषु.

निषादिना वर्वरकेण कनकदण्डिकान्तर्निहितामसिपुत्रिकामाक्रष्टुकामेनावलम्बिता करेण कनकशृङ्खला[1]वलम्बिनी कनकदण्डिका।

राक्ष०—[2]उभयोरप्यस्थाने यत्नः।

विरा०—अथ जघनाभिघातमुत्प्रेक्षमाणा गजवधूरतिजवनतया गत्यन्तरमारूढवती। प्रथमगत्यनुरोधप्रत्याकलितमुक्तेन प्रभ्रष्टलक्ष्यं पतता यन्त्रतोरणेनाकृष्टकृपाणीव्यग्रपाणिरनासादयन्नेव चन्द्रगुप्ताशया वैरोचकं हतस्तपस्वी वर्वरकः। ततो दारुवर्मणा यन्त्रतोरणनिपा[3]तनादात्मवधमाकलय्य पूर्वमेवोत्तुङ्गतोरणस्थलमारूढेन यन्त्रघट्टनबीजं लोहकीलकमादाय हस्तिनीगत एव हतस्तपस्वी वैरोचकः।

राक्ष०—कष्टमनर्थद्वयमापतितम्। न हतश्चन्द्रगुप्तो हतौ वैरोचकवर्वरकौ दैवेन। [4]अथ सूत्रधारो दारुवर्मा कथम्।

विरा०—वैरोचकपुरःसरेण पदातिलोकेनैव लोष्टघातं हतः।

राक्ष०—(सास्रम्।) कष्टम्। अहो वत्सलेन सुहृदा दारुवर्मणा वियुक्ताः स्मः। अथ तत्रत्येन[5] भिषजा अभयदत्तेन किमनुष्ठितम्।

विरा०—[6]सर्वमनुष्ठितम्।

राक्ष०—(सहर्षम्।) किं हतो दुरात्मा चन्द्रगुप्तः[7]।

विरा०—अमात्य दैवान्न हतः।

राक्ष०—(सविषादम्।) तत्किमिदानीं कथयसि [8]सर्वमनुष्ठितमिति।

[असिपुत्रिका छुरिका। उत्प्रेक्षमाणा वितर्कयन्ती। आरूढवती आश्रितवती। प्रथमगत्यनुरोधाद्गत्यनुसारेण आदौ प्रत्याकलितं पश्चान्मुक्तं च तेन। प्रभ्रष्टं लक्ष्यं यस्मिन्कर्मणि तद्यथा तथा। आकृष्टा या कृपाणी असिलता तया व्यग्रः पाणिर्यस्य।] व्यग्रपाणिरनासादयन्निति। वैरोचकं हन्तुमवकाशमनासादयन्नित्यर्थः। लोष्टघातमिति। लोष्टैर्हत्वा लोष्टघातं हन्तेर्णमुल्। [अथ भिषजाभयदत्तेनेति- तदुक्तं कामन्दकेन। भिषग्भेदेन वा शत्रुं रसदानेन साधयेत्।]

१ °लामुखाव. २ (स्वगतम्). ३ °पातमात्मविनाशफलमवधार्य. ४ अस्मात्प्राक्—(सा वेगमात्मगतम्।) न एतावुभौ हतौ दैवेन वयमेव हताः। (प्रकाशम्). ५ तत्र तेन. ६ अमात्य सर्व° ७ अपि सखे हतश्चन्द्रगुप्तहतकः. ८ परितुष्टः सर्व.

विरा०—अमात्य कल्पितमनेन योग[1]चूर्णमिश्रितमौषधं चन्द्रगुप्ताय । तत्प्रत्यक्षीकुर्वता चाणक्यहतकेन कनकभाजने वर्णान्तरमुपलभ्याभिहितश्चन्द्रगुप्तः । वृषल सविषमिदमौषधं न पातव्यमिति ।

राक्ष०—शठः खल्वसौ बटुः । अथ स वैद्यः कथम् ।

विरा०—तदेवौषधं पायितो मृत[2]श्च ।

राक्ष०—(सविषादम् ।) [3]अहो महान्विज्ञानराशिरुपरतः । अथ तस्य शयनाधिकृतस्य प्रमोदकस्य किं वृत्तम् ।

विरा०—यदितरेषाम् ।

राक्ष०—(सोद्वेगम् ।) कथमिव ।

विरा०—स खलु मूर्खस्तं युष्माभिरतिसृष्टं महान्तमर्थराशिमवाप्य महता व्ययेनोपभोक्तुमारब्धवान् । ततः कुतोयं भूयान्धनागम इति पृच्छ्यमानो यदा वाक्यभेदान्बहूनगमत्तदा चाणक्यहत[5]केन विचित्रवधेन व्यापादितः ।

राक्ष०([6]सोद्वेगम् ।) कथमत्रापि दैवेनोपहता वयम् । अथ शयितस्य चन्द्रगुप्तस्य शरीरे प्रहर्तुमस्मत्प्रयुक्तानां राजगृह[7]स्यान्तर्भित्तिसुरङ्गामेत्य प्रथममेव निवसतां बीभत्सकादीनां को वृत्तान्तः ।

विरा०—अमात्य दारुणो वृत्तान्तः ।

राक्ष०—(सावेगम् ।) कथं दारुणो वृत्तान्तः । न खलु विदितास्ते तत्र निवसन्तश्चाणक्यहतकेन ।

विरा०—अमात्य अथ किम् । प्राक् चन्द्रगुप्तप्रवेशाच्छयनगृहं

[प्रत्यक्षीकुर्वता पातुं योग्यं न वेति विमृशता । तदेवौषधं पायितः कदाचिन्परप्रेरिता भिषजो नृपाय सविषमौषधं दद्युरिति तैः प्रथमं पीतं तदाज्ञा पातव्यमिति नीतिविदुपदेशात् । तदुक्तं कामन्दकेन-'औषधानि च सर्वाणि पानं पानीयमेव च । तत्कल्पकैः समास्वाद्य प्राश्नीयाद्भोजनानि च ।' इति] अथ तस्येति । शयनाधिकृतस्य शयनगृहसंस्कारादिना राजप्रलोभनेधिकृतस्येत्यर्थः । [वाक्यभेदानिति यदा परस्परविरोधीनि वाक्यान्याह तदा ।]

---

१ विषयोगचर्णमौ०. २ उपरतः. ३ अहह इति पाठः. ४ आत्मविनाशः. ५ ०हतकादेशाद्विचित्रेण व०. ६ सविषादम्. ७ नरपतिशयनगृहस्यान्तःसुरङ्गायां निव०.

प्रविष्टमात्रेणैवं निपुणमवलोकयता दुरात्मना चाणक्यहतकेन कस्माच्चिद्भित्तिच्छिद्राद्गृहीतभक्तावयवां निष्क्रामन्तीं पिपीलिकापङ्क्तिमवलोक्य पुरुषगर्भमेतद्गृहमिति गृहीतार्थेन दाहितं तच्छयनगृहम् । तस्मिंश्च दह्यमाने धूमावरुद्धदृष्टयः प्रथमविहितनिर्गमनमार्गमनधिगम्य द्वारं सर्व एव बीभत्सकादयो ज्वलनमुपगम्य तत्रैव नष्टाः ।

राक्ष०—(सास्रम् ।) कष्टं भोः कष्टम् । सखे पश्य दैवसंपदं दुरात्मनश्चन्द्रगुप्तहतकस्य । कुतः ।

कन्या तस्य वधाय या विषमयी गूढं प्रयुक्ता मया
दैवात्पर्वतकस्तया स निहतो यस्तस्य राज्यार्द्धहृत् ।
ये शस्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिता
मौर्यस्यैव फलन्ति पश्य विविधश्रेयांसि मन्नीतयः ॥ १६ ॥

विरा०—अमात्य तथापि खलु प्रारब्धमपरित्याज्यमेव । पश्य ।

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥ १७ ॥

अपि च ।

किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।

[गृहीता भक्तावयवा अन्नकणा यया तां ।] कन्या तस्येति । रसेषु विषेषु । 'शृङ्गारादौ विषे वीर्ये गुणे रागे जले रसे ।' इत्यमरः । मौर्यस्य नाशार्थं प्रणीता मन्नीतयः प्रत्युत तस्यैव श्रेयांसि फलन्तीति पश्य दैवसंपदं चन्द्रगुप्तस्येति पूर्वेणान्वयः ॥ १६ ॥

[प्रारभ्यत इति । । नीचाः कार्यं नैवारभन्ते । मध्या आरभ्य जातविघ्नास्तत्परित्यजन्ति । इ०] ॥ १७ ॥ किं शेषस्येति [शेषस्यानन्तस्य वपुषि भरव्यथा भूधारणजनिता न जायते किं यस्मात्कारणादि० । अपि तु जायते एव । किंतु] कृपण-

---

१ ०णैव चाणक्यहतकेन शयनगृहं समन्तादवलोकितम् । ततोन्यस्मात्. २ ०यवानां पिपीलिकानां निष्क्रामन्तीं. ३ ०दृष्टिविषयाः ४ पिहित. ५ उपगता उपरताश्च ६ मे नीतयः इति पाठः. ७ सहरुगुणितैरपि हन्यमानाः. ८ गुणाः,—स्वमिवोद्वहन्ति.

किं त्वङ्गीकृतमुत्सृजन्कृपणवच्छ्लाघ्यो जनो लज्जते
निर्व्यूढं प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥ १८ ॥

राक्ष०—सखे प्रारब्धमपरित्याज्यमिति प्रत्यक्षमेवैतद्भवताम् । ततस्ततः ।

विरा०—ततः प्रभृति चन्द्रगुप्तशरीरे सहस्रगुणमप्रमत्तश्चाणक्यहतक एभ्य एतदीदृशं भवतीत्यन्विष्य निगृहीतवान्पुरनिवासिनो युष्मदीयानाप्तपुरुषान् ।

राक्ष०—(सोद्वेगम् ।) कथय कथय के के निगृहीताः ।

विरा०—प्रथमं तावत्क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वासितः ।

राक्ष०—(स्वगतम् ।) एतावत्सह्यम् । न निष्परिग्रहं स्थानभ्रंशः पीडयिष्यति । (प्रकाशम् ।) वयस्य कमपराधमुद्दिश्य निर्वासितः ।

विरा०—एषे राक्षसप्रयुक्तया विषकन्यया पर्वतेश्वरं व्यापादितवानिति ।

राक्ष०—(स्वगतम् ।) साधु कौटिल्य साधु । स्वस्मिन् ।

परिहृतमयशः पातितमस्मासु च घातितोऽर्धराज्यहरः ।
एकमपि नीतिबीजं बहुफलतामेति यस्य तव ॥ १९ ॥

(प्रकाशम् ।) ततस्ततः ।

विरा०—ततश्चन्द्रगुप्तशरीरमभिद्रोग्धुमनेन व्यापारिता दारुवर्मादय इति नगरे प्रख्याप्य शकटदासः शूलमारोपितः ।

वत् [कृपणेन प्राकृतजनेन तुल्यम् । अङ्गीकृतं कार्यम् ।] उत्सृजन्निति पूर्वेणान्वयः । प्रतिपन्नवस्तुषु अङ्गीकृतवस्तुषु । निर्व्यूढं निर्वाहः भावे क्तः । निर्व्यूढमिति । यदेतत्सतां कुलव्रतमित्यर्थः । निर्व्यूढिः प्रतिपन्नवस्तुषु सतामेकं हि गोत्रव्रतमिति क्वचित्पाठः । निर्व्यूढिरूपमेवं मुख्यं गोत्रव्रतमित्यर्थः ॥ १८ ॥

[प्रारब्धमपरित्याज्यमहं न परित्यजामिति । आप्ता हिताः । निष्परिग्रहं परिवाररहितम् ।]

[परिहृतमिति । अयशः पर्वतेश्वरविनाशजनिताऽकीर्तिः । परिहृतमिति एकं फलं । अस्मासु तत्पातितं संक्रामितमिति द्वितीयं । अर्धराज्यहरो घातितः । अर्धराज्यं च रक्षितमिति तृतीयम् । एवं] एकमपि नीतिबीजमिति । इदमेकं बीजान्वेषणम् ॥ १९ ॥

---

१ आर्या. २ निर्वाहः ३ कुसुमपुरनिवासिनोः. ४ एष दुरात्मा.

राक्ष०—(सास्रम् ।) हा सखे शकटदास अयुक्तरूपस्तवायमीदृशो मृत्युः । अथवा स्वाम्यर्थमुपरतो न शोच्यस्त्वम् । वयमेवात्र शोच्या ये नन्दकुलविनाशेपि जीवितुमिच्छामः ।

विरा०—अमात्य स्वाम्यर्थ एव साधयितव्य इति प्रयतसे ।

राक्ष०—सखे ।

अस्माभिरमुमेवार्थमालम्ब्य न जिजीविषा ।
परलोकगतो देवः कृतघ्नैर्नानुगम्यते ॥ २० ॥

कथ्यतामपरस्यापि सुहृद्वचसनस्य श्रवणे सज्जोस्मि ।

विरा०—एतदुपलभ्य चन्दनदासेनापवाहितममात्यकलत्रम् ।

राक्ष०—सखे क्रूरस्य चाणक्यबटोर्विरुद्धमयुक्तमनुष्ठितं तेन ।

विरा०—अमात्य अन्वयुक्ततरः सुहृद्द्रोहः ।

राक्ष०—ततस्ततः ।

विरा०—ततो याच्यमानेनाप्यनेन न समर्पितममात्यकलत्रं यदा तदातिकुपितेन चाणक्यबटुना—

राक्ष०—(सोद्वेगम् ।) न खलु व्यापादितः ।

विरा०—न हि । गृहीतगृहसारः सपुत्रकलत्रो बन्धनागारे निक्षिप्तः ।

राक्ष०—तत्किं परितुष्टः कथयसि अपवाहितं राक्षसकलत्रमिति । ननु वक्तव्यं संयमितः सुपुत्रकलत्रो राक्षस इति ।

(प्रविश्य ।) **पुरुषः**—जयतु अमात्यः । एष खलु शकटदासः प्रतीहारभूमिमुपस्थितः । (जेदु अमच्चो एसो खु सअडदासो पडिहारभूमिमुवठ्ठिदो ।)

राक्ष०—भद्र अपि सत्यम् ।

[अयुक्तरूपोऽनुचितः । अस्माभिरिति । स्वामी सर्वथानुगन्तव्योऽस्माभिस्तथा न कृतमिति कृतघ्नैरस्माभिरमुमेवार्थं स्वाम्यर्थ एव साधयितव्य इत्येतद्रुपमवलम्ब्य न जीवितुमिच्छामि जिजीविषा तामवलम्ब्य इत्यर्थः ।] न खलु व्यापादित इति । एतदप्यपकारिजनाद्भयमुद्वेगः ।

---

१ अस्माकममुमेवार्थमवलम्ब्य जिजीविषा । इति पाठः. २ अस्मात्परं विरा०-अमात्य नैतदेवम् । युष्माभिरमुमेवा...।......कृतज्ञैर्नानुगम्यते ॥ इत्य० क्वचित्. ३ ०सेनोपरूढसाध्वसेन, दृढसौहार्देन. ४ चन्दनदासेन.इत्य. ५ गृहीतानेन. ६ प्रविश्य पटाक्षेपेण. ७ प्रियंवदक.

पुरु०—किमलीकममात्यपादेषु विनिवेदयामि । (किं अलिअं अमच्चपादेसु विणिवेदेमि ।)

राक्ष०—सखे विराधगुप्त कथमेतत् ।

विरा०—अमात्य स्यादेतदेवं यतो भव्यं रक्षति भवितव्यता ।

राक्ष०—प्रियंवदक किमद्यापि चिरयसि । क्षिप्रं प्रवेशयैनम् ।

पुरु०—यदमात्य आज्ञापयति । (इति निष्क्रान्तः ।) (जं अमच्चो आणवेदि ।)

(ततः प्रविशति सिद्धार्थकेनानुगम्यमानः शकटदासः ।)

शक०—(स्वगतम् ।)

दृष्ट्वा मौर्यमिव प्रतिष्ठितपदं शूलं धरित्र्यास्तले
तल्लक्ष्मीमिव चेतनाप्रमथिनीं मूर्द्धावबद्धस्रजम् ।
श्रुत्वा स्वाम्यपरोपरौद्रविषमानाघाततूर्यस्वनान्
न ध्वस्तं प्रथमाभिघातकठिनं मन्ये मदीयं मनः ॥ २१ ॥

(अवलोक्य सहर्षम् ।) अयममात्यराक्षसस्तिष्ठति य एषः ।

अक्षीणभक्तिः क्षीणेपि नन्दे स्वाम्यर्थमुद्वहन् ।
पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः ॥ २२ ॥

(उपसृत्य ।) यजत्वमात्यः ।

राक्ष०—(विलोक्य सहर्षम् ।) सखे शकटदास दिष्ट्या कौटिल्यगोचरगतोपि त्वं दृष्टोसि । तत्परिष्वजस्व माम् ।

दृष्ट्वा मौर्यमिति । [प्रतिष्ठितपदं निखातमूलं जातप्रतिष्ठं च । चेतनाप्रमथिनीमन्तःकरणविदारिणीं मनोरुजमावहन्तीं च ।] अत्र वध्यभूमिखातशूलस्य वध्यस्रजश्च मौर्यतल्लक्ष्मीदृष्टान्तः मत्सरातिशयजनितासूयाकृतः । जीवकर्मेन्द्रियवृत्तीनां मनोवृत्त्यधीनतया प्रकृते दर्शनश्रवणबन्धनक्रियाणां मन एव कर्तृ । अतो ध्वंसनक्रियैककर्तृत्वात् क्त्वाप्रत्ययः । स्वामिनां नन्दानामपरोपो राज्यभ्रंशस्तद्वद्रौद्रविषमानसह्यानित्यर्थः । यद्यस्मात्प्रथमाभिघातेन पूर्वानुभूतानर्थपरंपरासहनेन कठिनमभूत्तस्मान्न ध्वस्तमित्यन्वयः । स्वामिपुरोपरोधविषमानिति क्वचित्पाठः ॥ २१ ॥

अक्षीणभक्तिरिति । परमे प्रमाणे प्रथमकोटौ स्थितः । [अत्युत्कटस्वामिभक्तिशालिनामप्यग्रेसर इत्यर्थः ॥ २२ ॥]

---

१ अमच्चपादोपजीविणो जना न अलिअं मन्तिदुं जाणन्ति. २ ०त्र्याः स्थले. ३ चेतसः.
४ मूर्ध्नावबद्धय, उन्मुच्य वध्य. ५ स्वाम्युपरोध. ६ यत्तत.

शक०—(तथा करोति ।)

राक्ष०—(चिरं परिष्वज्य ।) इदमासनमास्यताम् ।

शक०—(नाट्येनोपविष्टः ।)

राक्ष०—सखे शकटदास अथ कोयं मे ईदृशस्य हृदयानन्दस्य हेतुः ।

शक०—(सिद्धार्थकं निर्दिश्य ।) अनेन प्रियसुहृदा सिद्धार्थकेन घातकान्विद्राव्य वध्यस्थानाद[1]पहृतोस्मि ।

राक्ष०—(सहर्षम् ।) भद्र सिद्धार्थक किं[2] पर्याप्तमिदमस्य प्रियस्य । तथापि गृह्यताम् । (इति स्वगात्रादवतार्य भूषणानि प्रयच्छति ।)

सिद्धा०—(गृहीत्वा पादयोर्निपत्य स्वगतम् ।) अयं खलु आर्योपदेशः । भवतु तथा करिष्यामि । (प्रकाशम् ।) अमात्य अत्र मे प्रथमप्रविष्टस्य नास्ति कोपि परिचितः यत्रेममात्यस्य प्रसादं निक्षिप्य निर्वृतो भवामि । तस्मादिच्छाम्यहमेतया मुद्रया मुद्रितममात्यस्यैव भाण्डागारे स्थापयितुम् । यदा मे प्रयोजनं तदा ग्रहीष्यामि । ([4]अअं खु अज्जोवदेसो । होदु तह करिस्सं । अमच्च एत्थमे पढमपविठ्ठस्स णत्थि कोवि परिचिदो जत्थ एदं अमच्चस्स पसादं णिक्खिविअ णिव्वुदो भविस्सं । ता इच्छामि अहं इमाए मुद्दाए मुद्दिदं अमच्चस्स एव्व भण्डाआरे ठाविदुं । जदा मे [5]पओअणं तदा गेह्निस्सं ।)

राक्ष०—भद्र को दोषः । शकटदास एवं क्रियताम् ।

शक०—यदाज्ञापयत्यमात्यः । (मुद्रां विलोक्य जनान्तिकम् ।) अमात्य भवन्नामाङ्कितेयं मुद्रा ।

आर्योपदेश इति । तस्माच्च सुहृत्प्राणपरिरक्षणपरितुष्टादित्यादिः कर्णे एवमेवेति अतः पूर्वोक्त आर्योपदेश इत्यर्थः । इदमपरं बीजान्वेषणम् ।

ग्रहीष्यामीति । भवतोतिसन्धानार्थं यदा कटकान्निर्गमिष्यामि तदा ग्रहीष्यामीति कुटिलो गूढाशयः पयत्यमात्यः । इति ।

---

१ यदाज्ञापयत्यमात्य इति. २ अपवाहितः. ३ काममपर्याप्तम्. ४ एदं खु अज्जोणवदेसेण करिस्सं. ५ एदिणा पओ

राक्ष०—(विलोक्यात्मगतम् ।) सत्यं नगरान्निष्क्रामतो मम हस्ताद्ब्राह्मण्या[2] उत्कण्ठाविनोदार्थं गृहीता । तत्कथमस्य हस्तमुपागता । (प्रकाशम् ।) भद्र सिद्धार्थक कुतस्त्वयेयमधिगता ।

सिद्धा०—अस्ति कुसुमपुरे मणिकारश्रेष्ठी चन्दनदासो नाम । तस्य गेहद्वारपरिसरे पतिता मया आसादिता । (अत्थि कुसुमपुरे[3] मणिआरसेट्ठी चन्दनदासो णाम । तस्स गेहदुआरपडिसरे[4] पडिदा मए आसादिदा ।)

राक्ष०—युज्यते ।

सिद्धा०—अमात्य अत्र किं युज्यते । (अमच्च एत्थ किं युज्जइ ।)

राक्ष०—भद्र यन्महाधनानां गृहे पतितस्यैवंविधस्योपलब्धिरिति ।

शक०—सखे सिद्धार्थक अमात्यनामाङ्कितेयं मुद्रा । तदितो बहुतरेणार्थेन भवन्तममात्यस्तोषयिष्यति । दीयतामेषा ।

सिद्धा०—आर्य ननु प्रसाद एष यदस्या मुद्राया अमात्यः परिग्रहं करोति । (अज्ज णं पसादो एसो जं इमाए मुद्दाए अमच्चो परिग्गहं[6] करेदि ।) (इति मुद्रामर्पयति ।)

[उत्कण्ठाविनोदार्थम् । उत्कण्ठा इष्टजनस्य सस्पृहं स्मरणं । चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः । उत्कण्ठोत्कलिके । इति शब्दार्णवः ।]

किमत्र युज्यत इति । मुद्रायाः स्वकीयत्वनिह्नवोनेन क्रियत इति जानन्नप्यजानन्निव पृच्छति । भद्र यदिति । अस्मद्गृहजनस्तत्र वर्तत इत्यस्यार्थस्य गोपनार्थमियमुक्तिः ।

तदितो बहुतरेणेति । इतो मुद्रामूल्यादप्यधिकतरेणेत्यर्थः । परिग्रहमित्यादि । यदर्थमियमानीता तत्सिद्धमित्यर्थो गूढः ।

---

१ सविषादं सवितर्कमा०. २ गृहिण्या. ३ पुरतित्रासी. ४ गेदुहआरे भूमिए. ५ तसो मे परितोषो. ६ परिग्गहप्पसादं.

राक्ष०—सखे शकटदास अनयैव मुद्रया स्वाधिकारे व्यवहर्तव्यं भवता।

शक०—यदाज्ञापयत्यमात्यः।

सिद्धा०—अमात्य किमपि विज्ञापयामि। (अमच्च किंपि विण्णवेमि।)

राक्ष०—ब्रूहि विश्रब्धम्।

सिद्धा०—जानात्येवामात्यो यथा चाणक्यबटुकस्य विप्रियं कृत्वा नास्ति पुनः पाटलिपुत्रे प्रवेश इति इच्छाम्यहममात्यस्य चरणे एव शुश्रूषितुम्। (जाणादि एव्व अमच्चो जह चाणक्कबडुअस्य पिप्पिणं कदुअ णत्थि पुणो पाडलिउत्ते पवेसो त्ति इच्छामि अहं अमच्चचलणे एव सुस्सूसिदुम्।)

राक्ष०—भद्र प्रियं नः। किंतु त्वदभिप्रायापरिज्ञानान्तरितोय-मस्मदनुनयः। तदेवं क्रियताम्।

सिद्धा०—(सहर्षम्।) अनुगृहीतोस्मि। (अनुगिहिदोह्मि।)

राक्ष०—सखे शकटदास विश्रामय सिद्धार्थकम्।

शक०—तथा (इति सिद्धार्थकेन सह निष्क्रान्तः।)

राक्ष०—सखे विराधगुप्त वर्णय वृत्तशेषम्। अपि क्षमन्तेस्मदुपजापं चन्द्रगुप्तप्रकृतयः।

विरा०—अमात्य बाढं क्षमन्ते यथाप्रकाशमनुगच्छन्त्येव।

त्वदभिप्राय इति। त्वदभिप्रायापरिज्ञानेन [पृष्टोऽस्मत्सेवामङ्गीकरिष्यसि न वेतित्वदभिप्रायाज्ञानेन] अन्तरितो विलम्बितः। [अन्यथा] पूर्वमेवास्माभिरेवं भवाननुनेय इत्यर्थः॥

अनुगच्छन्त्येवेति। चन्द्रगुप्तप्रकृतयः भद्रभटादयः मलयकेतूपेक्षणात्कृतघ्न-श्चाणक्यबटुर्न विश्वसनीय इत्येवमस्मदुपजापं यथाप्रकाशमनुगच्छन्त्येव। [यथा प्रकाशं प्रकाशीभवन्तमर्थमनतिक्रम्य तदनुसारेणास्मदुक्तं कर्तुं प्रवर्तन्ते।] अ-त्राप्यागन्तुमुद्युञ्जत एवेति भावः। वक्ष्यति चैतत्पञ्चमेङ्के। प्राक्परिगृहीतो-पजापैरित्यादि।

---

१ भद्रं ब्रूहि. २ अज्जस्स ज्जवे सुप्पसण्णे पादे सेविदुम्. ३ वर्णयेदानीं कुसुम-पुरवृत्तान्तशेषम्. ४ कुसुमपुरनिवासिनोऽस्म. ५ ननु यथा प्रधानं.

राक्ष०—सखे किं तत्र प्रकाशम् ।

विरा०—अमात्य इदं तत्र प्रकाशम् । मलयकेतोरपक्रमणात्प्रभृति कुपितश्चन्द्रगुप्तश्चाणक्यस्योपरीति चाणक्योऽप्यतिजितकाशितयासहमानश्चन्द्रगुप्तं तैस्तैराज्ञाभङ्गैश्चन्द्रगुप्तस्य चेतःपीडामुपचिनोति । इत्थमपि ममानुभवः ।

राक्ष०—(सहर्षम् ।) सखे विराधगुप्त गच्छ त्वमनेनैवाहितुण्डिकच्छद्मना पुनः कुसुमपुरम् । तत्र मे प्रियसुहृद्वैतालिकव्यञ्जनः स्तनकलशो नाम प्रतिवसति । स त्वया मद्वचनाद्वाच्यः यथा चाणक्येन क्रियमाणेष्वाज्ञाभङ्गेषु चन्द्रगुप्तः समुत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्यः कार्यं चातिनिभृतं करभकहस्तेन सन्देष्टव्यमिति ।

विरा०—यदाज्ञापयत्यमात्यः । (इति निष्क्रान्तः ।)

(प्रविश्य ।)

पुरुषः—जयतु अमात्यः । अमात्य शकटदासो विज्ञापयति एते खलु त्रयोलङ्कारसंयोगा विक्रीयन्ते । तान् प्रत्यक्षीकरोत्वमात्य इति । (जेदु अमच्चो । अमच्च सअडदासो विण्णवेदि एदे खु तिण्णि अलङ्कारसञ्जोआ विक्कीअन्दि । ते पच्चक्खीकरेदु अमच्चो ।)

राक्ष०—(विलोक्यात्मगतम् ।) अहो महार्हाण्याभरणानि । (प्रकाशम् ।) भद्र उच्यतामस्मद्वचनाच्छकटदासः परितोष्य विक्रेतारं गृह्यतामिति ।

जितेन आत्मनो जयेन काशते असौ जितकाशी अतिशयेन जितकाशी अति० तस्य भावः जितकाशिता तया । आत्मनो जयेन अति दृप्त इत्यर्थः । उपचिनोति पुनः पुनः कृतैराज्ञाभङ्गैर्वर्धयति ।] ममानुभव इति । इत्थं तत्रत्यवृत्तं मयानुभूयैवागतमित्यर्थः । इदमपि बीजान्वेषणम् ॥ [–व्यञ्जनः वैतालिकच्छद्मना वर्तमानः । उपश्लोकयितव्यः श्लोकैः स्तोतव्यः ।]

अलङ्कारसंयोगा इति । अलङ्कारसंयोगाः सम्यग्घटिता अलङ्कारा इत्यर्थः ।

---

१ कारणम्. २ पीडितश्चन्द्रगुप्तेन चाणक्यः. ३ रूपैः. ४ जअदु जअदु अज्जो. ५ एसो खु स अड० ६ विसेस।

पुरु०—तथा (तह ।) (इति निष्क्रान्तः ।)

राक्ष०—यावदहमपि कुसुमपुराय करभकं प्रेषयामि । (उत्थाय) अपि नाम दुरात्मनश्चाणक्याच्चन्द्रगुप्तो भिद्येत । अथवा सिद्धमेव नः समीहितं पश्यामि । कुतः

मौर्यस्तेजसि सर्वभूतलभुजामाज्ञापको वर्तते
चाणक्योपि मदाश्रयादयमभूद्राजेति जातस्मयः ।
राज्यप्राप्तिकृतार्थमेकमपरं तीर्णप्रतिज्ञार्णवं
सौहार्दात्कृतकृत्यतैव नियतं लब्धान्तरा भेत्स्यति ॥ २३ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति राक्षसविचारो नाम द्वितीयोऽङ्कः ।

चन्द्रगुप्तो भिद्येतेति । ततःप्रभृति चन्द्रगुप्तशरीरे सहस्रगुणमप्रमत्तश्चाणक्य इति श्रुत्वा तद्वधोपाये निराशः सन्राक्षसः—आशा बलवती राजन् शल्यो जेष्यति पाण्डवानितिन्यायेन—अतः परं स्तनकलशद्वारा मौर्यचाणक्ययोर्मिथो विरोधेन स्वेष्टसिद्धिं समाशंसते अपि नामेति ॥

मौर्यस्तेजसीति [तेजसि राजतेजसि वर्तते । राजदर्पाध्मात इत्यर्थः । जातस्मयो जातगर्वः ।] राज्यप्राप्त्या प्रतिज्ञार्णवतरणेन च लब्धान्तरा [भेदविधौ] प्राप्तावसरा कृतकृत्यतैव । उभौ सौहार्दाद्भेत्स्यति उभयोः सौहार्दं विघटयिष्यतीत्यर्थः । उभौ कृतकृत्यतया परस्परं निरपेक्षौ मन्तौ केनचिन्निमित्तेन विरोधे सति पुनर्न सन्धास्येते इति भावः । इत्थं पताकाप्राप्त्याशानुगुण्येन गर्भसन्धेर्द्वादशाङ्गानि निरूपितानि गर्भसन्धिश्च समाप्तः ॥

इति त्र्यम्बकयज्वप्रभुवर्याश्रितढुण्ढिराजव्यासयज्वविरचिते ।
मुद्राराक्षसनाटकव्याख्याने द्वितीयोऽङ्कः समाप्तः ॥

तृतीयोऽङ्कः ।

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी—(सनिर्वेदम् ।)

रूपादीन्विषयान्निरूप्य करणैर्यैरात्मलाभस्त्वया
लब्धस्तेष्वपि चक्षुरादिषु हताः स्वार्थावबोधक्रियाः ।
अङ्गानि प्रसभं त्यजन्ति पटुतामाज्ञाविधेयानि ते
न्यस्तं मूर्ध्नि पदं तवैव जरया तृष्णे मुधा[1] ताम्यसि ॥ १ ॥

(परिक्रम्याकाशे ।) भो भोः सुगाङ्गप्रासादाधिकृताः पुरुषाः सुगृहीतनामा देवश्चन्द्रगुप्तो वः समाज्ञापयति । प्रवृत्त[2]कौमुदीमहोत्सवरमणीयतरं[3] कुसुमपुरमवलोकयितुमिच्छामि । तत्संस्क्रियन्ता[4]मस्मद्दर्शन-

---

अथ राक्षसाभिलष्यमाणचाणक्यचन्द्रगुप्तविरोधकथनार्थं विमर्शसन्धिरारभ्यते । तृतीयचतुर्थावङ्कौ विमर्शसन्धिः । 'गर्भसन्धौ प्रसिद्धस्य बीजार्थस्यावमर्शनम् । हेतुना येन केनापि विमर्शः सन्धिरुच्यते ॥' इति लक्षणात् । गर्भसन्धौ प्रसिद्धस्य मुहुरन्विष्टस्य चाणक्यनीतिरूपस्य बीजस्य कौमुदीमहोत्सवप्रतिषेधादिना प्रकरीनाम्न्याल्पया कथया चावमर्शनात् अनुसन्धानात् नियताप्तिप्रकर्योः संबन्धस्य चात्र सत्त्वात् । तृतीयेऽङ्के नियताप्तिः ॥ चतुर्थेऽङ्के राक्षसचारसंवादरूपा कथा प्रकरी वर्ण्यते ॥ नियताप्तिप्रकर्यानुगुण्येनास्य सन्धेस्त्रयोदशाङ्गानि ॥ तत्रापवादसंफेटौ विद्रवद्रवशक्तयः । द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम् । प्ररोचनाविचलनमादानं च त्रयोदश ॥

रूपादीति । [यैः करणैः ज्ञानेन्द्रियैः शब्दादीन् विषयान् निरूप्य भोग्यतयावधार्य त्वयात्मलाभः स्ववृत्तिलाभः कृतस्तेष्वपि चक्षुरादिषु स्वार्थावबोधक्रियाः स्वस्वविषयग्रहणव्यापारा हता नष्टाः । ते आज्ञाविधेयानि निदेशानुवर्तीनि अङ्गानि प्रसभं प्रसह्य पटुतां स्वव्यापारसामर्थ्यं त्यजन्ति । एवमित्यादि ।] यैश्चक्षुरादिभी रूपादिषु विषयेषु गृह्यमाणेषु तत्तद्विषये तृष्णा अभिवर्धते तानीन्द्रियाणि विकलानि सन्ति विषयान्न गृह्णन्ति । यौवने तृष्णावशात् हस्तपादादीन्यङ्गानि स्वक्रियायां व्यापृतान्यासन् तान्यपि संप्रति जरया पटुतो स्वकार्यक्षमतां त्यजन्तीति जरया क्रियमाणं स्वाङ्गवैकल्यं तृष्णायामुपचर्यते ॥ न्यस्तं मूर्ध्नि पदं तवेति । अथापि तृष्णया मुधा ताम्यामीति भावः । कञ्चुकिनिर्वेदो नाटके वर्णनीय इति संप्रदायविदः ॥ १ ॥

---

१ मुधोत्ता०. २ यथा प्र०. ३ ०णीयं. ४ तत् क्रियन्तां.

योग्याः सुगाङ्गप्रासादोपरिभूमय इति । (पुनराकाशे ।) किं ब्रूथ । आर्य किमविदित एवायं देवस्य कौमुदीमहोत्सवप्रतिषेध इति । आः दैवोपहताः किमनेन वः सद्यःप्राणहरेण कथोपोद्घातेन । शीघ्रमिदानीम् ।

आलिङ्गन्तु गृहीतधूपसुरभीन्स्तम्भान्पिनद्धस्रजः
संपूर्णेन्दुमयूखसंहतिरुचां सच्चामराणां श्रियः ।
सिंहाङ्कासनधारणाच्च सुचिरं सञ्जातमूर्च्छामिव
क्षिप्रं चन्दनवारिणा सकुसुमः सेकोनुगृह्णातु गाम् ॥ २ ॥

किं ब्रूथ । आर्य इदमनुष्ठीयते देवस्य शासनमिति । भद्रास्त्वरध्वम् । अयमागत एव देवश्चन्द्रगुप्तः । य एषः ।

सुविश्रब्धैरङ्गैः पथिषु विषमेष्वप्यचलता
चिरं धुर्येणोढा गुरुरपि भुवो यास्य गुरुणा ।
धुरं तामेवोच्चैर्नववयसि वोढुं व्यवसितो
मनस्वी दम्यत्वात्स्खलति च न दुःखं वहति च ॥ ३ ॥

(नेपथ्ये ।) इत इतो देवः । (इदो इदो देवो ।)

अविदित एवायमिति । अयं चाणक्येन क्रियमाण इत्यर्थः । अयं बीजस्य चाणक्यनीतेरवमर्शनम् ।

आलिङ्गन्त्विति । [सम्पूर्णेन्दोः मयूखानां किरणानां संहतेः समूहस्येव रुग् येषां तेषां सचामरणां शोभाः पिनद्धा बद्धाः स्रजो येषु तान् स्तंभानालिङ्गन्तु । चन्दनवारिणा मूर्च्छाहारिणा । सेको गामनुगृह्णातु सोच्छ्वासां करोतु ।] अत्र चामराणां श्रियः स्तम्भानालिङ्गन्तु इत्युक्त्या कामिनामुपभोगः परिस्फुरतीति समासोक्तिरलङ्कारः । अतिगौरवशालि राजसिंहासनं सुगाङ्गभूमौ तिष्ठतीति तद्धारणात्सञ्जातमूर्छामिवेति वस्तूत्प्रेक्षा ॥ २ ॥

सुविश्रब्धैरिति । सुविश्रब्धैर्दृढैः सुप्रयुक्ततया कार्यक्षमैश्चाङ्गैरवयवैः स्वाम्यमात्यादिभिश्च । विषमेषु गहनेषु । पथिषु मार्गेषु । राज्यतन्त्रेषु चाचलता अस्खलता धुर्येण राज्यभारनिर्वहणक्षमेणास्य गुरुणा तातेन या भुवो धूश्चिरमूढेत्यन्वयः । दम्यत्वाद्नतिप्रौढत्वात्स्खलति किंचित्खिद्यते मनस्वित्वादुत्साहवत्वाद्दुःखं च न वहति ॥ ३ ॥

इत इत इति । इयं चूलिका । अन्तर्जवनिकासंस्थैश्चूलिकार्यस्य सूचनेति लक्षणात् ।

---

१ उपरितन. २ देवस्य चन्द्रगुप्तस्य. ३ आकाशे किं कथयन्ति भवन्तः एते त्वरामह इति.

(ततः प्रविशति राजा प्रतीहारी च ।)

राजा—(स्वगतम् ।) राज्यं हि नाम राजधर्मानुवृत्तिपरस्य नृपतेर्महदप्रीतिस्थानम् । कुतः ।

परार्थानुष्ठाने रहयति नृपं स्वार्थपरता
परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः ।
परार्थश्चेत्स्वार्थादभिमततरो हन्त परवान्
परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः ॥ ४ ॥

अपि च ।

दुराराध्या हि राजलक्ष्मीरात्मवद्भिरपि राजभिः । कुतः ।

तीक्ष्णादुद्विजते मृदौ परिभवत्रासान्न सन्तिष्ठते
मूर्खान्द्वेष्टि न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि ।
शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनहो
श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम् ॥ ५ ॥

अन्यच्च कृतककलहं कृत्वा स्वतन्त्रेण किञ्चित्कालान्तरं व्यवहर्तव्यमित्यार्यादेशः । स च कथमपि मया पातकमिवाभ्युपगतः ।

[राजधर्मानुवृत्तिपरस्य राजधर्माननुवर्तमानस्य ।] अप्रीतिस्थानं क्लेशावहमित्यर्थः ॥

परार्थानुष्ठान इति । परार्थानुष्ठाने धर्मतः षष्ठांशदानादिप्रकृतिकार्यपरतन्त्रत्वे स्वार्थपरता स्वच्छन्दविहारादिविषयभोगः नृपं रहयति त्यजति । परित्यक्तस्वार्थः राजा नियतमयथार्थः क्षितिपतिः । ईदृशस्य राजत्वमयथार्थं निष्फलं स्वसुखोपभोगाभावादित्यर्थः । अथापि राजधर्मतया स्वार्थं विहाय प्रजार्थ एवानुष्ठेय इति चेदाग्रहस्तदा राजा पराधीनो जातः । पराधीनस्य भृत्यादेः सौख्यलेशः कुत्रापि नास्तीति लोकानुभवसिद्धमिति भावः ॥ ४ ॥

आत्मवद्भिरिति । समाहितचित्तैरित्यर्थः । [यद्वा कामन्दकोक्तात्मगुणसम्पन्नैः ।]

तीक्ष्णादिति । [तीक्ष्णादुग्रस्वभावाद् उद्विजते मामयं कदाचित्प्रभ्रंशयेदित्युद्विग्ना भवति ।] मृदौ परिभवत्रासान्मृदौ स्थितां मामन्यो बलवान्पराभविष्यतीति तत्र सम्यङ् न तिष्ठति । समवप्रविभ्यः स्थ इति तङ् । लब्धप्रसरा कामुकवशीकरणेन लब्धप्रागल्भ्या वेशवनितेव श्रीर्दुराराध्येत्यर्थः ॥ ५ ॥

---

१ वृत्तस्य. वृत्तिपरतन्त्रस्य २ जडयति. ३ वेत्तु. ४ विद्भिः. ५ मूर्ख. ६ प्यधिकं ७ कंचित्कालम्. ८ उपदेशः. ९ महापातक०.

अथ वा शश्वदार्योपदेशसंस्क्रियमाणमतयः सदैव स्वतन्त्रा वयम् । कुतः ।

इह विरचयन्साध्वीं शिष्यः क्रियां न निवार्यते
त्यजति तु यदा मार्गं मोहात्तदा गुरुरङ्कुशः ।
विनयरुचयस्तस्मात्सन्तः सदैव निरङ्कुशाः
परतरमतः स्वातन्त्र्येभ्यो वयं हि पराङ्मुखाः ॥ ६ ॥

(प्रकाशम् ।) आर्य वैहीनरे सुगाङ्गमार्गमादेशय ।

कञ्चु०—इत इतो देवः । (नाट्येन परिक्रम्य ।) अयं सुगाङ्गप्रासादः । शनैरारोहतु देवः ।

राजा—(नाट्येनारुह्य दिशोवलोक्य ।) अहो शरत्समयसंभृतशोभानां दिशामतिरमणीयता । कुतः ।

शनैः श्यानीभूताः सितजलधरच्छेदपुलिनाः
समन्तादाकीर्णाः कलविरुतिभिः सारसकुलैः ।

आर्योपदेश इति । आर्योपदेशेन संस्क्रियमाणमतयः शिक्ष्यमाणा इत्यर्थः ॥ इह विरचयन्निति । साध्वाचारः शिष्यः गुरुभिर्न नियम्यते अपि त्वनुमोद्यते । त्यक्तसन्मार्गस्य गुरुरङ्कुशः शिक्षकः । विनये गुरुकृतशिक्षणे रुचिर्येषां ते सदाचारास्तु सदा निरङ्कुशाः स्वतन्त्रा एव वयम् । हिशब्दस्त्वर्थे उक्तवैलक्षण्यद्योतकः । एवं स्वातन्त्र्ये सिद्धेपि वयं त्वत एभ्यः । पञ्चम्यास्तसिल् । उक्तविधेभ्यः कंचित्कालं स्वातन्त्र्येण व्यवहर्तव्यमित्यादिष्टेभ्यः स्वातन्त्र्येभ्यः परतरमत्यन्तं पराङ्मुखाः सर्वथा ईदृशं स्वातन्त्र्यं नेच्छामः । किंचित्कार्यानुरोधात्त्वार्यादेशेनेदं स्वातन्त्र्यमात्मन्यध्यस्य स्वतन्त्रवद्व्यवहराम इति भावः । यद्वा आर्यानुरोधादिदं स्वातन्त्र्यं कथंचिभ्युपगतम् । अतः परतरं अत उत्तरे काले । कालाध्वनोरत्यन्तसंयोगे द्वितीया । स्वातन्त्र्येभ्यो वयं पराङ्मुखाः । अतः परं कदापि स्वातन्त्र्यं नेच्छामः । आर्याधीना एव सर्वदा वर्तामहे इति भावः ॥ ६ ॥

शनैरिति । शनैः क्रमेण श्यानीभूताः कृशीभूताः । संयोगादेरातो धातोर्यण्वत् इति श्यायतेर्निष्ठानत्वम् । विरलतया प्रतीयमाना दिशः सरितश्च नभस्तः वियत्तः श्रावणमासाच्च । 'नभाः श्रावणिकश्च स' इत्यमरः । स्यन्दन्ते निःसृता इव दृश्यन्ते । प्रावृषि दिशः सरितश्च घनावृततया सर्वत उत्कूलसलि-

---

१ मनसः. २ विचार्यते. ३ शोभां बिभ्रतीनां, शोभाविभूतीनां. ४ संप्रति हि. ५ श्यामी०, शान्ताः. ६ पुरस्तात्.

चिताश्चिन्नाकारैर्निशि विकचनक्षत्रकुमुदै-
र्नभस्तः स्यन्दन्ते सरित इव दीर्घा दश दिशः ॥ ७ ॥

अपि च ।

अपामुद्वृत्तानां निजमुपदिशत्या स्थितिपदं
दधत्या शालीनामवनतिमुदारे सति फले ।
मयूराणामुग्रं विषमिव हरन्त्या मदमहो
कृतः कृत्स्नस्यायं विनय इव लोकस्य शरदा ॥ ८ ॥

इमामपि ।

भर्तुस्तथा कलुषितां बहुवल्लभस्य
मार्गे कथंचिदवतार्य तनूभवन्तीम् ।
सर्वात्मना रतिकथाचतुरेव दूती
गङ्गां शरन्नयति सिन्धुपतिं प्रसन्नाम् ॥ ९ ॥

लाप्लततया च विविक्तत्वेन न गृह्यन्ते शरदि तु विरलाः स्फुटं प्रतीयन्ते इति भावः । अत्र शरदि दिशां सरितां च वर्ण्यत्वादिवशब्दमावर्त्य दिशः सरित इव सरितश्च दिश इवेति च परस्परमुपमानोपमेयभावः । सितजलधरच्छन्दपुलिनाः विकचनक्षत्रकुमुदैरित्यत्र चोपमितसमासः । एवं च पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता इत्युपमेयोपमालङ्कारः । धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयीति अत्र पूर्णश्रीत्ववत् । श्यानीभूता इत्यादिसाधारणधर्मोपादानम् । अतः पूर्णेयमुपमा । सा च नभस्त इति श्लेषानुप्राणता । अनेन शरद्गुणकथनेन स्वस्य जैत्रयात्रासन्नाहसमय इति ध्वनितम् । वक्ष्यति च चाणक्यः सोयं व्यायामकालो नोत्सवकाल इति ॥ ७ ॥

अपामिति । [उद्वृत्तानां प्रवृद्धानामुद्धतानां च । स्थितिपदमवस्थानभूमिं मर्यादां च । स्थिस्तिपथमिति पाठान्तरम् । शालीनां लक्षणया संभृतसंपदामवनतिं नम्रताम् ।] स्पष्टोर्थः । अनेन पद्येनोद्धतस्य मलयकेतोर्भावी निग्रहः राक्षसस्य विषवदत्युग्रविक्रमनीतिविषयकमदापहरणं साम्राज्यफलशालिनो महोन्नतेश्चन्द्रगुप्तस्य विनयसंपच्च समासोक्त्या सूचिता ॥ ८ ॥

भर्तुरिति । बहुवल्लभस्येति हेतुगर्भविशेषणम् । बहुवल्लभत्वादिव कलुषितामिति कालुष्यहेतूत्प्रेक्षा । सा च वाचकाभावाद्गम्या । वर्षात्ययेन कृशीभवन्तीं स्वच्छसलिलां गङ्गां भर्तुः समुद्रस्य मार्गे कथंजिदवतार्य शरत् सिन्धुपतिं नयति । अत्रोपमा । रथिकथाचतुरा दूतीवेति दूतीदृष्टान्तानुरोधान्नायकापराधकुपितां विरहकृशां नायिकां प्रसादमुखीं कृत्वा नायकं प्रति यथा चतुरदूती प्रापयति तद्वदिति गम्यते ।

(समन्तान्नाट्येनावलोक्य ।) अये कथमप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम् । आर्य वैहीनरे अथास्मद्वचनादाघोषितः कुसुमपुरे कौमुदीमहोत्सवः ।

कञ्चुकी०—अथ किम् ।

राजा—तत्किं न गृहीतमस्मद्वचनं पौरैः ।

कञ्चु०—(कर्णौ पिधाय ।) शान्तं पापं शान्तं पापम् । पृथिव्यामस्खलितपूर्वं देवस्य शासनं कथं पौरेषु स्खलिष्यति ।

राजा—तत्कथमप्रवृत्तकौमुदीमहोत्सवमद्यापि कुसुमपुरम् ।

धूर्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्यो
नालङ्कुर्वन्ति रथ्याः पृथुजघनभराक्रान्तिमन्दैः प्रयातैः ।
अन्योन्यं स्पर्द्धमाना न च गृहविभवैः स्वामिनो मुक्तशङ्काः
साकं स्त्रीभिर्भजन्ते विधिमभिलषितं पार्वणं पौरमुख्याः॥१०॥

अनेन पद्येन राक्षसमतिपरिगृहीततया कलुषितां संशयितामिव नन्दकुललक्ष्मीं चतुरदूतीवातिगभीरा चाणक्यनीतिः सागरवदतिगभीराशयं चन्द्रगुप्तं सर्वात्मना सर्वप्रकारेण प्रापयतीति रूपकातिशयोक्त्या सूचितम् । अयमपि बीजामवर्शः ॥ ९ ॥

धूर्तैरिति । [वेशनार्यो वारस्त्रियः स्फुटाश्च चतुराश्च कथास्तासु कोविदैः पण्डितैर्धूर्तैर्विटैरन्वीयमानाः अनुगम्यमानाः पृथुजघनभराक्रान्तिमन्दैः गुरुजघनभरालसैः प्रयातैर्गमनैः ।] स्वामिनो गृहस्वामिनो वसनभूषणादिसमृद्धिं स्पर्धयान्योन्यमाधिक्येन दर्शयन्तः पौरमुख्याः स्वस्त्रीभिः सार्धं राजानुमतत्वान्मुक्तशङ्का अत एव बहिः क्रीडनं विगीतमपि पावनं राजानुमत्या प्रशस्तमित्यर्थः । चिरादीप्सितं क्रीडाविधिं कुतो न भजन्त इति कञ्चुकिनं प्रति प्रश्नः । पार्वणमिति क्वचित्पाठः । पर्वणि कार्तिक्यां पौर्णमास्यां भवं क्रीडाविधिमियर्थः ॥ १० ॥

एवमेतदिति । चाणक्यकृतं प्रतिषेधं सहसा स्फुटं वक्तुमतिभीतस्येदमस्फुटं सचकितं प्रतिवचनम् ।

---

१ देव आघोषितो देवस्याज्ञया कुसुमपुरे कौमुदीमहोत्सवः. २ पौरजनेन. ३ आर्य वैहीनरे इत्यधिकम्. ४ दूतैः. ५ सायं.

कञ्चु०—एवमेवैतत् ।

राजा—किमेतत् ।

कञ्चु०—देव इदम् ।

राजा—स्फुटं[2] कथय ।

कञ्चु०—प्रतिषिद्धः कौमुदीमहोत्सवः ।

राजा—(सक्रोधम् ।) आः केन ।

कञ्चु०—देव नातः परं[3] विज्ञापयितुं शक्यम् ।

राजा—न खलु आर्यचाणक्येनापहृतः प्रेक्षकाणामतिशय रमणीयश्चक्षुषोः विषयः ।

कञ्चु०—देव कोन्यो जीवितुकामो देवस्य शासनमतिवर्तेत[4] ।

राजा—शोणोत्तरे उपवेष्टुमिच्छामि ।

प्रति०—देव इदं सिंहासनम् । उपविशतु देवः । (देव एदं सिंहासणं । उववसिद देवो ।)

राजा—(नाट्येनोपविश्य ।) आर्य वैहीनरे आर्यचाणक्यं द्रष्टुमिच्छामि ।

कञ्चु०—यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

(ततः प्रविशति आसनस्थः स्वभवनगतः
कोपानुविद्धां चिन्तां नाटयंश्चाणक्यः ।)

चाण[6]०—कथं स्पर्द्धते मया सह दुरात्मा राक्षसः ।

कृतागाः कौटिल्यो भुजग इव निर्याय नगरा-
द्यथा नन्दान्हत्वा नृपतिमकरोन्मौर्यवृषलम् ।

महात्मत्वात्संग्राह्यः । स्वशत्रुपक्षमाश्रित इति रोषावेशाद्दुरात्मेति गालनम् । कृतागा इति । नन्दैः कृतमागोऽग्रासनाकर्षणरूपं यस्य सः । अत्र दृष्टान्तानुरोधेन तथाहं मौर्यं हत्वा मलयकेतुं राज्ये स्थापयिष्यामीत्येतावति वक्तव्ये श्रियमपहरामीत्येतावन्मात्रं राक्षससाहसं अनुवदतश्चाणक्यस्यायं भावः । ममेव नास्य बुद्धिबलं परन्तु मत्सरमात्रेण अशक्तोहं गृहारम्भे शक्तोहं

---

१ देव इत्यधिकम्. २ आर्य स्फुटमभिधीयताम् इति पाठः. ३ परमस्माभिर्देवो विज्ञापयितुं शक्यते. ४ उल्लङ्घयिष्यति. ५ अस्मात्प्राक्-सक्रोधमित्यधिकम्. ६ आत्मगतम् इत्यधिकम्.

तथाहं मौर्येन्दोः श्रियमपहरामीति कृतधीः
प्रकर्षं मद्बुद्धेरतिशयितुमेष व्यवसितः ॥ ११ ॥

(आकाशे लक्ष्यं बद्ध्वा ।) राक्षस राक्षस वि म्यतामस्माद्दुर्व्यसनात् ।

उत्सिक्तः कुसचिवदृष्टराज्यभारो
नन्दोसौ न भवति चन्द्रगुप्त एषः ।
चाणक्यस्त्वमपि च नैव केवलं ते
साधर्म्यं मदनुकृतेः प्रधानवैरम् ॥ १२ ॥

(विचिन्त्य ।) अथ वा नातिमात्रमत्र वस्तुनि मया मनः खेदयितव्यम् कुतः ।

मद्भृत्यैः किल सोपि पर्वतसुतो व्याप्तः प्रविष्टान्तरै-
रुद्युक्ताः स्वनियोगसाधनविधौ सिद्धार्थकाद्याः स्पशाः ।
कृत्वा संप्रति कैतवेन कलहं मौर्येन्दुना राक्षसं
भेत्स्यामि स्वमतेन भेदकुशलं ह्येष प्रतीपं द्विषः ॥ १३ ॥

गृहभञ्जन इति न्यायेन मौर्यापकारमात्राय प्रयतमानः सन्केवलं पौरुषबलमवष्टभ्य मद्बुद्धेः प्रकर्षमतिशयितुं व्यवसित इति अहो राक्षसस्य दुर्व्यवसितमिति । वक्ष्यति च केवलं प्रधानवैरं मदनुकृतेः साधर्म्यमिति ॥ ११ ॥

[दुर्व्यसनाद्दुःसाध्येऽर्थेभिनिवेशात् ।]

उत्सिक्त इति । उद्रिक्त इत्यर्थः । प्रधानवैरं परिवृढद्वेषः केवलं ते तव मदनुकृतेः मदनुकरणस्य संबन्धि मत्स्पर्धाविषयकमिति यावत् । साधर्म्यं समानो धर्मः स्वार्थे ष्यञ् बहुव्रीहेर्भावे वा । न तु बुद्धिप्रकर्षादिः मत्सादृश्ये तव समानो धर्मोस्ति । अनेन यथा नन्दा उन्मूलितास्तथाहमपि मौर्यमुन्मूलयामीति प्रधानवैरमात्रेण मया सह स्पर्धते न तु बुद्धिप्रकर्षेणेति भावः । मदनुकृताविति विषयसप्तम्यन्तः पाठः साधुः ॥ १२ ॥

मद्भृत्यैरिति । प्रविष्टान्तरैर्वशीकृतशत्रुहृदयैर्भागुरायणादिभिः । स्पशा गूढप्रणिधयः । 'अपसर्पश्चरः स्पशः' इत्यमरः । सिद्धार्थकादयो भेदकर्मणि उद्युक्ता एव वर्तन्ते । अहमपि संप्रति चन्द्रगुप्तेन सह कृतककलहं कृत्वा तेनोपायेन प्रतीपमस्मासु प्रतिकूलचारिणं राक्षसं द्विषः सपत्नान्मलयकेतोः सकाशात् भेत्स्यामि तयोर्विरोधं संपादयिष्यमीत्यर्थः । यद्वा प्रतीपमिति विधेयं विशेषणं

---

१ हत २ प्रभावम् ३ प्रत्यक्षवदा० ४ व्यवसितात्. ५ तन्त्रः. ६ च. ७ कुशलस्त्वेष.

(प्रविश्य ।) कञ्चुकी—कंष्टं खलु सेवा ।

भेतव्यं नृपतेस्ततः सचिवतो राज्ञस्ततो वल्लभा-
दन्येभ्यश्च वसन्ति यस्य भवने लब्धप्रसादा विटाः ।
दैन्यादुन्मुखदर्शनोपलपनैः पिण्डार्थमायस्यतः
सेवां लाघवकारिणींकृतधियः स्थाने श्ववृत्तिं विदुः ॥ १४ ॥

(प्ररिक्रम्यावलोक्य च ।) इदमार्यचाणक्यगृहम् । यावत्प्रविशामि । (प्रविश्यावलोक्य च ।) अहो राजाधिराजमन्त्रिणो विभूतिः । तथाहि ।

उपलशकलमेतद्भेदकं गोमयानां
वटुभिरुपहृतानां बर्हिषां स्तूपमेतत् ।
शरणमपि समिद्भिः शुष्यमाणाभिराभि-
र्विनमितपटलान्तं दृश्यते जीर्णकुड्यम् ॥ १५ ॥

द्विष इति षष्ठी । राक्षसं द्विषः प्रतीपं सन्तं भेत्स्यामि प्रतिकूलत्वेनापाय विघट-यिष्यामीत्यर्थः । एष राक्षसः स्वमतेन स्वसंमत्या भेदकुशलोस्तु चन्द्रगुप्ताचाणक्यं भेत्स्यामीति स्वस्मिन्कुशलं मन्योस्तु न त्वस्य ममेव सामग्रीपौष्कल्यं बुद्धिबलं चास्तीति भावः । इयं नियताप्तिः । अपायाभावतः कार्यनिश्चयो नियताप्तिकेति लक्षणात् ॥ १३ ॥

कष्टमिति । सामान्ये नपुंसकम् ।

भेतव्यमिति । दैन्याद्धेतोः उन्मुखदर्शनानि च अपलपनानि च राजरहस्य-गोपनानि च तैः पिण्डार्थमुदरभरणार्थमायस्यतः क्लिश्यमानस्य सेवकजनस्य सेवामित्यन्वयः । [कृतधियः शिक्षितमतयः पण्डिता इत्यर्थः ।] श्वविषये अप लपनं ताडनभयेन गात्रसङ्कोचनम् । सिषाधयिषितकार्यानुरोधादिदमाहितम् । चाणक्यमौर्ययोः कपटवैमत्यं तथ्यत्वेनैव गृह्णतः कञ्चुकिनोयं निर्वेदः ॥ १४ ॥

उपलशकलमेतदिति । त्रेताग्निसंभरणसमिन्धनार्थं शुष्कगोमयगोलकचूर्ण-नार्थमुपलशकलम् । उपलेपि सकलो न संगृहीत इति विभूतिनैरपेक्ष्यमस्योपल-शकलजीर्णकुड्यादिभिरुक्तम् । वर्हिषां दर्भाणां स्तूपं निधननामकमुष्टिसमूहः । शरणं गृहं समिद्भारेण विनमितपटलान्तमतिजीर्णत्वाद्विभुग्नतृणमयछदिप्रान्तं । 'वलीकनीध्रे पटलप्रान्तेथ पटलं छदिः' इत्यमरः । अनेनास्याप्रतिग्रहत्वकर्मठत्वादयः

---

१ कष्टा. २ ०नेन नटनैः. ३ स्तोमः.

तत्स्थाने खल्वस्य वृषलो[1] देवश्चन्द्रगुप्तः । कुतः ।

स्तुवन्ति[2] श्रान्तास्याः क्षितिपतिमभूतैरपि गुणैः
प्रवाचः कार्पण्याद्यदवितथवाचोऽपि पुरुषाः[3] ।
प्रभावस्तृष्णायाः स खलु सकलः स्यादितरथा
निरीहाणामीशस्तृणमिव तिरस्कारविषयः ॥ १६ ॥

(विलोक्य सभयम्) अये तदयमार्यचाणक्यस्तिष्ठति ।

यो नन्दमौर्यनृपयोः परिभूय लोक-
मस्तोदयौ प्रतिदिशन्नविभिन्नकालम् ।
पर्यायपातितहिमोष्णमसर्वगामि
धाम्नातिशाययति धाम सहस्रधाम्नः ॥ १७ ॥

श्रोत्रियगुणा उक्ताः । तथोक्तं पुरस्तात् । वंशे विशालवंशानामृषीणामिव भूयसाम् । अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥ इति ॥ १५ ॥

वृषलोद्य इति । वृषलशब्देन वदितुमर्हः । सुपि क्यप् चेति क्यप् प्रत्ययः । निस्पृहत्वाद्राजानमपि तृणीकृत्य भृत्यवद्व्यपदिशतीत्यर्थः ।

तदेव विवृणोति । स्तुवन्तीति । अवितथवाचः सत्यवचनशीला अपि कार्पण्यात्प्रवाचः उद्दण्डवचनाः सन्तः [श्रान्तास्याः आस्यश्रान्ति यावदित्यर्थः । क्षितिपतिं] अभूतैरसत्यैर्गुणैः स्तुवन्तीति यत्स खलु तृष्णायाः प्रभाव इति योजना ॥ १६ ॥

अये तदयमिति । तदयमिति कर्मधारयसमासः सोयमित्यर्थः ।

यो नन्देति । लोकं नन्दामात्यादिकं परिभूय स्वमन्त्रशक्त्या मोहयित्वा नन्दमौर्ययोरभिन्नकालं युगपदस्तोदयौ दत्तवान् । अत एव सर्वशत्रुव्यापिना स्वेन धाम्ना असर्वगामि पर्यायेण कालक्रमेण पातितं नाशितं हिममुष्णं वा येन तत्सहस्रधाम्नः सूर्यस्य धाम तेजः अतिशाययति अतिक्रामयति । धामातिशेते तेन धाम्ना स्वयं अतिशाययति । सोयमार्यश्चाणक्यस्तिष्ठतीति पूर्वेणान्वयः । अतिपूर्वकाच्छीङो हेतुमण्णिच् । अत्र लोकशब्देन लोकालोकपर्वतो लक्ष्यते । असर्वगामीत्यनेन सूर्यतेजसस्तदनतिक्रमणमुक्तम् । एवं च लोकं परिभूयातिक्रम्य नन्दमौर्ययोर्युगपदस्तोदयौ दिशच्चाणक्यतेजः लोकमनतिक्रामतोत एवासर्वगामिनः क्रमेण हिमोष्णयोरुदयास्तमयौ दिशतः सूर्यतेजसोप्यतिशायितमिति व्यतिरेकालङ्कारः लोकमिति श्लेषानुप्राणितः ॥ १७ ॥

---

१ वृषलोद्यः. २ स्तुवन्तः. ३ कृतिनः. ४ स्वगतम्. ५ दयावदिशदप्रति. ६ ०ष्णिम.

(जानुभ्यां भूमौ निपत्य ।) जयत्वार्यः ।

चाण०—वैहीनरे किमागमनप्रयोजनम् ।

कञ्चु०—आर्य प्रणतिससंभ्रमोच्चलितभूमिपालमौलिमालामाणिक्यशकलशिखापिशङ्गीकृतपादपद्मयुगलः सुगृहीतनामधेयो देवश्चन्द्रगुप्त आर्यं[1] शिरसा प्रणम्य विज्ञापयति । अकृतक्रियान्तरायमार्यं[2] द्रष्टुमिच्छामीति ।

चाण०—वृषलो मां द्रष्टुमिच्छति । वैहीनरे न खलु वृषलस्य श्रवणपथं गतोयं मत्कृतः कौमुदीमहोत्सवप्रतिषेधः ।

कञ्चु०—आर्य अथ किम् ।

चाण०—(सक्रोधम् ।) आः केन कथितम् ।

कञ्चु०—(सभयम्[3] ।) प्रसीदत्वार्यः । स्वयमेव सुगाङ्गप्रासादगतेन देवेनावलोकितमप्रवृत्तकौमुदीमहोत्सवं पुरम् ।

चाण०—आः ज्ञातम् । ततो भवद्भिरन्तरा प्रोत्साह्य कोपितो वृषलः । किमन्यत् ।

कञ्चु०—(भयं नाटयंस्तूष्णीमधोमुखस्तिष्ठति ।)

चाण०—अहो राजपरिजनस्य चाणक्यस्योपरि प्रद्वेषपक्षपातः । अथ क्व वृषलः ।

कञ्चु०—(भयं नाटयन् ।) आर्य सुगाङ्गगतेन[4] देवेनाहमार्यपादमूलं प्रेषितः ।

चाण०—(उत्थाय ।) सुगाङ्गमार्गमादेशय ।

कञ्चु०—इत इत आर्यः । (उभौ परिक्रामतः ।)

कञ्चु०—एष सुगाङ्गप्रासादः । शनैरारोहत्वार्यः[5] ।

चाण०—(नाट्येनावरुह्यावलोक्य च ।) अये सिंहासनमध्यास्ते वृषलः । साधु साधु ।

[प्रणतीति । प्रणतौ प्रणामक्रियायां यः संभ्रमस्त्वरा तेनोच्चलिता ये भूमिपालास्तेषां मौलिमालासु यानि माणिक्यशकलानि तेषां शिखाभिर्दीप्तिभिः पिशङ्गीकृतं पादपद्मयोर्युगलं यस्य । अन्तरायो विघ्नः । अन्तरा मध्ये ।]

---

१ पादपद्मयोरार्यं प्रणिपत्य. २ क्रियन्तारान्तरायमन्तरेण. ३ भयं नाटयन्. ४ सुगाङ्गप्रसाद. ५ आरोढुमर्हत्यार्यः

नन्दैर्वियुक्तमनपेक्षितराजराजै-
रध्यासितं च वृषलेन वृषेण राज्ञाम् ।
सिंहासनं सदृशपार्थिवसङ्गतं च
प्रीतिं परां प्रगुणयन्ति गुणा ममैते ॥ १८ ॥

(उपसृत्य ।) विजयतां वृषलः ।

राजा—(आसनादुत्थाय ।) आर्य चन्द्रगुप्तः प्रणमति । (इति पादयोः पतति ।)

चाण०—(पाणौ गृहीत्वा ।) उत्तिष्ठोत्तिष्ठ वत्स ।

आ शैलेन्द्राच्छिलान्तस्खलितसुरनदीशीकरासारशीता-
त्तीरान्तान्नैकरागस्फुरितमणिरुचो दक्षिणस्यार्णवस्य ।
आगत्यागत्य भीतिप्रणतनृपशतैः शश्वदेव क्रियन्तां
चूडारत्नांशुगर्भास्तव चरणयुगस्याङ्गुलीरन्ध्रभागाः ॥ १९ ॥

राजा—आर्यप्रसादादनुभूयत एव सर्वम् । तदुपविशत्वार्यः । (उभौ यथोचितमुपविष्टौ ।)

चाण०—वृषल किमर्थं वयमाहुताः ।

राजा—आर्यस्य दर्शनेनात्मानमनुग्राहयितुम् ।

चाण०—(सस्मितम् ।) अलमनेन प्रश्रयेण । न निष्प्रयोजनमधिकारवन्तः प्रभुभिराहूयन्ते ।

नन्दैर्वियुक्तमिति । अनपेक्षितराजराजैस्तृणीकृतकुबेरैः। [यद्वा तिरस्कृतप्रधाननृपैः ।] राज्ञां वृषेण श्रेष्ठेन कुबेरवदतिधनाढ्यानपि नन्दान्हत्वा तत्पदे यः कश्चिदयोग्यो न स्थापितः किंतु नन्देभ्योऽप्यतिशयितो धीरोदात्तत्वादिमहाराजगुणोत्तरश्चन्द्रगुप्तोऽभिषेचितः । अतः सिंहासनं योग्यपार्थिवसङ्गतं जातमिति शेषः । इति स्वस्योचितकारित्वादिगुणैः स्वयमन्तस्तुष्यति । प्रीतिं परां प्रगुणयन्ति गुणा ममेत इति । एतेन नन्दोद्धारणादिसाधका मम गुणा ममं प्रीतिं प्रगुणयन्ति वर्धयन्ति ॥ १८ ॥

आ शैलेन्द्रादिति । [शिलान्तः प्रस्तरान्तरेषु स्खलिता या सुरनदी गङ्गा तस्याः सीकरासारेणाम्बुकणवर्षेण शीतात् । नैके अनेके रागा यत्र तद्यथा तथा नकरागं ता नैकरागा इति वा । स्फुरिता मणिरुचो रत्नतेजांसि यस्मिन् तस्मात् तीराच्चागत्यागत्य] शिलान्तस्खलितेत्यादिविशेषणात् शैलेन्द्रो हिमवान्गम्यते । आ हिमाचलादासेतोश्च समागत्य सर्वे नृपतयः त्वां प्रणमन्त्वित्याशीः ॥ १९ ॥

---

१ ०वृत्तेः. २ भृशम्. ३ सिंहासनात्. ४ धुनी ५ युष्मत्प्र०. ६ सर्वमेतन्नाशास्यते. ७ स्मितं कृत्वा. ८ तत्प्रयोजनमाभिधीयताम् इत्यधिकम्.

राजा—आर्य कौमुदीमहोत्सवप्रतिषेधस्य किं फलमार्यः पश्यति।

चाण०—(स्मितं कृत्वा ।) उपालब्धुं तर्हि वयमाहूताः ।

राजा—शान्तं पापं शान्तं पापम् । न हि न हि । विज्ञापयितुम् ।

चाण०—यद्येवं तर्हि विज्ञापनीयानामवश्यं शिष्येण स्वैररुचयो[1] न निरोद्धव्याः ।

राजा—एवमेतत्कः सन्देहः । किं तु न कदाचिदार्यस्य निष्प्रयोजना प्रवृत्तिरित्यस्ति नः प्रश्नावकाशः ।

चाण०—वृषल सम्यग्गृहीतवानसि[3] न प्रयोजनमन्तरा चाणक्यः स्वप्नेऽपि चेष्टत इति ।

राजा—आर्य अत एव शुश्रूषा मां मुखरयति ।

चाण०—वृषल श्रूयताम् । इह खल्वर्थशास्त्रकारास्त्रिविधां सिद्धिमुपवर्णयन्ति राजायत्तां सचिवायत्तामुभयायत्तां चेति । ततः सचिवायत्तसिद्धेस्तव किं प्रयोजनान्वेषणेन । यतो वयमेवात्र नियुक्ता वर्त्स्यामः ।

राजा—(सकोपं मुखं परावर्तयति ।)

(नेपथ्ये वैतालिकौ पठतः ।)

स्मितमिति । इत्यादिदोषप्रख्यापनमपवादः । चाणक्येन स्वोपालम्भस्य दोषस्य प्रख्यापनात् ।

स्वैररुचय इति । स्वैररुचयः [न निरोद्धव्या न व्याहन्तव्याः ।] स्वतन्त्रा गुरवो न निर्बन्धनीया भृत्यवन्नानुयोज्या इति ।

वर्त्स्याम इति । वृतुधातोर्भविष्यति लृटि उत्तमपुरुषबहुवचनम् । न वृद्भ्यश्चतुर्भ्य इतीण्निषेधः । वृद्भ्यः स्यसनोरिति परस्मैपदम् । तत्तत्कार्यानुगुण्येन वर्तिष्यामह इत्यर्थः ॥

---

१ रुचयः स्वतन्त्राः; रुचयोऽनुरोद्धव्याः. २ रुचिः प्रवर्तिष्यत इति. ३ मदाशयामत्यधिकम्. ४ अनवेक्षमाणः. ५ प्रयोजनशु०. ६ अस्मात्प्राक्—तद्यथा. ७ अभियुक्ताः. ८ वेत्स्यामः. ९ सकोप इव.

एकः—

आकाशं काशपुष्पच्छविमभिभवता भस्मना शुक्लयन्ती
शीतांशोरंशुजालैर्जलधरमलिनां क्लिश्नती कृत्तिमैभीम् ।
कापालीमुद्वहन्ती स्रजमिव धवलां कौमुदीमित्यपूर्वा
हास्यश्रीराजहंसा हरतु तनुरिव क्लेशमैशी शरद्वः ॥ २० ॥

अपि च ।

प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणा-
मात्मव्यापारगुर्वी जनितजललवा जृम्भितैः साङ्गभङ्गैः ।
नागाङ्कं मोक्तुमिच्छोः शयनमुरु फणाचक्रवालोपधानं
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥ २१ ॥

आकाशमिति । अपूर्वा कापि लोकोत्तरगुणाभिरामा ऐशी तनुरिव शरद् वः क्लेशं मलयकेतुराक्षसाभियोगजनितं क्लेशं हरतु । कीदृशी ईशतनुः काशपुष्पच्छविमभिभवता तच्छविसदृशेन भस्मना आकाशं शुक्लं कुर्वती शीतांशोश्चूडायां वर्तमानस्यांशुजालैर्जलधरमलिनां जलधरसदृशीं ऐभीं गजासुरसंबन्धिनीं कृत्तीं क्लिश्नती क्लिष्टां कुर्वती तन्नैल्यमभिभवन्तीत्यर्थः । कौमुदीमिव धवलां कापालें स्रजमुद्वहन्ती शरद्विषये भस्मधवलया काशपुष्पच्छव्याकाशं शुक्लयन्तीत्यादि योज्यम् । हास्यश्रीरिव राजहंस्यो यस्यां शरदि राजहंसीव हास्यश्रीर्यस्यां तनावित्युभयत्र विग्रहः । उपमालङ्कारः ॥ २० ॥

प्रत्यग्रोन्मेष इति । शरदि क्षीरनिधौ शेषशयनादुत्थितस्य हरेराकेकरदृष्टिप्रतिपादकानि प्रत्यग्रेत्यादिविशेषणानि । [तदुक्तं—शेते विष्णुः सदाषाढे कार्तिके च विबुध्यते ।] प्रत्यग्रेण निद्राच्छेदानन्तरोदितेनोन्मेषणेनोन्मीलनेन जिह्मा कूणितप्रान्ता । [क्षणं रत्नानि शेषफणामणय एव दीपास्तेषां प्रभाणामि० । आत्मव्यापारे स्वविषयग्रहणरूपे गुर्वी अलसा । अङ्गभङ्गसहितैः जृम्भितैर्मुखविदारणव्यापारैरुत्पन्नाश्रुकणा । 'आकुञ्चितपुटापाङ्गा सङ्गतार्धनिमेषिणी । मुहुर्व्यावृत्ततारा च दृष्टिराकेकरामता ।' इति भरतः ।] स्पष्टमन्यत् । नागाङ्कं शेषपर्यङ्करूपम् । अत्र स्वभावोक्तिरलङ्कारः ॥ २१ ॥

आकाशमिति प्रत्यग्रोन्मेष इति चन्द्रगुप्तवैतालिकेन पठितम् । उत्तरपद्यद्वयं सत्त्वोत्कर्षस्येति भूषणाद्युपभोगेनेति च राक्षसगूढप्रणिधिना वैतालिकवेषधारिणा स्तनकलशनाम्ना चन्द्रगुप्ततेजःसमुत्तेजनार्थं पठितमिति ज्ञेयम् ।

---

१ प्रथमः. २ क्लिन्दतीम्. ३ नागाङ्कम्.

द्वितीयः—

सत्त्वोत्कर्षस्य धात्रा निधय इव कृताः केऽपि कस्यापि हेतो-
र्जेतारः स्वेन धाम्ना मदसलिलमुचां नागयूथेश्वराणाम् ।
दंष्ट्राभङ्गं मृगाणामधिपतय इव व्यक्तमानावलेपा
नाज्ञाभङ्गं सहन्ते नृवर नृपतयस्त्वादृशाः सार्वभौमाः ॥ २२ ॥

अपि च ।

भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः
परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते ॥ २३ ॥

चाण०—(आकर्ण्य स्वगतम् ।) प्रथमं तावद्विशिष्टदेवतास्तुतिरूपेण प्रवृत्तशरद्गुणप्रख्यापनमाशीर्वचनम् । इदमपरं किमिति नावधारयामि । (विचिन्त्य ।) आः ज्ञातम् । राक्षसस्यायं प्रयोगः । दुरात्मन् राक्षस दृश्यसे भोः जागर्ति खलु कौटिल्यः ।

राजा—आर्य वैहीनरे आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय ।

कञ्चु०—यदाज्ञापयति देवः । (इति उत्थाय परिक्रामति ।)

चाण०—(सक्रोधम् ।) वैहीनरे तिष्ठ न गतव्यम् । वृषल किमयमस्थाने महानर्थोत्सर्गः ।

राजा—(सकोपम् ।) आर्येणैवं सर्वत्र निरुद्धचेष्टाप्रसरस्य मे बन्धनमिव राज्यं न राज्यमिव ।

चाण०—वृषल स्वयमनभियुक्तानां राज्ञामेते दोषाः संभवन्ति । तद्यदि न सहसे ततः स्वयमभियुज्यस्व ।

सत्त्वोत्कर्षेति । सत्त्वोत्कर्षस्य बलातिशयस्य केऽपि लोकोत्तरमहिमानः कस्यापि हेतोः विपक्षक्षपणायेत्यर्थः । [यद्वा कस्यापि हेतोः केनापि हेतुना कृतमाज्ञाभङ्गं न सहन्त इति योजना ।] व्यक्तौ प्रसिद्धौ मानावलेपौ येषां ते ॥ २२ ॥

सक्रोधमित्यादि । एतदादि राजचाणक्ययो रोषसंभाषणं संफेटः । वृषलेत्यादि । स्वयमनभियुक्तानां [राज्यतन्त्रे अदत्तावधानानां] स्वातन्त्र्यमलभमानानामेते दोषा गुरुजनगौरवासहनरूपाः संभवन्ति । स्वस्वातन्त्र्यलिप्सया गुरुजनस्वातन्त्र्यं न सहन्त इति भावः । स्वयमभियुज्यस्व स्वातन्त्र्यमवलम्बस्व । [राज्यतन्त्राधिकारं प्रतिपद्यस्वेत्यर्थः ।]

---

१ उपचारेण. २ राक्षसहतक. ३ अर्थव्ययः; ०त्सर्गः क्रियते.

राजा—एते स्वकर्मण्यभियुज्यामहे ।

चाण०—प्रियं' नः । वयमपि स्वकर्मण्यभियुज्यामहे ।

राजा—यद्येवं तर्हि कौमुदीमहोत्सवप्रतिषेधस्य तावत्प्रयोजनं श्रोतुमिच्छामि ।

चाण०—वृषल कौमुदीमहोत्सवानुष्ठानस्य किं प्रयोजनमित्यहमपि श्रोतुमिच्छामि ।

राजा—प्रथमं तावन्ममाज्ञाऽव्याघातः

चाण०—वृषल ममापि तवाज्ञाव्याघात एव कौमुदीमहोत्सवप्रतिषेधस्य प्रथमं प्रयोजनम् । कुतः ।

अम्भोधीनां तमालप्रभवकिसलयश्यामवेलावनाना-
मा पारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितान्तर्जलानाम् ।
मालेवाम्लानपुष्पा तव नृपतिशतैरुह्यते या शिरोभिः
सा मय्येव स्खलन्ती कथयति विनयालंकृतं ते प्रभुत्वम् ॥ २४ ॥

अथ त्वमपरमपि प्रयोजनं श्रोतुमिच्छसि तदपि कथयामि ।

राजा—कथ्यताम् ।

चाण०—शोणोत्तरे मद्वचनात्कायस्थमचलं ब्रूहि यत्तद्भद्रभटप्रभृतीनां [इतोपरागादपक्रम्य मलयकेतुमाश्रितानां] लेख्यपत्रं दीयतामिति ।

एते स्वकर्मणीति । इदं गुरोरवमाननं छलम् । वयमपि स्वकर्मण्यभियुज्यामह इति । स्वकर्मण्यग्निहोत्रादाविति बहिरर्थः । अनेन कपटकलहेन राक्षसवशीकरणकर्मणि व्याप्रियामह इति गूढम् । प्रथममिति । ममाज्ञायाव्याघातजनितो मनस्ताप एव प्रथमफलत्वेन पर्यवसित इति सोल्लुण्ठनं वचनम् ।

इदमेव मुख्यप्रयोजनत्वेन श्लाघ्यतया त्वयानुमन्तव्यमिति समाधत्ते अम्भोधीनामिति । चटुलतिमिकुलेति अम्भोधीनां दुस्तरत्वमुक्तम् । पारेभ्यः परतीरेभ्यः आ पारान्प्राप्तवद्भिः पारङ्गतैरित्यर्थः । अभिविधावाङ् । नृपतिशतैर्या तवाज्ञा शिरोभिरुह्यते वक्ष्यते । वर्तमानसामीप्ये वर्तमानवत् । मदाशिषा मन्त्रीतिबलेन चाम्भोधिपारगानपि द्वीपाधिपानाज्ञाविधेयान्करिष्यसीत्यर्थः । सा मय्येव स्खलति चेत्तव विनयातिशयः प्रभुत्वस्यालङ्करणायैवेति भावः । इत्यादि चाणक्यवचनजातं गुरुकीर्तनं प्रसङ्गः । गुरोः कीर्तनं गुरु बहु वा कीर्तनमित्यन्वर्थात् ॥ २४ ॥

---

१ कल्याणम्. २ नत. ३ प्रथ०. ४ अविहतोऽस्मि इत्यादि०. ५ तत्तावद्दीप०.

प्रती०—यदार्य आज्ञापयति । (इति निष्क्रम्य पुनः प्रविश्य ।) आर्य इदं पत्रकम् । (जं अज्जो आणवेदि । अज्ज इमं पत्तअम् ।)

चाण०—(गृहीत्वा ।) वृषल श्रूयताम् ।

राजा—दत्तावधानोस्मि ।

चाण०—(वाचयति ।) स्वस्ति सुगृहीतनामधेयस्य देवस्य चन्द्रगुप्तस्य सहोत्थायिनां प्रधानपुरुषाणामितोपक्रम्य वध्यमलयकेतुमाश्रितानां प्रमाणलेख्यपत्रमिदम् । तत्र प्रथमं तावद्गजाध्यक्षो भद्रभटः अश्वाध्यक्षः पुरुषदत्तः महाप्रतीहारस्य चन्द्रभानोर्भागिनेयो डिङ्गरातः देवस्य स्वजनसंबन्धी महाराजो बलगुप्तः देवस्यैव कुमारसेवको राजसेनः सेनापतेः सिंहबलस्य कनीयान्भ्राता भागुरायणो मालवराजपुत्रो लोहिताक्षः क्षत्रगणमुख्यो विजयवर्मेति[3] ।

राजा—अथैतेषामपरागहेतून्विज्ञातुमिच्छामि ।

चाण०—वृषल श्रूयताम् । अत्र यावेतौ गजाध्यक्षाश्वाध्यक्षौ भद्रभटपुरुषदत्तनामानौ तौ खलु स्त्रीमद्यमृगयाशीलौ हस्त्यश्वावेक्षणेनभियुक्तौ मयाधिकाराभ्यामवरोप्य स्वजीवनमात्रेणैव स्थापिताविति परपक्षे स्वेन स्वेनाधिकारेण गत्वा मलयकेतुमाश्रितौ । यावेतौ डिङ्गरातबलगुप्तौ तावप्यत्यन्तलोभाभिभूतौ त्वद्दत्तं जीवनमबहु मन्यमानौ तत्र बहु लभ्यत इत्यपक्रम्य मलयकेतुमाश्रितौ । योप्यसौ भवतः कुमारसेवको राजसेन इति सोपि तव प्रसादादतिप्रभूतकोशहस्त्यश्वं सहसैव तन्महदैश्वर्यमवाप्य पुनरुच्छेदशङ्कयापक्रम्य मलयकेतुमाश्रितः । योयमपरः सेनापतेः सिंहबलस्य

दृश्यतामिति । रहस्यत्वाद् दृश्यतां न तु स्फुटं वाच्यतामित्यर्थः ।

कुमारसेवक इति । देवं कौमारमारभ्य सेवत इति कुमारसेवकः ।

सादरमात्मगतं वाचयित्वा वहिर्लोकान्प्रत्यवहेलयति । एतावदिति । इतोपरागादपक्रम्य विपक्षमाश्रितानां किमनेन पत्रदर्शनेनेति भावः । [स्वजीवनं वृत्तिस्तदेव जीवनमात्रं तेन । अति प्रभूताः कोशः हस्तिनोश्वाश्च यस्मिन् ।]

---

१ दृश्यतामिदम्. राजा-आत्मगतं वाचयति. २ सिंहपालस्य. सिंहबलदत्तस्य ३ एतं वयं देवस्य कार्ये अवदितः स्म इति । (प्रकाशम्) आर्य एतावदेतत्पत्रकम् इत्यधिकम्. ४ श्रोतुम्. ५ इत्यपरक्तौ. ६ लुब्धप्रकृती, अतिलोभाभिभूतत्वात्.

कनीयान्भ्राता भागुरायणोऽसावपि तत्र काले पर्वतकेन सह समुत्पन्नसौहार्देस्तत्प्रीत्या च पिता ते चाणक्येन व्यापादित[1] इत्युत्पाद्य रहसि त्रासयित्वा मलयकेतुमपवाहितवान् । ततो भवदपथ्यकारिषु चन्दनदासादिषु[2] निगृहीतेषु स्वदोषाशङ्कयापक्रम्य मलयकेतुमाश्रितः । तेनाप्यसौ मम[3] प्राणरक्षक इति कृतज्ञताम्[4]अनुवर्तमानेनात्मनोनन्तरममात्यपदं ग्राहितः । यौ तौ लोहिताक्षविजयवर्माणौ तावप्यतिमानित्वात्स्वदायादेभ्यस्त्वया दीयमानं मानमसहमानौ मलयकेतुमाश्रितौ । इत्येषामपरागहेतवः ।

राजा—[5]एवमेतेषु परिज्ञातापरागहेतुषु क्षिप्रमेव कस्मान्न प्रतिविहितमार्येण ।

चाण०—वृषल न पारितं प्रतिविधातुम् ।

राजा—किमकौशलादुत प्रयोजनापेक्षया ।

चाण०—कथमकौशलं भविष्यति । प्रयोजनापेक्षयैव ।

राजा—प्रयोजनम्[6]इदानीं श्रोतुमिच्छामि ।

चाण०—श्रूयतामवधार्यतां च इह[7] खलु विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानम्[8]अनुग्रहो निग्रहश्च । अनुग्रहस्तावदाक्षिप्ताधिकारयोर्भद्रभटपुरुषदत्तयोः पुनरधिकारारोपणमेव । अधिकारश्च तादृशेषु व्यसनयोगो[9]दनभियुक्तेषु पुनरारोप्यमाणः सकलमेव राज्यस्य मूलं हस्त्यश्वमवादयेत् । डिङ्गरातबलगुप्तयोरतिलु[10]ब्धयोः सकलराज्यप्रदानेनाप्यपरितुष्यतोरनुग्रहः कथं शक्यः[11] । राजसेनभागुरायणयोस्तु धनप्र[12]णाशभीतयोः कुतोनुग्रहस्यावकाशः ।

इत्युत्पाद्येति । तथ्यमपि तन्मिथ्यात्वेन लोकप्रत्ययनार्थं उत्पाद्येत्युक्तिः । [आत्मनोनन्तरं स्वामिपदानन्तरवर्ति ।] कथमकौशलमित्यादि वचनं विरोधशमनं शक्तिः । किमकौशलादिति कार्याविरोधे पृष्टे तस्य विरोधस्य शमनात् ।

[आक्षिप्त आच्छिन्नोधिकारो ययोः । व्यसनयोगात्स्त्रीमद्याद्यासक्ततया स्वकर्म-

---

१ घातितः. २ दासप्रभृतिषु. ३ ममानेन प्राणाः परिरक्षिता इति. ४ पैतृकं च परिचयमित्यधिकम्. ५ अस्मात्प्राक्-आर्य. ६ अप्रतिविधानप्रयोजनम्. ७ अस्मात्प्राक्-**राजा**—उभयमपि क्रियते । कथ्यताम् । चाण०-वृषल-इत्यधिकम्. ८ तद्यथानुग्रहो. ९ दोष. १० लुब्धप्रकृत्योः. ११ कर्तुं शक्यते. १२ प्राणनाश.

लोहिताक्षविजयवर्मणोरपि दायादमानमसहमानयोरतिमानिनोः कीदृशोनुग्रहः प्रीतिं जनयिष्यतीति परिहृतः पूर्वः पक्षः । उत्तरोपि खलु वयमचिरादधिगतनन्दैश्वर्याः सहोत्थायिनं प्रधानपुरुषवर्गमुग्रेण दण्डेन पीडयन्तो नन्दकुलानुरक्तानां प्रकृतीनामविश्वास्या एव भवाम इत्यतः परिहृत एव । तदेवमनुगृहीतास्मत्पक्षो राक्षसोपदेशप्रवणो महीयसा म्लेच्छबलेन परिवृतः पितृवधामर्षी[2] पर्वतकपुत्रो मलयकेतुरस्मानभियोक्तुमुद्यतः । सोयं व्यायामकालो नोत्सवकाल इति दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदीमहोत्सवेनेति प्रतिषिद्धः ।

राजा—आर्य बहु प्रष्टव्यमत्र ।

चाणः—वृषल विश्रब्धं पृच्छ । ममापि बह्वाख्येयमत्र ।

राजा—सोप्यस्य सर्वस्यानर्थस्य हेतुर्मलयकेतुः कस्मादपक्रामन्नुपेक्षितः ।

चाण०—वृषल अनुपेक्षणे द्वयी गतिः । निगृह्येत वा प्रतिश्रुतं राज्यार्द्धं प्रतिपाद्येत वा । निग्रहे तावत्पर्वतकोस्माभिरेव व्यापादित इति कृतघ्नतायाः स्वहस्तो दत्तः स्यात् । प्रतिश्रुतराज्यार्द्धप्रतिपादनेपि पर्वतकविनाशः केवलं कृतघ्नतामात्रफलः स्यादिति मलयकेतुरपक्रामन्नुपेक्षितः ।

राजा—अत्र तावदेवम् । राक्षसः पुनरिहैव वर्तमान आर्येणोपेक्षित इत्यत्र किमुत्तरमार्यस्य ।

ण्यनवहितेषु । परिहृतोशक्य इति निराकृतः । अनुगृहीतोऽस्माकं पक्षः अस्मत्पक्षीयवर्गो येन । उपदेशप्रवण उपदेशानुवर्ती । पितृवधामर्षी पितृवधजनितक्रोधः ।]

कृतघ्नतायाः स्वहस्त इति । कृतघ्नता दृढा [अस्माभिरेव दृढीकृता] स्यात् । तथा च राक्षसोपरि पातितं तदयशः परिहृतं स्यात् । तच्चानिष्टम् । राज्यार्द्धप्रदाने तव कृत्स्ननन्दराज्यलाभार्थमुपांशुकृतोपि पर्वतकवधो व्यर्थः स्यात् । कृतघ्नतामात्रं फलं यस्य तथोक्तः केवलं स्यात् । किं तया राक्षससाचिव्यलाभविकलया कृतघ्नतया फलम् । अतो मलयकेतूपेक्षणमेव वरम् । अनया प्रकृतया राजकार्यसंविधानप्रणाल्या राक्षसोपसंग्रहसाधकमित्याशयः । कृतघ्नतामात्रफलः स्यादिति । तव संपूर्णनन्दराज्यफलो न स्यादिति भावः ।

अत्र तावदेवमिति । अत्र मलयकेतूपेक्षणे तावदेवमुत्तरं भवतु । राक्षसोपेक्षणं

---

१ दायादमानप्रदानपीडितयोर्मानमप्यपमानं मन्यमानयोरत्यन्तमानिनोः. २ मर्षितः. ३ ०स्यैव. ४ मलयकेतोरपक्रमणानु०. ५ स्वयं हस्तः. ६ विनाशेकृतघ्ननामात्रपरिहारः स्यात्.

चाण०—राक्षसोपि स्वामिनि स्थिरानुरागित्वात्सुचिरमेकत्र वासाच्च शीलज्ञानां नन्दानुरक्तानां प्रकृतीनामत्यन्तविश्वास्यः प्रज्ञापुरुषकाराभ्यामुपेतः सहायसंपदाभियुक्तः कोशवानिहैवान्तर्नगरे वर्तमानः खलु महान्तमन्तःकोपमुत्पादयेत्। दूरीकृतस्तु बाह्यकोपमुत्पादयन्नपि कथमप्युपायैर्वशयितुं शक्य इत्ययमत्रस्थ एव हृदयेशयः शङ्कुरिवोद्धृत्य दूरीकृतः।

राजा—आर्य कस्माद्विक्रम्य न गृहीतः।

चाण०—राक्षसः खल्वसौ। विक्रम्य गृह्यमाणो युष्मद्बलानि बहूनि नाशयेत्स्वयं वा विनश्येत्। एवं सत्युभयथापि दोषः। पश्य।

स हि भृशमभियुक्तो यद्युपेयाद्विनाशं
ननु वृषल वियुक्तस्तादृशेनासि पुंसा।
अथ तव बलमुख्यान्घातयेत्सापि पीडा
वनगज इव तस्मात्सोऽभ्युपायैर्विनेय॥ २५॥

राजा—न शक्नुमो वयमार्यस्य वाचं वाचमतिशयितुम्। सर्वथा अमात्यराक्षस एवात्र प्रशस्यतरः।

चाण०—(सक्रोधम्।) न भवानिति वाक्यशेषः। मा तावत्। भो वृषल तेन किं कृतम्॥

तु सर्वथानुचितमिति राक्षसपक्षपातं दर्शयन्निवाह। अत्रेत्यादि। [शीलज्ञानां सच्चरितं जानतां। सहायसंपत्पुरुषबलम्। अन्तः प्रकोपमन्तर्वर्तिनां पुरोहितामात्यादीनां सेनापत्यादीनां चानुरक्तेर्भ्रंशनम्।]

[स इति। स राक्षसोत्यन्तं पीडितः सन्। हे वृषल तादृशेन तादृग्गुणवता कार्यधुरन्धरेण पुरुषेण वियुक्तोसि भविष्यसि। यदस्माकमनिष्टतमम्। अथेति पक्षान्तरे। तव प्रधानयोधान् घातयेत् सापि पीडास्माकं हानिकारिणीत्यर्थः॥ २५॥]

न शक्नुम इति। मया क्वचित्कार्यविरोधे पृष्टे मतिबलेन केवलं समाधत्से राक्षसोपेक्षणं तु सर्वथानुचितमिति भावः। न भवानिति। वाक्यशेषो मास्तु नाम। तस्मिन्को गुणो दृष्ट इति पृच्छति मा तावदिति।

---

१ वृषल, रा० २ एवात्र ३ कोशबलवान् ४ बाह्यार्थं विकुर्वन्नपि ५ न दुःखसाध्यो भविष्यतीत्यतोपक्रामन्नुपेक्षितः। **राजा**—तत्किमर्थमिहस्थ एवोपायैर्नोपक्रान्तः॥ **चाण०**-अथ कथमपक्रान्तो भविष्यति। ननूपायैरेवासौ हृदयेशयः शङ्कुरिवोद्धृत्य दूरीकृतः। दूरीकरण्यस्य चोक्तं प्रयोजनम् ६ अस्मात्राक्—वृषल ७ उपयुक्त. ८ नाशयन्. ९ नवगज. १० मतिम्.

राजा—यदि न ज्ञायते तदा श्रूयताम्। तेन खलु महात्मना।

लब्धायां पुरि यावदिच्छमुषितं कृत्वा पदं नो गले
व्याघातो जयघोषणादिषु बलादस्मद्बलानां कृतः।
अत्यर्थं विपुलैः स्वनीतिविभवैः संमोहमापादिता
विश्वास्येष्वपि विश्वसन्ति मतयो न स्वेषु वर्गेषु[1] नः॥ २६॥

चाण०—(विहस्य।) एतत्कृतं राक्षसेन[2]। वृषल मया पुनर्ज्ञातं नन्दमिव भवन्तमुद्धृत्य भवानिव भूतले मलयकेतू राजाधिराजपदे नियोजित इति।

राजा—अन्येनैवेदमनुष्ठितं किमत्रार्यस्य।

चाण०—हे मत्सरिन्।

आरुह्यारूढकोपस्फुरणविषमिताग्राङ्गुलीमुक्तचूडां
लोकप्रत्यक्षमुग्रां सकलरिपुकुलोत्सादंदीर्घां प्रतिज्ञाम्।

लब्धायामिति। अस्यायमर्थः। अस्माभिर्निद्रासारप्रसारतया बलवदुपनिरुद्धं पुरमसुरक्षं पश्यन्नभयमस्मत्तो याचमान इव पुरमस्मदर्धीनं कर्तुमस्मद्बलान्यन्तः प्रवेश्याभिलब्धायां वशीकृतायां पुर्यस्मदीयजयापादनघोषणाय प्रवृत्तान्यपि तानि बलानि बलाद्व्याहत्य निगृह्य बहिः स्थितान्बलवतोऽप्यस्मानगणयन्नस्मदुपांशुवधाय विषकन्यानियोजनकूटतोरणशयनगृहनिर्माणादिस्वकार्यसाधनपर्यन्तमन्तर्नगर एव कंचितत्कालं स्वच्छन्दमुषितवान्। अनन्तरमुपांशु सुहृद्या सर्वार्थसिद्धिमपवाह्य स्वयमपि निर्गत्य बहिः सुहृद्बलमुत्थाप्य पुनरप्यस्मानभियोक्तुमुद्यतः। एवं स्वनीतिविभवैरनेन संमोहिता अस्मन्मतयो विश्वास्येष्वपि जीवसिद्धिभागुरायणप्रभृतिषु स्वेषु वर्गेषु न विश्वसन्ति यतो वयं तानपि पुरान्निःसारितवन्त इत्यहो मतिमानतिशूरः साहसी महात्मा राक्षस इति॥ २६॥

विहस्येत्यादि। इदं राक्षसनीतिविभवाधिक्षेपार्थं सोत्प्रासवचनं स्वशक्तिशंसनं व्यवसायः। नन्दोद्धरणमौर्याधिराज्यस्थापनहेतोः स्वशक्तेः प्रशंसनात्।

अन्येनैवेदमिति। इदं नन्दोद्धरणमित्यर्थः। इयं गुरुतिरस्कृतिर्द्रवः। हे मत्सरिन्निति। मत्सरः परोत्कर्षासहनम्।

आरुह्यारूढेति। [आरुढः यः कोपस्तस्य स्फुरणेन] प्रवृद्धकोपावेशेन विषमिताभिर्विसंष्ठुलं प्रचलिताभिरग्राङ्गुलीभिरङ्गुल्यग्रैर्मुक्ता चूडा शिखा यस्याम्। सकलानां रिपूणामुत्सादनाय कालविलम्बात्प्रतिज्ञाया दीर्घत्वम्। [यद्वा दीर्घां महतीं कठिनामिति

---

१ वर्येषु २ एतदनन्तरं-**राजा**-अथ किम्। एतत्कृतममात्यराक्षसेन। **चाण०**-वृषल. ३ च्छेद.

केनान्येनावलिप्ता नवनवतिशतद्रव्यकोटीश्वरास्ते
नन्दाः पर्यायभूताः पशव इव हताः पश्यतो राक्षसस्य ॥ २७ ॥

अपि च ।

गृध्रैराबद्धचक्रं वियति विचलितैर्दीर्घनिष्कम्पपक्षै-
धूमैर्ध्वस्तार्कभासां सघनमिव दिशां मण्डलं दर्शयन्तः ।
नन्दैरानन्दयन्तः पितृवननिलयान्प्राणिनः पश्य चैतान्
निर्वान्त्यद्यापि नैते स्रुतबहलवसावाहिनो हव्यवाहाः ॥ २८ ॥

राजा—अन्येनैवेदमनुष्ठितम् ।

चाण०—आः केन ।

राजा—नन्दकुलविद्वेषिणा दैवेन ।

चाण०—दैवमविद्वांसः प्रमाणयन्ति ।

राजा—विद्वांसोप्यविकत्थना भवन्ति ।

चाण०—(सकोपम्[1] ।) वृषल भृत्यमिव मामारोढुमिच्छसि ।
शिखां मोक्तुं बद्धामपि पुनरयं धावति करः
(भूमौ पादं प्रहृत्य[2] ।)

यावत् ।] ईदृशीमुग्रां प्रतिज्ञामारुह्य कृत्वा केनान्येन नन्दाः पर्यायभूता एकस्यां तस्यां दामनिबद्धाः पशव इव क्रमेण हता इत्यन्वयः । पश्यतो राक्षसस्य पश्यन्तं राक्षसमनादृत्येत्यर्थः । षष्ठी चानादर इति षष्ठी ॥ २७ ॥

गृध्रैरिति । वियति आबद्धचक्रं विरचितमण्डलं यथा तथा विचलितैर्दीर्घा निष्कम्पाः पक्षा येषां तैर्गृध्रैरेव धूमैरिति व्यस्तरूपकम् । चिताग्नीनां ज्वलदङ्गारमात्र-शेषतया सहजधूमाभावात् गृध्रा एव धूमत्वेन निरूपिताः । तैर्गृध्रधूमैर्ध्वस्तार्कभासां तिरोहितसूर्यतेजसां दिशां मण्डलं सघनमिव मेघमण्डलप्रच्छादितमिवेत्युत्प्रेक्षा दर्श-यन्तः बहलवसावशेषैर्नन्दैः श्मशाननिलयान्प्रेतवृकादीन् । एतान्प्राणिनः प्रीणयन्तः एते परितः श्मशानेषु दृश्यमाना हव्यवाहा अद्यापि न निर्वान्ति न शाम्यन्ति । पश्य चेति वाक्यार्थः कर्म । अतिक्रान्तोप विषये रोषावेशवशादेतानेत इति च बुद्धौ प्रत्य-क्षीकृत्य निर्देशः । नन्दकुलनिर्दहनक्रोधोद्यापि न शान्त इत्यर्थः । अयं वधरूपो विद्रवः ॥ २८ ॥

आः केनेति । इयं तर्जनरूपा द्युतिः । नन्दकुलविद्वेषिणा दैवेनेति । एतदादि क्रोध-संरब्धयोरन्योन्याधिक्षेपे विरोधनम् । आरोढुमिच्छसीति । अधिक्षेप्तुं प्रवर्तसे इत्यर्थः । शिखामिति । तीर्णप्रतिज्ञत्वाद्बद्धुमिष्टामपि न बध्नामीत्यर्थः । शिखाया अद्यापि

---

१ कोपं नाटयन्. २ पादप्रहारं दत्वा.

प्रतिज्ञामारोढुं पुनरपि चलत्येष चरणः ।
प्रणाशान्नन्दानां प्रशममुपयातं त्वमधुना
परीतः कालेन ज्वलयसि मम क्रोधदहनम् ॥ २९ ॥

राजा—(सावेगमात्मगतम् ।) अये कथं सत्यमेवार्यः कुपितः । तथाहि ।

संरम्भोत्स्पन्दिपक्ष्मक्षरदमलजलक्षालनक्षामयापि
भ्रूभङ्गोद्भेदधूमं ज्वलितमिव पुरः पिङ्गया नेत्रभासा ।
मन्ये रुद्रस्य रौद्रं रसमभिनयतस्ताण्डवेषु स्मरन्त्या
सञ्जातोग्रप्रकम्पं कथमपि धरया धारितः पादघातः ॥ ३० ॥

चाण०—(कृतककोपं संहृत्य ।) वृषल वृषल अलमुत्तरोत्तरेण । यद्य-स्मत्तो गरीयान्राक्षसोऽवगम्यते तदिदं शस्त्रं तस्मै दीयताम् । (इति शस्त्रमुत्सृज्योत्थाय चाकाशे लक्ष्यं बद्ध्वा स्वगतम् ।) राक्षस राक्षस एष भवतः कौटिल्यबुद्धिविजिगीषोर्बुद्धेः प्रकर्षः ।

न बद्धत्वान्निर्वहणान्ते भंत्स्यमानत्वात् । तीर्णप्रतिज्ञेन मया केवलं बध्यते शिखेति वक्ष्यति । प्रतिज्ञामारोढुमिति । कालेन मृत्युना परीतः वशीकृत इवेति लुप्तोपमा । न तु त्वं कालपरीतः चिरंजीवित्वेन वर्धिष्णुत्वादितिभावः । अत्रवीरो रसः स्थायी क्रोधेनानुभावेन पौष्कल्यं नीतः ॥ २९ ॥

अये कथं सत्यमेवार्यः कुपित इति । मया तदाज्ञयैव कार्यानुरोधकैतवेन कोपितोपीति शेषः ।

संरम्भोत्स्पन्दीति संरम्भेण क्रोधावेशेनोत्स्पन्दीन्युच्चलितानि पक्ष्माणि यस्याः । अत एव क्षरता गलतामलजनेन क्रोधाश्रूणा यत्क्षालनं तेन क्षामया रूक्षयापि क्रोधावेशात्पिङ्गयारुणया नेत्रभासा कर्त्र्या भ्रूभङ्गोद्भेदः क्रोधजनितभ्रूविकारविशेषः स एव धूमो यस्मिन्कर्मणि तद्यथा तथा पुरोभागे ज्वलितमिव दीप्तमिव । भावे क्तः । वह्नेर्ज्वलदवस्थायां धूम उद्गच्छतीति वस्तुस्थितिः । ताण्डवेषु पुरुषकर्तृकनृत्यविशेषेषु रौद्रं रसमभिनयतः अभिनीय दर्शयतः रुद्रस्य स्मरन्त्याः । अधीगर्थदयेशां कर्मणीति षष्ठी । धरया पृथिव्या सञ्जातोग्रप्रकम्पं यथा तथा कथमपि कृच्छ्रादार्यस्य पादघातो धारित इत्यन्वयः । रौद्रताण्डवकारिणो रुद्रस्य पादघात इवातिक्रूरश्चाणक्य-पादघात इति रौद्रो रसः । वीररसोऽङ्गम् । इयमुद्वेजनरूपा द्युतिः ॥ ३० ॥

---

१ पुनः २ सोद्वेगम ३ ०म्भोत्स्पन्दि. ४ तोदमक. ५ वरीयान्.

चाणक्यतश्चलितभक्तिमहं सुखेन
जेष्यामि मौर्यमिति संप्रति यः प्रयुक्तः ।
भेदः किलैष भवता सकलः स एव
संपत्स्यते शठ तवैव हि दूषणाय ॥ ३१ ॥

(इति निष्क्रान्तः ।)

राजा—आर्य वैहीनर अतःप्रभृत्यनादृत्य चाणक्यं चन्द्रगुप्तः स्वयमेव राज्यं करिष्यतीति गृहीतार्थाः क्रियन्ता प्रकृतयः ।

कञ्चु०—(आत्मगतम् ।) कथं निरुपपदमेव चाणक्यमिति नार्यचाणक्यमिति । हन्त संगृहीतोधिकारः । अथ वा न खल्वत्र वस्तुनि देवदोषः । कुतः ।

स दोषः सचिवस्यैव यदसत्कुरुते नृपः ।
याति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम् ॥ ३२ ॥

राजा—आर्य किं विचारयसि ।

कञ्चु०—देव न किंचित् । दिष्ट्या देव इदानीं देवः संवृत्तः । (निष्क्रान्तः ।)

राजा—(आत्मगतम् ।) एवमस्मासु गृह्यमाणेषु स्वकार्यसिद्धिकामः सकामो भवत्वार्यः । (प्रकाशम् ।) शोणोत्तरे अनेन शुष्ककलहेन शिरोवेदना मां बाधते । शयनगृहमादेशय ।

प्रती०—एतु एतु देवः । (एदु एदु देवो ।)

राजा—(आत्मगतम् ।)

चाणक्यत इति । दूषणायानिष्टायेत्यर्थः । इदं स्वगुणाविष्करणं विचलनम् ॥ ३१ ॥

स दोष इति । नृपः सचिवमसत्कुरुते नाद्रियते । आदरानादरयोः सदसती । इति यत्स सचिवस्यैव दोषः न नृपस्य । व्यालत्वेन दुष्टगजत्वेन गजः वाच्यतां निन्द्यतां यन्तुः प्रमादेनैव याति न स्वतः । यन्ता शिक्षणेवहितश्चेद्गजोपि विनीतो वशीभवतीत्यर्थः ॥ ३२ ॥

एवमिति । एवमावयोः कृतेपि विरोधे लौकैस्तथ्यत्वेन गृहीते आर्यचिकीर्षितो मलयकेतुराक्षसयोर्विरोधः सुष्ठु संपत्स्यत इति भावः । इदं सिद्धवद्भाविश्रेयःकथनं प्ररोचना ।

---

१ स्व०. २ वत. ३ राज्यकार्याणि, राजकार्याणि. ४ संहृताधिकारः. ५ देवं दोषेणावगन्तुमर्हामि. ६ किंचिद्विचारयामि । किन्त्वेतच्चिन्तयामि । दिष्ट्या. शिरोव्यथा. ८ आसनादुत्थायात्म०.

आर्याज्ञयैव मम लङ्घितगौरवस्य
बुद्धिः प्रवेष्टुमिव भूविवरं प्रवृत्ता ।
ये सत्यमेव हि[1] गुरूनतिपातयन्ति
तेषां कथं नु हृदयं न भिनत्ति लज्जा ॥ ३३ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति कृतककलहो नाम तृतीयोऽङ्कः ।

चतुर्थोऽङ्कः ।

(ततः प्रविशत्यध्वगवेषः पुरुषः ।)

पुरु०—आश्चर्यमाश्चर्यम् । (ही हीमाणहे हीमाणहे ।)

राजनियोगो महीयान्को नाम गतागतमिह करोति ।
अस्थानगमनगुर्वी प्रभोराज्ञा यदि न भवति ॥ १ ॥
राअणिओओ महिओ को णाम गआगअमिह करेइ ।
अत्थाणगमणगुव्वी पहुणो अण्णा जइ ण होइ ॥ १ ॥

यावदमात्यराक्षसस्यैतद्गेहं गच्छामि । (श्रान्तवत्परिक्रम्य ।) कोऽत्र दौवारिकाणाम् । निवेदय भर्त्रेमात्यराक्षसाय एष करभकस्त्वरयन्पाटलिपुत्रादागत इति । (जाव अमच्चरक्खसस्स एदं गेहं गच्छामि । को[2] एत्थ दुवारिआणं । णिवेदेह भट्टिणो अमच्चरक्खसस्स एसो करभओ तुवरन्तो पाटलिपुत्तआदो आगदोत्ति ।)

(प्रविश्य ।) दौवारिकः—भद्र मा उच्चैः मन्त्रयस्व । एषोमात्यः कार्यचिन्ताजनितेन जागरेण समुत्पन्नशीर्षवेदनोद्यापि शयनं न मुञ्चति । तस्मात्तिष्ठ मुहूर्तम् । लब्धावसरस्तव आगमनं निवेदयामि । (भद्द

आर्याज्ञयैवेति । भूविवरं प्रवेष्टुं लज्जातिशयेन स्वविलयमभ्युपगन्तुमिव प्रवृत्तेत्यर्थः । इत्थमत्र नियताप्तिः प्रदर्शिता ॥ ३३ ॥

इति श्रीत्र्यम्बकयज्वप्रभुवर्याश्रितढुण्ढिराजव्यासयज्वविरचिते
मुद्राराक्षसनाटकव्याख्याने तृतीयोऽङ्कः समाप्तः ।

अथ चतुर्थेङ्के राक्षसचारसंवादरूपाल्पा कथा प्रकरी कथ्यते । ही हीमाणहे इति । अयं निपातसमुदाय आश्चर्यद्योतकः । जोअणसअँसमहिअं इति क्वचित्प्रथमपादे पाठः । योजनशतसमाधिकं यथा तथेति क्रियाविशेषणम् । अस्थानगमन इति । अस्थाने अकाण्डे एव गमने प्रस्थानविषये गुर्वी अनतिक्रमणीया ॥ १ ॥

---

१ न गुरून्प्रतिमानयन्ति. २ भोः को. ३ सअ.

मौ उच्चं मन्तेहि । एसो अमच्चो कज्जचिन्ताजणिदेण जाअरेण समुप्पण्णसीसवेअणो अज्जवि सअणं ण मुञ्चदि । ता चिठ्ठ मुहुत्तअं । लद्धावसरो तुह आअमणं णिवेदेमि ।)

करभकः--भद्रमुख तथा कुरु (भद्दमुह तह करेहि ।)

(ततः प्रविशति शयनगृहगत आसनस्थः शकटदासेन सह सचिन्तो राक्षसः ।)

राक्ष०—(आत्मगतम् ।)

मम विमृशतः कार्यारम्भे विधेरविधेयता-
मपि च कुटिलां कौटिल्यस्य प्रचिन्तयतो मतिम् ।
अथ च विहिते मत्कृत्यानां निकाममुपग्रहे
कथमिदमिहेत्युन्निन्द्रस्य प्रयात्यनिशं निशा ॥ २ ॥

अपि च ।

कार्योपक्षेपमादौ तनुमपि रचयंस्तस्य विस्तारमिच्छ-
न्बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च ।
कुर्वन्बुद्ध्या विमर्शं प्रसृतमपि पुनः संहरन्कार्यजातं ।
कर्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा ॥ ३ ॥

ममेति । मम कार्यारम्भे कार्यारम्भप्रभृति विधेर्दैवस्याविधेयतां [अवशंवदतां] प्रतिकूलतां विमृशतः [चिन्तयतः । तथा च चाणक्यस्य कुटिलां वक्रतया दुरधिगमां मतिं बुद्धिप्रभावं च विशेषेण चिन्तयतः ।] मत्कृत्यानां विषकन्यादिकपटकार्याणामुपग्रहे निरोधे अन्यथाभावे [विहिते] कथमिदमिह राजकार्यं भविष्यतीत्युन्निद्रस्य [उद्गता निद्रा यस्य गतनिद्रस्य मम] अनिशं निशा प्रयातीत्यन्वयः ॥ २ ॥

कविरत्राद्भुततरनीतिविषयकस्वसंविधानक्लेशं राक्षसवचनव्याजेन प्रस्तौति कार्योपक्षेपमिति । कार्योपक्षेपं बीजन्यासं तनुं स्तोकोद्दिष्टमादौ मुखसन्धौ रचयंस्तस्य बीजस्य विस्तारं व्यक्तिं प्रतिमुखसन्धाविच्छन्कुर्वन् गर्भितस्य दृष्टनष्टस्य बीजस्य गहनं फलं गूढं यथा तथा गर्भसन्धावुद्भेदयन् अन्विष्यन्विमर्शसन्धौ तस्यैव बीजस्य बुद्ध्या विमर्शमनुसन्धानं कुर्वन् प्रसृतमपि यथायथं विप्रकीर्णमपि कार्यजातं मुखसन्ध्याद्यर्थजातं निर्वहणसन्धौ संहरन्नैकार्थ्यमुपनयन् नाटकानां कर्ता वा तथा आदौ गूढमारब्धं राजकार्यजातं अन्तरान्तरा विस्तारयन्गर्भितानां गूढानां बीजानां मन्त्राणां फलं साध्यं मुहुरुद्भेदयन् उन्नयन् बुद्ध्या विमृशंश्च आयतौ प्रसृतं शुभोदर्कं संहरन्नुपसंहरन् अस्मद्विधो मन्त्री वा महान्तमायासमनुभवतीत्यर्थः ॥ ३ ॥

---

१ सणेहि. २ एसो क्खु भठ्ठा अमच्चरक्खसो. ३ अपि सविहिते मत्कृ०:-विहिते मत्कृत्वा०. ४ प्रयान्ति निशाः.

तदपि नाम दुरात्मा चाणक्यबटुः—

(उपसृत्य ।) **दौवारिकः**—जयतु (जेदु ।)

राक्ष०—अतिसन्धातुं शक्यः स्यात् ।

दौवा०—अमात्यः । (अमच्चो ।)

राक्ष०—(वामाक्षिस्पन्दनं सूचयित्वा आत्मगतम् ।) दुरात्मा चाणक्यबटुर्जयत्वतिसन्धातुं शक्यः स्यादमात्य इति वागीश्वरी वामाक्षिस्पन्दनेन प्रस्तावगतो प्रतिपादयति । तथापि नोद्यमस्त्याज्यः । (प्रकाशम् ।) भद्र किमसि वक्तुकामः ।

दौवा०—अमात्य करभको द्वारि तिष्ठति । (अमच्चे करभओ दुआरे चिट्ठदि ।)

राक्ष०—शीघ्रं प्रवेशय ।

दौवा०—तथा (इति निष्क्रम्य पुरुषमुपसृत्य ।) भद्र उपसर्प अमात्यम् (। तह । भद्द उपसप्प अमच्चम् ।) (इति निष्क्रान्तः ।)

कर०—(उपसृत्य ।) जयत्वमात्यः (जेदु अमच्चो ।)

राक्ष०—भद्र उपविश ।

कर०—यदमात्य आज्ञापयति । (जं अमच्चो आणवेदि ।) (इति भूमावुपविष्टः ।)

राक्ष०—(आत्मगतम् ।) कस्मिन्प्रयोजने मयायं प्रहित इति प्रयोजनानां बाहुल्यान्न खल्ववधारयामि ।

(इति चिन्तां नाटयति ।)

[अतिसन्धातुं प्रतारयितुम् ।] वागीश्वरीति । वागीश्वरी उपश्रुतिरूपा [वागीश्वरी वाग्देवता यद्वा ईश्वरी वाक्] वामाक्षिस्पन्दनेन प्रस्तावं संवादं गता प्राप्ता सती पूर्वोक्तमर्थं सूचयतीत्यर्थः । इदं कार्यसंग्रहणमादानं नाम विमर्शसन्धेरन्त्यमङ्गम् । चाणक्यकर्तृकस्य राक्षसातिसन्धानरूपस्य कार्यस्य राक्षसेनैव दुरूपश्रुतिदुःशकुनप्रतिपादनद्वारा संग्रहणात् ।

आत्मगतमिति । राक्षसकरभकसंवादावसरे भागुरायणेन मलयकेतुमतिसन्धातुं

---

१ प्रस्तावगतम्. २ एसो क्खु कर०. ३ अविलम्बितं, अवारितम्. ४ भद्द एसो क्खु अमच्चो चिट्ठदि ता. ५ दैवारिकः इत्यधिकम्. ६ जयदु जयदु. ७ (नाट्येनावलोक्य ।) करभक स्वागतम । उपविश्यताम्. ८ कार्याणाम.

(ततः प्रविशति वेत्रपाणिर्द्वितीयः पुरुषः ।)

पुरु०—अपसरत आर्या अपसरत । अपेत मानवा अपेत । किं न पश्यथ । (ओसलेह अज्जा ओसलेह । अवेह माणहे अवेह । किं ण पेक्खह ।)

दूरे प्रत्यासत्तिर्दर्शनमपि दुर्लभमधन्यैः ।
कल्याणकुलधराणां देवानामिव मनुष्यदेवानाम् ॥ ४ ॥
दूले पच्चासत्ती दंसणमवि दुल्लहं अधण्णेहिं ।
कल्लाणकुलहलाणं देआंणं विअ मणुस्सदेआणं ॥ ४ ॥

(आकाशे ।) आर्याः किं भणथ किं निमित्तमपसारणा क्रियते इति । आर्याः एष खलु कुमारो मलयकेतुः समुत्पन्नशीर्षवेदनममात्यराक्षसं प्रेक्षितुमित एवागच्छति । तस्मादपसारणा क्रियते । (इति निःष्क्रान्तः पुरुषः ।) (अज्जा किं भणाह किं णिमित्तं ओसालणा करीअदित्ति । अज्जा एसो क्खु कुमालो मलयकेदू समुप्पण्णसीसवेअणं अमच्चरक्खसं पेक्खिदुं इदो एव आअच्छदि । ता ओसालणा करीअदि ।)

(ततः प्रविशति भागुरायणेन कञ्चुकिना चानुगम्यमानो मलयकेतुः ।)

मल०—(निःश्वस्यात्मगतम् ।) अद्य दशमो मासस्तातस्योपरतस्य न चास्माभिर्वृथापुरुषाभिमानमुद्वहद्भिस्तमुद्दिश्य तोयाञ्जलिरप्यावर्जितः । प्रतिज्ञातमेतत्पुरस्तात् ।

वक्षस्ताडनभिन्नरत्नवलयं भ्रष्टोत्तरीयांशुकं
हा हेत्युच्चरितार्तनादकरुणं भूरेणुरूक्षालकम् ।
तादृङ् मातृजनस्य शोकजनितं संप्रत्यवस्थान्तरं
शत्रुस्त्रीषु मया विधाय गुरवे देयो निवापाञ्जलिः ॥ ५ ॥

तयोः प्रवेशावसरदानाय राक्षसचिन्तानाटनं कविनोपनिबद्धमिति द्रष्टव्यम् । इदमङ्कावतारम् । अत्र राक्षसं प्रति करभकेण वक्ष्यमाणस्य मौर्यचाणक्ययोर्मिथो विरोधस्य पूर्वकार्यानुसङ्गतत्वात् । लक्षणं तु पूर्वमेवोक्तम् । यत्र स्यादुक्तराङ्कार्थ इत्यादिना ।

राज्ञो गमनत्वरासंभ्रमादपसरतापसरतेति पुनरुक्तिः ।

कल्याणकुलधराणामिति । कल्याणकुलं धरन्तीति कल्याणकुलधरा महोन्नतवंशा मनुष्यदेवा राजानः । देवास्तु कल्याणः सुवर्णमयः कुलधरः कुलपर्वतो मेरुर्येषां तथोक्ताः ॥ ४ ॥ आकाशेति । आकाशलक्षणं पूर्वमुक्तम् ।

वक्ष इति । [वक्षसस्ताडनेन भिन्नानि रत्नवलयानि यस्मिन् । भूरेणुभी रूक्षा

---

१ देवाणं च भूमिदेवाणम्. २ देक्खिदुं. ३ अस्मात्प्राक्-अथवा.

किमत्र बहुना ।

उद्यच्छता धुरमकापुरुषानुरूपां
गन्तव्यमाजिनिधनेन पितुः पथा वा ।
आच्छिद्य वा स्वजननीजनलोचनेभ्यो
नेयो मया रिपुवधूनयनानि बाष्पः ॥ ६ ॥

(प्रकाशम् ।) आर्य जाजले एक एवाहममात्यराक्षसस्यातर्कितगमनेन प्रीतिमुत्पादयितुमिच्छामि । तदुच्यन्तामस्मद्वचनादनुयायिनो राजानः कृतमनुगमनक्लेशेनेति ।

कञ्चु०—यदाज्ञापयति कुमारः । (इति परिक्रम्याकाशे ।) भो भो राजानः कुमारः समाज्ञापयति न खल्वहं केनचिदनुगन्तव्य इति । (विलोक्य सहर्षम् ।) कुमारस्याज्ञानन्तरमेव सर्वे राजानः प्रतिनिवृत्ताः । पश्यतु कुमारः ।

सोत्सेधैः स्कन्धदेशैः खरतरकविकाकर्षणात्यर्थभुग्नै-
रश्वाः कैश्चिन्निरुद्धाः खमिव खुरपुटैः खण्डयन्तः पुरस्तात् ।
केचिन्मातङ्गमुख्यैर्विहतजवतया मूकघण्टैर्निवृत्ता
मर्यादां भूमिपाला जलधय इव ते देव नोल्लङ्घयन्ति ॥ ७ ॥

अलकाश्चूर्णकुन्तला यस्मिन् ।] निवापाञ्जलिः श्राद्धतर्पणमिति भावः । पितृदानं निपापः स्यादिति त्रिकाण्डी । वक्षस्ताडनेत्यादि जातिवर्णनम् ॥ ५ ॥

उद्यच्छतेति । उद्यच्छतेत्यत्र यद्यपि समुदाङ्भ्यो यमोऽग्रन्थे इत्यात्मनेपदेन भवितव्यं तथापि स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यतः सूत्रात्कर्त्रभिप्राय इत्यनुवर्तनात्स्वपौरुषोद्यमनक्रियाफलस्य स्वजननीजनलोचनवाष्पापनयनस्य रिपुवधूलोचनगामित्वाभिप्रायेण परस्मैपदं कविना प्रयुक्तमित्यवधार्य सन्तोष्टव्यं वैय्याकरणवर्यैः । आच्छिद्यापनीय रिपुवधेन तन्नयनबाष्प उत्पादिते स्वजननीजनदुःखमपमार्जितप्रायं स्यादित्यर्थः । सुगममवशिष्टम् ॥ ६ ॥ कृतमिति । कृतमित्यव्ययं अलमित्यर्थे ।

सोत्सेधैरिति । खरतराणां तीक्ष्णलोहकण्टककीलितानां कविकानां खलीनानामाकर्षणादत्यर्थं भुग्नैर्नमितैरत एव सोत्सेधैर्मध्यभागोन्नतैः स्कन्धदेशैर्ग्रीवाभागैरुपलक्षिता अश्वाः कैश्चिन्निरुद्धाः । केचित् योधाः । सहसा जवनिरोधे सति मूकघण्टैरिति स्वभावोक्तिः । मातङ्गमुख्यैर्निवृत्ताः जवनान्मातङ्गान्सहसा सन्निगृह्य निवृत्ता इत्यर्थः ॥ ७ ॥

---

१ कुमार कुमार एते भवदाज्ञासमन्तरमेव प्रतिनिवृत्ताः सर्वं एव राजनः. २ सोत्सेकैः ३ मुखरकविकया. ४ खरपदैः.

मल०—आर्य त्वमपि सपरिजनो निवर्तस्व । भागुरायण एको मामनुगच्छतु ।

कञ्चु०—यदाज्ञापयति कुमारः । (इति सपरिजनो निष्क्रान्तः ।)

मल०—सखे भागुरायण विज्ञप्तोहमिहागच्छद्भिर्भद्रभटप्रभृतिभिर्यथा न वयममात्यराक्षसद्वारेण कुमारमाश्रयणीयमाश्रयामहे किंतु कुमारस्य सेनापतिं शिखरसेनं द्वारीकृत्य दुष्टामात्यपरिगृहाच्चन्द्रगुप्तादपरक्ताः कुमारमाभिरामिकगुणयोगादाश्रयणीयमाश्रयामह इति । तन्न मया सुचिरमपि विचारयता तेषां वाक्यार्थोवधारितः ।

भागु०—कुमार न दुर्बोधोयमर्थः । विजिगीषुमात्मगुणसंपन्नं प्रियहितद्वारेणाश्रयणीयमाश्रयेदिति ननु न्याय्य एवायमर्थः ।

मल०—सखे भागुरायण नन्वमात्यराक्षसोस्माकं प्रियतमो हिततमश्च ।

भागु०—एवमेतत् । किंत्वमात्यराक्षसश्चाणक्ये बद्धवैरो न चन्द्रगुप्ते । तद्यदि कदाचिच्चाणक्यमतिजितकाशिनमसहमानः स साचिव्यादवरोपयेत्ततो नन्दकुलभक्त्या नन्दान्वय एवायमिति सुहृज्जनापेक्षया चामात्यराक्षसश्चद्रगुप्तेन सह सदधीत । चन्द्रगुप्तोपि पितृपर्यायागत एवायमिति सन्धिमनुमन्येत । एवं सत्यस्मासु कुमारो न विश्वसेदित्ययमेषां वाक्यार्थः ।

मल०—युज्यते । अमात्यस्य गृहमादेशय ।

भागु०—इत इतः कुमारः । (उभौ परिक्रामतः)

भागु०—इदममात्यगृहम् । प्रविशतु कुमारः ।

मल०—एष प्रविशामि ।

आश्रयामह इति । राक्षसस्य दुष्टत्वं ध्वनयितुं दुष्टामात्येति चाणक्यविशेषणम् । आभिरामिकगुणेति च मौर्यदूषणाय । अवधारित इति । अतःपरं भागुरायणस्य मलयकेत्वतिसन्धानवचनं सर्वं बीजार्थस्यावमर्शनम् । सुहृज्जनेति । सुहृज्जनाश्चन्दनदासशकटदासादयः ।

---

१ शिखरक. २ उरी-उररी-कृत्य. ३ मानिक. ४ कुमार ए०. ५ अमात्यराक्षसस्य.

राक्ष०—(आत्मगतम् ।) अये स्मृतम् । (प्रकाशम् ।) भद्र अपि दृष्टस्त्वया कुसुमपुरे स्तनकलशः ।

पुरु०—अमात्य अथ किम् । (अमच्च अह इं ।)

मल०—(आकर्ण्य ।) भागुरायण कुसुमपुरवृत्तान्तः प्रस्तूयते । न तत्र तावदुपसर्पामः । श्रृणुमस्तावत् । कुतः ।

सत्त्वभङ्गभयाद्राज्ञां कथयन्त्यन्यथा पुरः ।
अन्यथा विवृतार्थेषु स्वैरालापेषु मन्त्रिणः ॥ ८ ॥

भागु०—यदाज्ञापयति कुमारः ।

राक्ष०—भद्र अपि तत्कार्यं सिद्धम् ।

पुरु०—अमात्यप्रसादेन सिद्धम् । (अमच्चप्पसाएण सिद्धम् ।

मल०—सखे भागुरायण किं तत्कार्यम् ।

भागु०—कुमार गहनः सचिववृत्तान्तः । नैतावता परिच्छेत्तुं शक्यते । अवहितस्तावच्छ्रोतुमर्हति कुमारः ।

राक्ष०—भद्र विस्तरेण श्रोतुमिच्छामि ।

पुरु०—श्रृणोत्वमात्यः । अस्ति तावदहममात्येनाज्ञप्तो यथा करभक कुसुमपुरं गच्छ मम वचनेन भण वैतालिकं स्तनकलशं यथा चाणक्यहतकेन तेषु तेष्वाआज्ञाभङ्गेष्वनुष्ठीयमानेषु चन्द्रगुप्त उत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्य इति । (सुणादु अमच्चो । अत्थि दाव अहं अमच्चेणाणत्तो जह करभअ कुसुमपुरं गच्छ मह वअणेण भण वेआलिअं त्थणकलसं जह चाणक्कहदएण तेसु तेसु अण्णाभङ्गेसु अणुचिट्ठीअमाणेसु चन्दउत्तो उत्तेअणसमत्थेहिं सिलोएहिं उवसिलोअइदव्वो त्ति ।)

राक्ष०—भद्र ततस्ततः ।

कर०—ततो मया पाटलिपुत्रं गत्वा श्रावितः अमात्यसन्देशं वैतालिकः स्तनकलशः । अत्रान्तरे नन्दकुलविनाशदूनस्य पौरजनस्य परितोषं समुत्पादयता राज्ञाघोषितः कौमुदीमहोत्सवः । स च चिरकालपरि-

---

सत्त्वभङ्गभयादिति । सत्वभङ्गो मनोभङ्गः । विवृतार्थेषु परस्परविस्पष्टार्थेषु ॥ ८ ॥

---

१ किं कारणामिति· २ गहनः खलु· ३ गच्छिअ...भणिदव्वो त्थुए ..ओ थणकलसो.

वर्तमानो जनितपरिचयोभिमतवधूजनसमागम इव सस्नेहं बहुमानितो नगरजनेन । (तदो मए पाडलिउत्तं गदुअ सुणाविदो अमच्चसन्देसं वेआलिओ त्थणकलसो । एत्थन्तरे णन्दउलविणासदूणस्स मोरजणस्स परितोसं समुप्पादअन्तेण रण्णो आघोसिदो कौमुदीमहोस्सवो । सो अ चिरकालपरिवट्टमाणो जणिदपरिचओ अभिमदवधूजणसमागमो विअ ससिणेहं बहु माणिदो णअरजणेण ।)

राक्ष०—(सबाष्पम् ।) हा देव नन्द ।

कौमुदी कुमुदानन्दे जगदानन्दहेतुना ।
कीदृशी सति चन्द्रेपि नृपचन्द्र त्वया विना ॥ ९ ॥

कर०—ततः स लोकलोचनानन्भूतोनिच्छत एव तस्य निवारितश्चाणक्यहतकेन । अत्रान्तरे स्तनकलशेन चन्द्रगुप्तसमुत्तेजिका श्लोकपरिपाटी प्रवर्तिता । (तदो सो लोअलोअणाणन्दभूदो अणिच्छन्तस्स एव तस्स णिवारिदो चाणक्कहदएण । एत्थन्तरे त्थणकलसेण चन्दउत्तसमुत्तेजिआ सिलोअपरिपाटी पवट्टिदा ।)

राक्ष०—कीदृशी सा ।

पुरु०—(सत्त्वोद्रेकस्येत्यादि पूर्वोक्तं पठति ।)

राक्ष०—(सहर्षम् ।) साधु स्तनकलश साधु । काले भेदबीजमुप्तमवश्यं फलमुपदर्शयेति । कुतः ।

सद्यः क्रीडारसच्छेदं प्राकृतोपि न मर्षयेत् ।
किं नु लोकाधिकं तेजो बिभ्राणः पृथिवीपतिः ॥ १० ॥

मल०—एवमेतत् । (सद्यः क्रीडेत्यादिपुनः पठति ।)

चिरकालेति । चिरकालाद्बहोः कालात्परिवर्तमानः परितो वर्तमानो जायमानः । जनितपरिचयः परिचितपूर्व इत्यर्थः ।

कौमुदीति । कौमुदीमहोत्सवः कुमुदानन्दे कुमुदानां कुवलयानामानन्दजनके चन्द्रे कोः पृथिव्या मुदमानन्दयति समर्धयति कुमुदानन्दे चन्द्रगुप्ते सत्यपि ताभ्यामप्यतिशयितेन सकलजगदानन्दहेतुना त्वया विना कीदृशी व्यर्थेत्यर्थः । व्यतिरेकालङ्कारः ॥ ९ ॥

अनिच्छत इति । अनिच्छन्तमनादृत्येत्यर्थः । षष्ठीचानादर इति षष्ठी । न

---

१ चन्दउत्तेण. २ बन्धु. ३ अस्मात्परं—भद्र ततस्ततः. ४ अमत्र इत्यधिकम्. ५ दर्शयिष्यति. ६ किमु...धाम बिभ्राणाः पृथिवीभुजः.

राक्ष०—ततस्ततः ।

कर०—ततश्चन्द्रगुप्तेनाज्ञाभङ्गकलुषितेन प्रसङ्गसूचितममात्यगुणं प्रशस्यापभ्रंशितोधिकाराच्चाणक्यहतकः । (तदो चन्दउत्तेण अण्णाभङ्ग-कलुसिदेण पसङ्गसूचिदं अमच्चगुणं पसंसिअ अपब्भंसिदो अहिआरादो चाणक्कहदओ ।)

मल०—सखे भागुरायण गुणप्रशंसया दर्शितश्चन्द्रगुप्तेन राक्षसे भक्तिपक्षपातः ।

भागु०—नं तथा गुणप्रशंसया यथा चाणक्यबटोर्निराकरणेन ।

राक्ष०—किमयमेवैकः कौमुदीमहोत्सवप्रतिषेधश्चन्द्रगुप्तस्य चाणक्यं प्रति कोपकारणमुतान्यदप्यस्ति ।

मल०—सखे चन्द्रगुप्तस्यापरकोपकारणान्वेषणेन किं फलमेष पश्यति ।

भागु०—कुमार मतिमांश्चाणक्यो न निष्प्रयोजनमेव चन्द्रगुप्तं कोपयिष्यति न च कृतवेदी चन्द्रगुप्त एतावता गौरवमुल्लङ्घयिष्यति । सर्वथा चाणक्यचन्द्रगुप्तयोः पुष्कलात्कारणाद्यो विश्लेष उत्पद्येत स आत्यन्तिको भविष्यतीति ।

कर०—अस्त्यन्यदपि चन्द्रगुप्तस्य कोपकारणम् । उपेक्षितोनेना-पक्रामन्मलयकेतुः अमात्यराक्षसश्चेति । (अत्थि अण्णं वि चन्दउत्तस्स कोवकारणं । उवेक्खिदो अणेण अवक्कमन्तो मलअकेदू अमच्चर-क्खसो अ त्ति ।)

राक्ष०—(सहर्षम् ।) सखे शकटदास हस्ततलगतो मे संप्रति चन्द्रगुप्तो भविष्यति । इदानीं चन्दनदासस्य बन्धनान्मोक्षस्तव च पुत्रदारैः सह समागमः ।

मल०—सखे भागुरायण हस्ततलगत इति व्याहरतः कोस्याभिप्रायः ।

न तथेति । गुणवन्तमेनं संग्रहीतुमेव चाणक्यबटुरनेन निराकृत इत्यर्थः । आत्यन्तिक इति । दृढः अप्रतीकार्य इति यावत् ।

---

१ कुमार न. २ अमत्र अत्थि. ३ अस्मादनन्तरं-जीवासिद्धिप्रभृतीनां क्लेशच्छेदः ॥ भागु०-आत्मगतम् । जातः सत्यं जीवसिद्धेः क्लेशच्छेदः ।

भागु०—किमन्यत् । चाणक्यादपकृष्टस्य चन्द्रगुप्तस्योद्धरणान्न किंचित्कार्यमवश्यं पश्यति ।

राक्ष०—भद्र हृताधिकारः क्व सांप्रतमसौ बटुः ।

कर०—तदेव पाटलिपुत्रमधिवसति । (तहिं एव्व पाडलिउत्ते अहिवसदि ।)

राक्ष०—(सावेगम् ।) भद्र तत्रैव प्रतिवसति । तपोवनं न गतः प्रतिज्ञां वा पुनर्न समारूढवान् ।

कर०—अमात्य तपोवनं गच्छतीति श्रूयते । (अमच्च तपोवणं गच्छेदि त्ति सुणीअदि ।)

राक्ष०—शकटदास नेदमुपपद्यते । पश्य ।

देवस्य येन पृथिवीतलवासवस्य
स्वाग्रासनापनयनान्निकृतिर्न सोढा ।
सोयं स्वयंकृतनराधिपतेर्मनस्वी
मौर्यात्कथं नु परिभूतिमिमां सहेत ॥ ११ ॥

मल०—सखे चाणक्यस्य वनगमने पुनः प्रतिज्ञारोहणे वा कास्य स्वार्थसिद्धिः ।

भागु०—नात्यन्तदुर्बोधोयमर्थः । यावद्यावच्चाणक्यहतकश्चन्द्रगुप्ताद्दूरीभवति तावत्तावदस्य स्वार्थसिद्धिः ।

शक०—अमात्य अलमन्यथा विकल्प्य । उपपद्यत एतत् । पश्यत्वमात्यः ।

चाणक्यादिति । सचिवायत्तसिद्धिः सचिववियोगे हस्ततलगतः सुखेन जेयो भविष्यतीति राक्षसस्य निष्कपटोभिप्रायो भागुरायणेनान्यथा बोध्यते । चन्द्रगुप्तस्योद्धरणादुन्मूलनान्न किंचित्कार्यमवश्यं पश्यति नास्त्यात्यन्तिकाभीष्टसिद्धिः । हस्ततलकरणाद्वशीकरणात्तु स्वस्य साचिव्यप्राप्त्या चन्दनदासादीनामापन्निवृत्तिरात्यन्तिकी स्वार्थसिद्धिरित्यस्याभिप्राय इत्यर्थः ।

सावेगमिति । तत्रैवावस्थाने मौर्योन्मूलनप्रतिज्ञाया अकरणे वा कदाचित्पुनः सन्दधीतेत्यावेगः । मनस्वी मानशीलः ॥ ११ ॥ स्वार्थसिद्धिरिति । स्वस्य साचिव्यपदलाभ इत्यर्थः ।

---

१ गमिस्सदि. २ ०पनयजा. ३ भागुरायण इत्य०. ४ कार्य. ५ कुमार नात्यन्त०.

राज्ञां चूडामणीन्दुद्युतिखचितशिखे मूर्ध्नि विन्यस्तपादः
स्वैरेवोत्पाद्यमानं किमिति विषहते मौर्य आज्ञाविघातम्।
कौटिल्यः कोपनोऽपि स्वयमभिचरणे[1] ज्ञातदुःखः प्रतिज्ञाम्
दैवात्तीर्ण[2]प्रतिज्ञः पुनरपि न करोत्यायतिग्ला[3]निभीतः॥ १२॥

राक्ष०—सखे शकटदास एवमेतत्। गच्छ विश्रामय करभकम्।

शक०—यथाज्ञापयत्यमात्यः। (इति करभकेण सह निष्क्रान्तः।)

राक्ष०—अहमपि कुमारं द्रष्टुमिच्छामि।

मल०—(उपसृत्य।) अहमेवार्यं द्रष्टुमागतः।

राक्ष०—(नाट्येनावलोक्य।) अये कुमारः। (आसनादुत्थाय।) इदमासनम्। उपवेष्टुमर्हति कुमारः।

मल०—अयमुपविशामि। उपविशत्वार्यः। (यथार्ह[4]मुपविष्टः।) आर्य अपि सह्या शिरोवेदना।

राक्ष०—कुमार कुमारस्याधिराजशब्देनातिरस्कृते कुमारशब्दे कुतो मे शिरोवेदनायाः सह्यता।

मल०—ऊरीकृतमेतदार्येण न दुष्प्रापं भविष्यति। तत्कियन्तं कालमस्माभिरेवं संभृतबलैरपि शत्रुव्यसनमुदीक्ष[5]माणैरुदासितव्यम्।

राक्ष०—कुमार कुतोऽद्यापि कालहरणस्यावकाशः। प्रतिष्ठस्व विजयाय।

मल०—आर्य श[6]त्रुव्यसनमुपलब्धम्।

[राज्ञामिति। चूडायां निबद्धा मणयः चूडामणय इन्दव इव तेषां द्युतिभिः खचिता शिखा यस्य तादृशमूर्ध्नि विन्यस्तपादः। तेषां शासिता सार्वभौम इति यावत्। मौर्यः] स्वैरेव स्वकीयैः सेवकैरित्यर्थः। स्वयमभिचरणेन—चाणक्यनाम्ना तेनाथ शकटारगृहे रहः। कृत्यां विधाय सप्ताहात्सपुत्रो निहतो नृपः॥ इति पूर्वोक्तेनाभिचारकर्मणा ज्ञातं अनुभूतं दुःखं क्लेशो यस्यां तादृशी प्रतिज्ञा यस्येति बहुव्रीहिगर्भो बहुव्रीहिः। आयतिग्लानिभीतः प्रतिज्ञातार्थनिर्वहणक्लेशासहिष्णुः प्रतिज्ञाक्लेशं बहुधानुभूय पुनः प्रतिज्ञां कर्तुं बिभीयादित्यर्थः॥ १२॥ [अतिरस्कृतेऽतिरोहिते। यावत्कुमारोऽधिराजपदं न लभेत तावदित्यर्थः। ऊरीकृतमङ्गीकृतम्।]

1 अतिचरणे, अभिचरणे दृष्टदोषः; अभिचरणज्ञातदुःखप्रतिज्ञः. 2 पूर्ण. 3 ज्यानि 4 यथासनम् 5 अवेक्षमाणैः 6 अपि श०.

राक्ष०—उपलब्धम् ।

मल०—कीदृशं तत् ।

राक्ष०—सचिवव्यसनं किमन्यत् । अपकृष्टश्चाणक्याच्चन्द्रगुप्तः ।

मल०—आर्य सचिवव्यसनमव्यसनमेव ।

राक्ष०—अन्येषां[१] भूपतीनां कदाचिदमात्यव्यसनमव्यसनं स्यात् । न पुनश्चन्द्रगुप्तस्य[२] ।

मल०—आर्य नैतदेवम् । चन्द्रगुप्तप्रकृतीनां चाणक्यदोषा एवापरागहेतवस्तस्मिंश्च निराकृते प्रथममपि चन्द्रगुप्तेनुरक्ताः संप्रति सुतरामेव तत्रानुरागं दर्शयिष्यन्ति ।

राक्ष०—मामैवम् । ताः खलुद्विप्रकाराः प्रकृतयश्चन्द्रगुप्तसहोत्थायिन्यो नन्दानुरक्ताश्च[३] । तत्र चन्द्रगुप्तसहोत्थायिनीनां चाणक्यदोषा एव विरागहेतवो न नन्दकुलानुरक्तानाम्[४] । तास्तु खलुनन्दकुलमनेन पितृभूतं घातितमित्यपरागामर्षाभ्यां[५] विप्रकृताः सत्यः स्वाश्रयमलभमानाश्चन्द्रगुप्तमेवानुवर्तन्ते । त्वादृशं पुनः प्रतिपक्षोद्धरणे संभावितशक्तिमभियोक्तारमासाद्य[६] क्षिप्रमेनं परित्यज्य त्वामेवाश्रयिष्यन्ते । अत्र निदर्शनं वयमेव ।

मल०—आर्य[७] किमेतदेकमेव सचिवव्यसनमभियोगकारणं चन्द्रगुप्तस्याहोस्विदन्यदप्यस्ति ।

राक्ष०—किमन्यैर्बहुभिरपि एतद्धि प्रधानतमम् ।

[अव्यसनमेव न महते फलाय तस्य अकिंचित्करत्वादित्यर्थः ।] न पुनश्चन्द्रगुप्तस्येति । एवं राक्षसेन समाहितोप्यमात्यराक्षसश्चाणक्ये बद्धवैरो न चन्द्रगुप्ते इत्यादिपूर्वोक्तेन बहुविधेन भागुरायणोपजापेन कलुषिताशयो मलयकेतुः पुनः शङ्कते । चन्द्रगुप्तप्रकृतीनामिति । राक्षसमेव मनसि विषयीकृत्य चन्द्रगुप्तप्रकृतीनामित्यादि ताटस्थ्येन वचनम् । [अपरागोऽननुरक्तिः अमर्षो क्रोधस्ताभ्यां विप्रकृताः कृतक्षोभाः । स्वाश्रयं शोभनं योग्यमाश्रयम् ।]

---

१ कुमार अन्येषां. २ अस्मात्परम्—मल०—आर्य ननु विशेषतश्चन्द्रगुप्तस्येति । राक्ष०—किंकारणं यदस्यामात्यव्यसनमव्यसनम् । ३ नन्दकुलानु०. ४ ०नुगतानाम्. ५ कृत्स्नं कृतघ्नेन घा०. ६ संभाव्य. ७ अमात्य. ८ अन्यदपि किंचित्.

मल०—आर्य कथमिव प्रधानतमम्। किमिदानीं चन्द्रगुप्तः स्वंकार्यधुरामन्यत्र मन्त्रिण्यात्मनि वा समासज्य स्वयं प्रतिविधातुमसमर्थः।

राक्ष०—बाढमसमर्थः। कुतः स्वायत्तसिद्धिषूभयात्तसिद्धिषु वा भूमिपालेषु तत्संभवति। चन्द्रगुप्तस्तु दुरात्मा नित्यं सचिवायत्तसिद्धावेव स्थितश्चक्षुर्विकल इवाप्रत्यक्षलोकव्यवहारः कथमिव स्वयं प्रतिविधातुं समर्थः स्यात्।

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः।
सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति॥ १३॥
नृपोपकृष्टः सचिवात्तदर्पणः स्तनन्धयोत्यन्तशिशुः स्तनादिव।
अदृष्टलोकव्यवहारमन्दधीर्मुहूर्तमप्युत्सहते न वर्तितुम्॥ १४॥

प्रतिविधातुमिति। प्रतिविधातुमस्मदभियोगं प्रतिकर्तुमित्यर्थः।

तत्संभवतीति। संभवतीत्यनेन सामर्थ्यस्य कादाचित्कत्वमुक्तम्। उभयायत्तसिद्धेरेवोत्तरश्लोके प्राशस्त्यकथनात्। [दुरात्मा बुद्धिविकलः। लोकव्यवहारो राज्यतन्त्रं पक्षे लोकेषु व्यवहारो भ्रमणादिव्यापारः।]

यत्पृष्टं स्वकार्यधुरामन्यत्र मन्त्रिणीति तत्परिहरति अत्युच्छ्रित इति। श्रीः राज्यश्रीः अत्युच्छ्रितयोः समस्कन्धतयात्युन्नतिं प्राप्तयोः ऐकमत्ये। नान्यूनाधिकभावेन वैकीभावमिवोपगतयोरिति यावत्। मन्त्रिपार्थिवयोः पादौ मन्त्रशक्तिप्रभुशक्तिरूपौ विष्टभ्य समवस्थाप्योपतिष्ठते सुस्थिरा सती तयोः सक्ता भवतीत्यर्थः। उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति तङ्। यद्यपि प्रभुमन्त्रोत्साहरूपास्तिस्रः शक्तयस्तथाप्युत्साहशक्तेरुभयानुकूलत्वेन द्वयोरन्तर्भावाभिप्रायेणात्र सा पृथग्न गृहीता। तयोर्मन्त्रिपार्थिवयोर्द्वयोः सतोर्वैमत्येन न्यूनाधिकभावमुपेत्य द्वैधीभावेन स्थितयोः सा श्रीर्द्वयोः पादयोः सम्यगवष्टम्भासंभवाद्भरस्यासहा राज्यभारं वोढुमसमर्था सती स्त्रीस्वभावाद्दौर्बल्याच्चापल्याच्चैकतरं मन्त्रिणं वा पार्थिवं वा जहाति। कंचित्कालं प्रभुमात्रमाश्रित्य वर्तमानापि मन्त्रवैकल्येन स्वयमपि नश्यत्येवं मन्त्रिणमाश्रित्य वर्तमानापि प्रभुत्ववैकल्येन नश्यतीति भावः। यथा काचन नर्तकी उच्छ्रितौ समौ वंशस्तम्भौ पादाभ्यां दृढमवष्टभ्य सुस्थिरा तिष्ठति तयोर्वैषम्ये विसंष्ठुलपदतया देहभरं वोढुमसहा एकं हित्वान्यतरमवलम्बमाना तेन सह स्वयमपि पतति तद्वत्। अत्र प्रस्तुतेनाप्रस्तुतस्य स्फोरणात्समासोक्तिरलङ्कारः। एवमुच्छ्रितः संश्चन्द्रगुप्तोनुच्छ्रितेन्यस्मिन्मन्त्रिणि धुरमासज्यासमर्थः स्यादिति प्रतिपादितम्॥१३॥

अथात्मन्यासज्येत्यस्य परिहारमाह। नृप इति। तदर्पणः तस्मिन्नेव सचिवे राज्यतन्त्रं सर्वमर्पयतीति तथाभूतः सचिवायत्तसिद्धिरित्यर्थः। अदृष्टलोकव्यवहारः अत एव मन्दधीरिति विशेषणसमासः। तस्मात्साचिवादपकृष्टः सन् राज्यधुरां वोढुमसमर्थो भवतीत्यर्थः॥ १४॥

---

१ स्वराज्य०. २ मल०-किं कारणम्. राक्ष०-स्वाय०...कदाचिदेतत्. ३ श्रीः. ४ मूढ.

मल०—(आत्मगतम्।) दिष्ट्या न सचिवायत्ततन्त्रोस्मि। (प्रकाशम्।) यद्यप्येवं तथापि बहुष्वभियोगकारणेषु सत्सु व्यसनमभियुञ्जानस्य शत्रुमभियोक्तुरैकान्तिकी कार्यसिद्धिमवगन्तुमर्हति।

राक्ष०—ऐकान्तिकीमेव कार्यसिद्धिमवगन्तुमर्हति कुमारः। कुतः।

त्वय्युत्कृष्टबलेभियोक्तरि नृपे नन्दानुरक्ते पुरे
चाणक्ये चलिताधिकारविमुखे मौर्ये नवे राजनि।
स्वाधीने मयि। (इत्यर्द्धोक्ते लज्जां नाटयन्।)
मार्गमात्रकथनव्यापारयोगोद्यमे
त्वद्वाञ्छान्तरितानि संप्रति विभो तिष्ठन्ति साध्यानि नः॥ १५॥

मल०—यद्येवमभियोगकालमार्यः पश्यति ततः किमास्यते।

उत्तुङ्गास्तुङ्गकूलं स्रुतमदसलिलाः प्रस्यन्दिसलिलं
श्यामाः श्यामोपकण्ठद्रुममतिर्मुखराः कल्लोलमुखरम्।
स्रोतःखातावसीदत्तटमुरुदशनैरुत्सादिततटाः
शोणं सिन्दूरशोणा मम गजपतयोपास्यन्तु शतशः॥ १६॥

अपि च।

गम्भीरगर्जितरवाः स्वमदाम्बुमिश्र-
मासारवर्षमिव शीकरमुद्गिरन्त्यः।
विन्ध्यं विकीर्णसलिला इव मेघमाला
रुन्धन्तु वारणघटा नगरं मदीयाः॥ १७॥

(इति भागुरायणेन सह निष्क्रान्तो मलयकेतुः।)

दिष्ट्येति। त्वयि विरुद्धवृत्तावपि स्वतन्त्रस्य मे नानिष्टमिति भावः। यद्येवमिति। व्यसनमभियुञ्जानस्य अनुसन्दधानस्य व्यसनमन्विष्य शत्रुमभियोक्तुः अभिषेणयत इत्यर्थः। अन्येषु बहुषु कारणेषु सत्सु सचिवव्यसनमपि साधकं न केवलमिति भावः।

अन्यान्यप्युत्कृष्टबलादीनि कारणानि सन्तीत्याह। त्वयीति। स्वप्रशंसायां लज्जा। प्रशंसामेव निह्नुते। मार्गमात्रकथनव्यापार एव योगः उपायः तत्र उद्यमो यत्नो यस्य सः। त्वद्वाञ्छेति। त्वदाज्ञां प्रतीक्षन्त इत्यर्थः॥ १५॥

उत्तुङ्गा इति। [उत्तुङ्गा अत्युन्नताः मम शतशः गजपतयः शोणं अपास्यन्तु तत्सलिलं विधुन्वन्तु इत्यन्वयः। श्यामा उपकण्ठतरवो यस्य। स्रोतसा जलप्रवाहेण खातमतएव अवसीदद् भ्रश्यत् तटं यस्य तम्।] अत्र उत्तुङ्गास्तुङ्गकूलमित्यादिसाधारणधर्मोपादानाद्गजपतीनां शोणसिन्धोश्चोपमा गम्या। शोणमिति श्लेषानुप्राणिता। अत्र स्रग्धरावृत्तस्य एकाक्षरमात्राद्वयस्य न्यूनतया प्रस्तारविशेषः॥ १६॥ गम्भीरेति। नगरं पुष्पपुरम्। वारणमेघमालयोः पूर्णोपमा॥ १७॥

---

१ अमात्य यद्ये०. २ सचिवत्र्य०. ३ योग्यो. ४ अलिमु०. ५ या०, पास्यन्ति ६ रोत्स्यन्तिं.

राक्ष०—कः कोत्र भोः ।

पुरुषः—(प्रविश्य ।) आज्ञापयतु अमात्यः । (आणवेदु अमच्चो ।)

राक्ष०—प्रियंवदक ज्ञायतां सांवत्सरिकाणां द्वारि कस्तिष्ठति ।

पुरु०—यदमात्य आज्ञापयति । (निष्क्रम्य पुनः प्रविश्य ।) अमात्य एष खलु सांवत्सरिकः क्षपणकः—(जं अमच्चो आणवेदि । अमच्च एसो खु संवच्छरिओ क्खवणओ)

राक्ष०—(आत्मगतम् । अनिमित्तं सूचयित्वा ।) कथं प्रथममेव क्षपणकः ।

पुरु०—जीवसिद्धिः । (जीवसिद्धी ।)

राक्ष०—(प्रकाशम् ।) अबीभत्सदर्शनं कृत्वा प्रवेशय ।

पुरु०—तथा (तह ।) (इति निष्क्रान्तः ।)

क्षपणकः—(प्रविश्य ।)

शासनमर्हतां प्रतिपद्यध्वं मोहव्याधिवैद्यानाम् ।
ये मुहूर्तमात्रकटुकं पश्चात्पथ्यमुपदिशन्ति ॥ १८ ॥
सासणमलिहन्ताणं पडिवज्जह मोहवाहिवेज्जाणं ।
जे मुत्तमात्तकडुअं पच्छा पत्थं उवदिसन्ति ॥ १८ ॥

(उपसृत्य ।) धर्मसिद्धिर्भवतु श्रावकाणाम् । (धम्मसिद्धी होदु सावगाणम् ।)

राक्ष०—भदन्त निरूप्यतां तावदस्मत्प्रस्थानदिवसः ।

जीवसिद्धीति । प्रथमं क्षपणकसामान्यबुद्ध्या दुर्निमित्तविचिकित्सा । पश्चाज्जीवसिद्धिं ज्ञात्वा प्रस्थानमुहूर्तप्रस्तावार्थं प्रवेशानुमतिः । किंचादौ क्षपणक इति दुरुपश्रुत्या राक्षसस्य प्रकृतनीतितन्त्रव्याकोपः सूचितः । पश्चाज्जीवसिद्धिरिति सूपश्रुत्या मलयकेतौ हन्तुमुद्युक्तोप भागुरायणनयोपायेनास्य जीवनसिद्धिश्च सूचितेति द्रष्टव्यम् ।

शासन इति [मोह एव व्याधिस्तस्य वैद्यानां चिकित्सकानां ज्ञानोपदेशेन मोहं निरस्यतामित्यर्थः । शासनमादेशम् ।] केशोल्लुञ्चनतप्तशिलाधिरोहणादितीक्ष्णतपसा मोक्ष इत्यार्हतानां मतम् । अनेन गाथार्थेन संप्रति स्वेन वक्ष्यमाणं वचनमापाततो रूक्षमपि परिणामे राक्षसस्य पथ्यमिति सूचितम् ।

श्रावक इति । शुश्रूषुपर्यायशब्दस्तन्मतव्यवहारसिद्धः ।

भदन्तेति । ज्यौतिषिकनाम तैरेव व्यवहृतम् । अयमत्राभिप्रायः । आश्वयुज्यां पौर्णमास्यां कौमुदीमहोत्सवप्रतिषेधेन व्यायामकालस्योक्तत्वात्तदारभ्य

---

१ क्षपणकं दृष्ट्वा पुनः. २ कारयित्वा. ३ ततः प्रविशति क्षपणकः. ४ धम्मलाहो. ५ शावगाह, साव-ध-कस्स. ६ भद्र.

क्षप०—(नाट्येन चिन्तयित्वा ।) श्रावक निरूपिता मयामध्याह्ना-न्निर्वृत्तसर्वकल्याणा तिथिः संपूर्णचन्द्रा पौर्णमासी । युष्माकमुत्तरस्या दिशो दक्षिणां दिशं प्रस्थितानां च (अ) दक्षिणं नक्षत्रम् । अपि च । (सावगा णिरूविदा मए आमज्झण्णादो णिव्वुत्तसव्वकल्लाणा तिही संपुण्णचन्दा पुण्णमासी । तुह्माणं उत्तलाए दिसाए दक्खिणां दिसं पत्थिदाणं अदक्खिणे णक्खत्ते । अवि अ ।)

अस्ताभिमुखे सूर्ये उदिते संपूर्णमण्डले चन्द्रे
गमनं बुधस्य लग्ने उदितास्तमिते च केतौ ॥ १९ ॥

अत्थाहिमुहे सूरे उदिए संपुण्णमण्डले चन्दे ।
गमणं बुधस्य लग्गे उदिदत्थमिदे अ केदुम्मि ॥ १९ ॥

मासद्वयमात्रेणोभाभ्यां चाणक्यराक्षसाभ्यामुपजापादिना भेदतन्त्रं प्रसाधितम् । अथ मार्गशीर्ष्यां कुसुमपुरोपरोधाय प्रस्थातुकामेन राक्षसेन प्रस्थानदिवसे पृष्टे जीवसिद्धिस्तस्मै मुहूर्तं कथयति । अद्य पौर्णमासी पञ्चचत्वारिंशन्नाडिकेति मध्याह्नपर्यन्तं भद्राभिधं विष्टिकरणं निवृत्तसमस्तकल्याणं प्रयाणे निषिद्धम् । किं चाद्य पूर्वदिशि वर्तमानं मृगशिरोनक्षत्रं दक्षिणदिशं प्रस्थितानामदक्षिणं वामं प्रतिकूलं च । अथापि त्वरया गन्तव्यमिति चेत्सायं सूर्यस्तमिते चन्द्रोदयसमये लग्नं मिथुनं बुधस्तस्याधिपतिः राहुः केतुर्वा तदा उदितास्तमितो भविष्यति । तस्मिन्बुधस्य लग्ने गमनं कर्तव्यमिति शेषः । राहुकेत्वोः सर्पाकारमेकं शरीरं तत्र शिरो राहुः पुच्छं केतुः शिरस्युदिते पुच्छमस्तमितं भवति । पुच्छ उदिते शिरोस्तमिति ज्योतिःशास्त्रसिद्धम् । उभयोरेकशरीरत्वाद्राहुरिति केतुरिति व्यपदेशः । अत उक्तमुदितास्तमिते च केताविति । एवं च मिथुनं द्विस्वभावं धनुषि सप्तमकेन्द्रे स्थितेन क्रूरेणास्तमितेन सूर्येण दृष्टं केतुना पापग्रहेण च युक्तं प्रयाणेऽनिष्टम् । तथा चोक्तम् । द्विमूर्तिराशावुदयं प्रपन्ने क्रूरग्रहैर्युक्त-निरीक्षिते च । प्रयाति यद्यप्यवुधस्तदानीं निवर्तते शत्रुजनाभिभूतः ॥ इति एवं सन्दिग्धे मुहूर्ते उक्ते । लग्ने इति । द्विस्वभावात्प्रयाणे निषिद्धं मिथुनं यद्यपि दुर्लग्नं तथापि बुधेन सौम्यग्रहेणाधिष्ठितं सत्सुलग्नं भवति । तदा चन्द्रबलेन गच्छन् दीर्घां चिरेण भाविनीं सिद्धिं वक्ष्यसि । अतस्तत्र गन्तव्यमित्यस्य ग्रन्थस्यार्थः । अत्र श्लेषेणाभिप्रेतोर्थो जीवसिद्धिना ध्वनितः । तथाहि । शूरो राक्षसः अर्थाभिमुखः अर्थो मौर्यसाचिव्य रूपोभिमुखो यस्येति बहुव्रीहिः । तस्याभिमुख्यत्वेनोपस्थित इति भावः । चन्द्रगुप्तः संपूर्णराष्ट्रः सन्नुदितो मलयकेतुरुदित एवेदानीमतः परमस्तं पराभवमेष्यतीति उदितास्तमितः । पत्थिदाणं अदक्खिणं ण क्खत्तं । इत्थं

राक्ष०—भदन्त तिथिरेव न शुध्यति ।

क्षप०—श्रावक । (सावगा ।)

एकगुणा भवति तिथिश्चतुर्गुणं भवति नक्षत्रम् ।
चतुःषष्टिगुणं लग्नमेष ज्योतिषतन्त्रसिद्धान्तः २० ॥

एक्कगुणा होइ तिथि चउग्गुणे होइ णक्खत्ते ।
चउसत्तिगुणे लग्गे एसे जोईंसतन्तसिद्धन्ते ।

तस्मात् (ता)

लग्नं भवति सुलग्नं क्रूरं ग्रहं परिहर आशु ।
प्राप्नुहि दीर्घं लाभं चन्द्रस्य बलेन गच्छन् ॥ २१ ॥

लग्गे होइ सुलग्गे कूरंग्गहं पलिहलिज्जाशु ।
पाँविहि दीहं लाभं चन्दस्स बलेण गच्छन्ते ॥ २० ॥

राक्ष०—भदन्त अपरैः सांवत्सरिकैः सह संवाद्यताम् ।

क्षप०—संवादयतु श्रावकः । अहं पुनर्गमिष्यामि । (संवादेदु सावगो । अहं उण गमिस्सं ।)

राक्ष०—न खलु कुपितो भदन्तः ।

क्षप०—कुपितो न युष्माकं भदन्तः । (कुविदे ण तुह्माणं भदन्ते ।)

राक्ष०—कस्तर्हि ।

क्षप०—भगवान्कृतान्तः । येनात्मनः पक्षमुज्झित्वा परपक्षः प्रमाणीक्रियते । (भँअवं कअन्तो । जेण अत्तणो पक्खं उज्झिअ परपक्खो प्पमाणीकरीअदि ।) (इति निष्क्रान्तः क्षपणकः ।)

प्रस्थितानां च क्षत्रं न दक्षिणमिति योजना । एवं प्रस्थितानां च युष्माकं क्षत्रं भद्रभटप्रभृति दक्षिणं न भवति किं तु प्रतिकूलं मलयकेतुनिग्रहोन्मुखमित्यर्थः । अस्मिन्समये बुधस्य चाणक्यस्य लग्ने संबन्धे निमित्तभूते सति चाणक्ये त्वत्संबधार्थमुद्युक्ते सतीति भावः ।

चन्द्रगुप्तस्य बलेन भद्रभटादिना गच्छंस्त्वं दीर्घां चिरमनपायिनीं चन्द्रगुप्तस्य साचिव्यपदसिद्धिं वहसीति राक्षसं प्रति गूढाभिसन्धिवचनम् ॥ २० ॥

येन त्वया आत्मनः पक्षं ज्योतिःसिद्धान्तवेदिनं मां परित्यज्य परे सांवत्स-

---

१ दीसादि जोइससि० (दृश्यते ज्योतिषसिद्धान्ते). २ सोमम्मि गहम्मि जइवि दुल्लगे (सौम्ये ग्रहे यद्यपि दुर्लग्नं). ३ वहेसि दीहं सिद्धिं (वहासि दीर्घां सिद्धिं). ४ अतःप्राक् (स्वगतम्).

राक्ष०—प्रियंवदक ज्ञायतां का वेला वर्तत इति।

प्रियं०—अस्ताभिलाषी भगवान्सूर्यः।(अत्थाहिलासी भअवं सूरो।)

राक्ष०—(उत्थाय[2] विलोक्य।) अये अस्ताभिलाषी भगवान्भास्करः। संप्रति हि।

आविर्भूतानुरागाः क्षणमुदयगिरेरुज्जिहानस्य भानोः
पर्णच्छायैः पुरस्तादुपवनतरवो दूरमाश्वेव गत्वा।
एते तस्मिन्निवृत्ताः पुनरपरगिरिप्रान्तपर्यस्तबिम्बे
प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः॥२२॥

(इति निष्क्रान्ताः सर्वे।)

इति राक्षसोद्योगो नाम चतुर्थोऽङ्कः।

रिका अपेक्ष्यन्ते। अतस्त्वज्ज्योतिःशास्त्रस्य कृतान्तः सिद्धान्तो व्याकोपित इति मत्वा कृतान्तः कुपित इति निष्ठुरवचनं स्पष्टम्। येन त्वयात्मनः पक्षं नन्दवंशीयं चन्द्रमुपेक्ष्य परपक्षो मलयकेतुः प्रमाणीक्रियतेतस्तव कालः कुपित इति हृदि गूढम्। 'कृतान्तो यमसिद्धान्तौ' इत्यमरः।

शूर इति। शूरो मलयकेतुरस्तोन्मुखः शूरो राक्षसश्चार्थाभिलाषी इति चोपश्रुतिर्ध्वनिता। उक्तामेव दुरुपश्रुतिमन्यथयति भास्कर इति।

आविर्भूतानुरागा इति। उज्जिहानस्योदयमानस्य पर्णच्छायैः पर्णच्छायारूपेण। इत्थंभावे तृतीया। छायाबाहुल्यमिति नपुंसकत्वम्। पुरस्तात्पुरोभागे पुरोगामिसेवकवत्। आशु शीघ्रमेव गत्वा पूर्वाह्णे वृक्षच्छायाः प्रत्यक्प्रसरन्तीति भानोः पुरोगामिभृत्यत्वेनोत्प्रेक्षिताः पश्चादपराह्णे तस्मिन्नस्तोन्मुखे सति निवृत्तास्तं परित्यज्य परावृत्ता इव दृश्यन्ते। अपककुभः प्रान्तपर्यस्तबिम्बे इति पाठे अपककुप्पश्चिमदिगेव। प्रायो भृत्या इत्यर्थान्तरन्यासः। तेन च मलयकेतुदुरवस्था ध्वन्यते। इत्थं नियताप्तिप्रकरीरूपो विमर्शसन्धिस्तस्याङ्गानि चापवादादीनि निरूपितानि॥ २१॥

इति श्रीत्र्यम्बकयज्वप्रभुवर्याश्रितढुण्ढिराजव्यासयज्वविरचिते मुद्राराक्षसनाटकव्याख्याने चतुर्थोऽङ्कः समाप्तः॥

---

१ अस्मात्प्राक्-जं अमच्चो आणवेदि (इति निष्क्रम्य पुनः प्रविश्य।). २ आसनादुत्थाय. ३ पत्र. ४ पुनरितरककुप्.

पञ्चमोऽङ्कः ।

(ततः प्रविशति लेखमलङ्करणस्थगिकां मुद्रितामादाय सिद्धार्थकः ।)

सिद्धा०—आश्चर्यमाश्चर्यम् । (ही हीमाणहे हीमाणहे ।)

बुद्धिजलनिर्झरैः सिच्यमाना देशकालकलशैः ।
दर्शयिष्यति कार्यफलं गुरुकं चाणक्यनीतिलता ॥ १ ॥

बुद्धिजलणिज्झरेहिं सिञ्चन्ती देसकालकलसेहिं ।
दंसिस्सदि[1] कज्जफलं गुरुअं चाणक्कणीदिलदा ॥ १ ॥

तद्गृहीतो मयार्यचाणक्येन प्रथमलेखितोमात्यराक्षसस्य मुद्रालाञ्छितोयं लेखस्तस्यैव मुद्रालाञ्छितेयमाभरणपेटिका । चलितोस्मि किल पाटलिपुत्रम् । यावद्गच्छामि । (परिक्रम्यावलोक्य च ।) कथं क्षपणक आगच्छति । यावदस्याशकुनभूतं दर्शनं मम संमतमेव तस्मान्न परिहरामि । (ता गहीदो मए अज्जचाणक्केण पढमंलिहिदो अमच्चरक्खसस्स मुद्दालंच्छिओ अअं लेहो तस्स ज्जेव्व मुद्दालंछिआ इअं आहरणपेडिआ । चलिदोह्मि किल पाडलिउत्तं । जाव गच्छामि । केहं[2] खवणओ आअच्छदि । जाव[3] से असउणभूदं दंसणं मह संमदं एव्व ता ण पडिहरामि ।)

अथ फलागमकार्ययोः संबन्धो निर्वहणसन्धिस्त्रिभिरङ्कैरारभ्यते ॥ तल्लक्षणमुक्तम् । बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् । ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥ बीजवन्तोनुस्यूतबीजाः मुखसन्ध्यादीनामर्थाः आरम्भबीजसंबन्धादयः यथायथं तत्तत्प्रसङ्गानुसारेण विप्रकीर्णा विशकलिततया यदर्थमारब्धाः सन्तः ऐकार्थ्यमुपनीयन्ते तस्य फलागमशालिनः कार्यस्य यत्र निर्वाहः सिद्धिर्भवति स निर्वहणसन्धिः । कार्यफलागमौ वक्ष्येते । अस्याङ्गानि फलागमकार्यानुगुण्येन प्रयोक्तव्यानि । यथा । सन्धिर्विरोधो ग्रथनं निर्णयः परिभाषणम् । प्रसादानन्दसमयाः कृत्याभाषोपगूहनम् । पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥ स्थगिकामिति । राक्षसमुद्रामुद्रितां स्थगिकां पेटिकाम् । हीहीमाणहे इति आश्चर्यद्योतको निपातसमुदायः ।

किलेत्यलीके गमनमलीकं छद्मरूपमित्यर्थः । इदं बीजोपगमनं सन्धिर्नामाङ्गम् । बीजस्य चाणक्यनीतेरुपगमनात्कार्यसिद्ध्यर्थमभ्युपगमान्निर्वहणात् ॥ १ ॥

---

१ दंसइस्सदि. २ अये कहं. ३ ता जाव मे असउणभूदं इमस्स दंसणं ता भादित्तदंसणेण पडिहणामि.

क्षपणकः—(प्रविश्य ।)

अर्हतः प्रणमामि ये ते गम्भीरतया बुद्धेः ।
लोकोत्तरैर्लोके सिद्धिं मार्गैर्गच्छन्ति ॥ २ ॥

अलहन्ताणं पणममामि जे दे गंभीलदाए बुद्धीए ।
लोउत्तलेहिं लोए सिद्धिं मग्गेहिं गच्छंन्दि ॥ २ ॥

सिद्धा०—भदन्त वन्दे । (भदन्त वन्दामि ।)

क्षप०—श्रावक धर्मसिद्धिर्भवतु । (निर्वर्ण्य ।) श्रावक प्रस्थान-समुद्वहने कृतव्यवसायमिव त्वां पश्यामि । (सावगा धम्मसिद्धी होदु । सावगा पत्थाणसमुव्वहणे किदव्ववसाअं विअ तुमं पेक्खामि ।)

सिद्धा०—कथं भदन्तो जानाति । (कहं भदन्तो जाणादि ।)

क्षप०—श्रावक किमत्र ज्ञातव्यम् । एष ते मार्गादेशकुशलः शकुनः करगतो लेखश्च सूचयति । (सावगा किं एत्थ जाणिदव्वं । ऍसो दे मग्गादेसकुसलो सउणो करगदो लेहो अ सूअदि ।

सिद्धा०—ज्ञातं भदन्तेन । देशान्तरं प्रस्थितोऽस्मि । तस्मात्कथयतु भदन्तः कीदृशोद्य दिवसः । (जाणिदं भदन्तेण । देसन्तरं पत्थिदोह्मि । ता कहेदु भदन्तो कीदिसो अज्ज दिवसा त्ति ।)

क्षप०—(विहस्य ।) श्रावक मुण्डितमुण्डो नक्षत्राणि पृच्छसि । (सावगा मुण्डिअमुण्डो णक्खत्ताइं पुच्छासि ।)

सिद्धा०—भदन्त सांप्रतमपि किं जातम् । कथय प्रस्थानस्य यद्यनुकूलं भविष्यति तदा गमिष्यामि । अन्यथा निवर्तिष्ये । (भदन्त सप्पदं वि किं जादं । कहेहि पत्थाणस्स जइ अणुकूलं भविस्सदि तदो गमिस्सं । अण्णधा निवत्तिस्सं ।)

परिहरामीति । अनेनाशकुनेन कुसुमपुरं प्रति गमनप्रतिबन्ध इष्ट एवेत्यर्थः । आर्हतानामिति कर्मणि षष्ठी । जलनिमज्जितमुक्तालाबुवच्छश्वदुत्प्लुत्योर्ध्व-गमनमेव मुक्तिरित्यार्हतानां मतम् । अनेन लोकोत्तरकार्यसिद्धिप्रदं चाणक्य-नीतिगाम्भीर्यं ध्वनितम् ॥ २ ॥

---

१ ततः प्रविशति०. २ मग्गन्ति (मार्गयन्ति). ३ प्पणमामि. ४ णं एसो ज्जेव दे मग्गणाओकण्णधोर (मार्गनौकर्णधारः) लेहे.

क्षप०—श्रावक सांप्रतमेतस्मिन्मलयकेतुकटकेनुकूलं भविष्यति । (सावंगा ण संपदं एदस्सिं मलअकेदुकडए अणुकूलं भविस्सदि ।)

सिद्धा०—भदन्त कथय कुत एतत् । (भदन्त कहेहि कुदो एदम् ।)

क्षप०—श्रावक निशामय । प्रथमं तावदत्र कटके लोकस्यानिवारितो निर्गमप्रवेश आसीत् । इदानीमितः प्रत्यासन्ने कुसुमपुरे न कोप्यमुद्रालाञ्छितो निर्गन्तुं प्रवेष्टुं वानुमोद्यते । तद्यदि भागुरायणस्य मुद्रालाञ्छितस्तदा गच्छ विश्रब्धोन्यथा तिष्ठ । मा गुल्माधिकारिकैः संयमितकरचरणो राजकुलं प्रवेश्यसे । (सावगा णिसामेहि । पुढमं दाव एत्थ कडए लोअस्स अणिवारिदो णिग्गमप्पवेसो आसी । दाणीं इदो पच्चासण्णे कुसुमपुले ण कोवि अमुद्दालंच्छिओ णिग्गमिदुं पवेट्ठुं वा अणुमोदीअदि । ता जदि भाउराणस्स मुद्दालंच्छिओ तदो गच्छ विस्सद्धो अण्णहा चिट्ठ । मा गुम्माहिआरिएहिं सञमिअकलचलणो राअकुलं पवेसीअसि ।)

सिद्धा०—किं न जानाति भदन्तो अमात्यराक्षसस्य सन्निहित इति । तदमुद्रालाञ्छितमपि मां निष्क्रामन्तं कस्य शक्तिर्निवारयितुम् । (किं ण जाणादि भदन्तो अमच्चरक्खसस्स सण्णिहिदो त्ति । ता अमुद्दालंच्छिदं वि मं णिक्कमन्तं कस्स सत्ती णिवारेदुं ।)

क्षप०—(सावेगम् ।) श्रावक राक्षसस्य पिशाचस्य वा भव न पुनरमुद्रालाञ्छितस्येतो निष्क्रमणोपायः । (सावगा रक्खसस्स पिसाचस्स वो होहि ण उण अमुद्दालंच्छिदस्स इदो णिक्कमणोवाओ ।)

सिद्धा०—भदन्त मा कुप्य मे कार्यसिद्धिर्भवतु । (भदन्त मा कुप्य मे कज्जसिद्धी होदु ।

क्षप०—श्रावक गच्छ भवतु ते कार्यसिद्धिः । अहमपि भागुरा-

सावेगमिति । कौटिल्यकूटकार्यनिर्वहणार्थं कृतोद्योग इति ज्ञात्वा मनस्यावेग औ-

---

१ सावकाणं । (श्रावकानां ।) ०कडए अणुऊलेण अणणुऊलेन वा अग्गहिदमुद्देण गच्छीअदि (अगृहीतमुद्रेण गम्यते ।) इ. पा. २ मलअकेदुक० ३ अण्णधा णिवत्तिअ णिउ[illegible]ण्ठं चिठ्ठ, चिठ्ठ णिउक्के (तूष्णीकः). ४ ०सस्स केलिअरो अन्तिओ, सेवओ सिद्धत्थओ. ५ वा केलिअरो, शेवगे. ६ भण मे कज्ज०.

यणान्मुद्रां याचे । (सावगा गच्छ । होदु दे कज्जसिद्धि । अहं वि भाउराअणादो मुद्दं जाचेमि ।) (इति निष्क्रान्तौ ।)

इति प्रवेशकः ।

(ततः प्रविशति पुरुषेणानुगम्यमानो भागुरायणः ।)

भागु०—(स्वगतम् ।) अहो वैचित्र्यमार्यचाणक्यनीतेः ।

मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना
मुहुः संपूर्णाङ्गी मुहुरतिकृशा कार्यवशतः ।
मुहुर्नश्यद्बीजा मुहुरपि बहुप्रापितफले-
त्यहो चित्राकारा नियतिरिव नीतिर्नयविदः ॥ ३ ॥

(प्रकाशम् ।) भद्र भासुरक नमां दूरीभवन्तमिच्छति कुमारः । अतोस्मिन्नेवास्थानमण्डपे न्यस्यतामासनम् ।

पुरु०—एतदासनम् । उपविशत्वार्यः । (एदं आसणं । उपविशदु अज्जो ।)

भागु०—(उपविश्य ।) भद्र[2] यः कश्चिन्मुद्रार्थी मां द्रष्टुमिच्छति स त्वया प्रवेशयितव्यः ।

पुरु०—यदार्य आज्ञापयति । (जं अज्जो[3] आणवेदि ।) (इति निष्क्रान्तः ।)

भागु०—(स्वगतम् ।) कष्टमेवमयमस्मासु स्नेहवान्कुमारो मलयकेतुरतिसन्धातव्य इत्यहो दुष्करम् । अथवा ।

त्सुक्यम् । अहमपि इति । अहमपि चिकीर्षितमहाप्रयोजनसिद्ध्यर्थं मुद्रायाचनव्याजेन भागुरायणं प्रति गमिष्यामीति गूढम् । इदं कार्यमार्गणं विरोधो नामाङ्गम् ॥ २ ॥ प्रवेशक इति । तल्लक्षणमुक्तम् । वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । प्रवेशकस्तु नाट्येङ्के नीचपात्रप्रयोजितः ॥ इति ।

मुहुर्लक्ष्योद्भेदा इति । मुहुर्लक्ष्योद्भेदा मुखसन्धौ स्तोकोद्दिष्टा सती बहुधा विस्तारिणीत्यर्थः । प्रतिमुखे लक्ष्यालक्ष्यायाः पुनर्व्यक्तेः गहनातिकृशा च । गर्भे मुहुर्दृष्टनष्टान्वेषणान्नश्यदिव बीजमुद्योगो यस्याः सा तथोक्ता । विमर्शे बीजस्य स्पष्टमेव दर्शनात्संपूर्णाङ्गीत्युक्तम् । निर्वहणे सर्वार्थोपसंहाराद्बहुप्रापितफलेत्युक्तम् । ईदृशी नयविदश्चाणक्यस्य नीतिर्नियतिरिव चित्राकारा । नियतेश्चाणक्यनीतेश्च कार्याणां विचित्राकारता कारणे उपचर्यते ॥ ३ ॥

न्यस्यतामिति । मुद्रादानार्थं कटकद्वार्यवस्थानं दूरीभवनमित्याशयः ।

---

१ भ्रश्य०. २ भद्र भासुरक ३ अमत्रो.

कुले लज्जायां च स्वयशसि च माने च विमुखः
शरीरं विक्रीय क्षणिकधनलोभाद्धनवति ।
तदाज्ञां कुर्वाणो हितमहितमित्येतदधुना
विचारातिक्रान्तः किमिति परतन्त्रो विमृशति ॥ ४ ॥

(ततः प्रविशति प्रतीहार्यनुगम्यमानो मलयकेतुः ।)

मल०—(स्वगतम् ।) अहो राक्षसं प्रति विकल्पबाहुल्यादाकुला मे बुद्धिर्न निश्चयमधिगच्छति । कुतः ।

भक्त्या नन्दकुलानुरागदृढया नन्दान्वयालम्बिना
किं चाणक्यनिराकृतेन कृतिना मौर्येण सन्धास्यते ।
स्थैर्यं भक्तिगुणस्य वाधिगणयन्किं सत्यसन्धो भवे-
दित्यारूढकुलालचक्रमिव मे चेतश्चिरं भ्राम्यति ॥ ५ ॥

(प्रकाशम् ।) विजये क्व भागुरायणः ।

प्रतीहारी—कुमार एष खलु कटकान्निष्क्रमितुकामानां मुद्रासंप्रदानमनुतिष्ठति । (कुमार एसो खु कडआदो णिक्कमिदुकामाणं मुद्दासंपदाणं अणुचिट्ठदि ।)

मल०—विजये मुहूर्तमसञ्चारा भव यावदस्य पराङ्मुखस्यैव पाणिभ्यां नयने पिदधामि ।

अतिसन्धातव्य इति । यत्कष्टं पापं दुष्करमित्यन्वयः । उक्तं कष्टं समाधत्ते-अथवेति । कुले इति । विचारातिक्रान्तः अतिक्रान्तविचारसमय इत्यर्थः । इदं कार्योपक्षेपणं ग्रथनम् । कार्यस्य मलयकेत्वतिसन्धानेन राक्षसवशीकरणस्योपक्षेपणात् ॥४॥

भक्त्या इति । [चाणक्यस्य निराकृतं निराकृतिस्तेन कृतिना] नन्दान्वयालम्बिना किं मौर्येण सन्धास्यते किंवा भक्तिगुणस्य मयि मया वा क्रियमाणस्य स्थैर्यं दार्ढ्यं अधिगणयन् आधिक्येन पश्यन् सत्यसन्धः सत्या सन्धा नन्दराज्यं सर्वं तवैवास्त्विति पूर्वं कृता प्रतिज्ञा यस्य स तथोक्तो भवेत् । नन्दवंशत्वेन नन्दकुलानुरागजनिता भक्तिर्मौर्ये दृढा भवितुमर्हति सत्यसन्धत्वानुरोधेन मयि च केवलो भक्तिगुणो दृढो भवितुमर्हतीत्युभयकोटिकः संशयः । तत्रापि मौर्यसन्धानकोटिः प्रबलेति ध्वनयितुं चाणक्यनिराकृतेनेति विशेषणं राक्षसस्य मौर्यसान्निध्याभिलाषहेतुगर्भम् । कृतिनेति च विशेषणं लब्धदुर्लभराज्यत्वात्कृतकृत्यः सन्पुनश्चाणक्येन जितकाशिना दुर्विधेयेन मौर्यो न सन्दधीतेति ध्वनयितुम् ॥ ५ ॥

विजये मुहूर्तमिति । अनेन मलयकेतोरतिबालिशत्वं भागुरायणस्य चैवं

---

१ लाभात्, क्षणिकमपि लोभात्. २ त्रिष्का. ३ विगणयन्. ४ संपादनाधिको चिट्ठदि ५ निभृतपदमञ्चारा.

प्रती०—यत्कुमार आज्ञापयति। (जं कुमारो आणवेदि।)

पुरुषः—(प्रविश्य।) आर्य एष खलु क्षपणको मुद्रानिमित्तमार्यं प्रेक्षितुमिच्छति। (अज्ज एसो खु खवणओ मुद्दाणिमित्तं अज्जं पेक्खिदुमिच्छदि।)

भागु०—प्रवेशय।

पुरुषः—तथा (तहा) (इति निष्क्रान्तः।)

क्षपणकः—(प्रविश्य।) धर्मसिद्धिः श्रावकाणां भवतु। (धम्मसिद्धी सावगाणं होदु।)

भागु०—(अवलोक्य[1] स्वगतम्।) अये राक्षसस्य मित्रं जीवसिद्धिः। (प्रकाशम्।) भदन्त न खलु राक्षसस्य प्रयोजनमेव किंचिदुद्दिश्य गम्यते।

क्षप०—(कर्णौ[2] पिधाय।) शान्तं पापं शान्तं पापम्। श्रावक तत्र गमिष्यामि यत्र राक्षसस्य पिशाचस्य वा नामापि न श्रूयते। (सन्तं पावं सन्तं पावं। सावगा तहिं गमिस्सं जहिं रक्खसस्स पिसाचस्स वा णामं वि ण सुणीअदि।)

भागु०—बलवान्[3]सुहृदि प्रणयकोपः। तत्किमपराद्धं राक्षसेन भदन्तस्य।

क्षप०—श्रावक न मे किमपि राक्षसेनापराद्धम्। स्वयमेव मन्दभाग्य आत्मनोऽपराध्यामि।) सावगा ण मम किंवि रक्खसेण अवरद्धं। सअं जेव्व मन्दभाओ[4] अत्तणो अवलद्धामि।)

भागु०—भदन्त वर्द्धयासि मे कुतूहलम्। श्रोतुमिच्छामि।

मल०—(स्वगतम्।) अहमपि श्रोतुमिच्छामि।

क्षप०—श्रावक किमनेनाश्रोतव्येन श्रुतेन। (सावगा किं अणेण असुणिदव्वेण सुदेण)

भागु०—यदि रहस्यं तत्तिष्ठतु।

तद्वशीकरणप्राविण्यं च सूचितम्। तेनेदानीं महत्प्रयोजनमनुष्ठेयं भविष्यतीति। पूर्वमुपक्षिप्तस्य जीवसिद्धिना संप्रति क्रियमाणस्य मलयकेत्वातिसन्धानरूपस्य महाप्रयोजनस्यावसरदानाय चेदं कविसंविधानमित्यवधेयम्।

राक्षसस्य मित्रमिति। अनेन द्वारेणेदानीं मलयकेतुरतिसन्धातव्य इति भावः।

---

१ नाट्येनावलोक्य. २ एतन्नास्ति क्वचित्. ३ भदन्त बलवांस्ते. ४ हतासो मन्दभाओ अत्तणो कम्मेसु लज्जे.

क्षप०—श्रावक न रहस्यं किंत्वतिनृशंसम् । (सावगा ण रहस्यं किंदु अदिणिसंसं ।)

भागु०—यदि न रहस्यं तत्कथ्यताम् ।

क्षप०—श्रावक न रहस्यमेतत्तथापि न कथयिष्यामि । (सावगाण रहस्सं एदं तहवि ण कहिस्सं ।

भागु०—अहमपि मुद्रां न दास्यामि ।

क्षप०—(स्वगतम् ।) युक्तमिदानीमर्थिने कथयितुम् । (प्रकाशम् ।) का गतिः श्रृणोतु श्रावकः । अस्ति तावदहं मन्दभाग्यः प्रथमं पाटलिपुत्रे निवसन् राक्षसेन मित्रत्वमुपगतः । तस्मिन्नवसरे राक्षसेन गूढविषकन्यकाप्रयोगमुत्पाद्य घातितो देवः पर्वतेश्वरः । (का गदी सुणादु सावगो । अत्थि दाव अहं मन्दभग्गो पढमं पाडलिउत्ते णिवसमाणे लक्खसेण[2] मित्तत्तणं उवगदे तहिं अवसले लक्खसेण गूढं विसकण्णआपओअं उप्पादिअ घादिदे देवे पव्वदीसले ।)

मल०—(सबाष्पमात्मगतम् ।) कथं राक्षसेन घातितस्तातो न चाणक्येन ।

भागु०—भदन्त ततस्ततः ।

क्षप०—ततोहं राक्षसस्य मित्रमिति कृत्वा चाणक्यहतकेन सनिकारं नगरान्निर्वासितः । इदानीमपि राक्षसेनानेकाकार्यकुशलेन किमपि तादृशमारभ्यते येनाहं जीवलोकान्निष्कासिष्ये । (तदो हगे लक्खसस्स मित्तं त्ति कदुअ चाणक्कहदएण सणिकालं णअरादो णिव्वासिदे । दाणीं वि लक्खसेण अणेअअकज्जकुसलेण किंवि तालिसं आलहीअदि जेण हगे जीअलोआदो णिक्कासिज्जेमि[3] ।)

भागु०—भदन्त प्रतिश्रुतराज्यार्द्धमयच्छता चाणक्यहतकेनेदमकार्यमनुष्ठितं न राक्षसेनेति श्रुतमस्माभिः ।

क्षप०—(कर्णौ पिधाय ।) शान्तं पापम् । चाणक्येन विषकन्याया ना-

अर्थिने इति । अर्थिने आदरवते आदरेण श्रुतं मत्कथितं तथात्वेनैव गृह्णीयादिति भावः । घातित इति मम हस्तेनेति शेषः ।

तादृशमिति । तादृशं पर्वतेश्वरघातनसदृशं । मलयकेतुनिग्रहोपीति गूढो भावः । इदं भागुरायणभदन्तयोर्मिथः परिभाषणं जल्पनम् ।

---

१ भदन्त अहं. २ रक्खसस्स. ३ णिव्वासिज्जामि (निर्वासिष्ये).

मापि न श्रुतम् । (सन्तं पावं । चाणक्केण विसकण्णाए णामं वि ण सुंदम् ।)

भागु०—भदन्त इयं मुद्रा दीयते । एहि कुमारं श्रावय ।

मल०—(उपसृत्य ।)

श्रुतं सखे श्रवणविदारणं वचः
सुहृन्मुखाद्रिपुमधिकृत्य भाषितम् ।
पितुर्वधव्यसनमिदं हि येन मे
चिरादपि द्विगुणमिवाद्य वर्धते ॥ ६ ॥

क्षप०—(स्वगतम् ।) अये श्रुतं मलयकेतुहतकेन । हन्त कृतार्थोस्मि । (इति निष्क्रान्तः ।)

मल०—(प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा ।) राक्षस राक्षस युक्तं युक्तम् ।

मित्रं ममायमिति निर्वृतचित्तवृत्तिं
विश्रम्भतस्त्वयि निवेशितसर्वकार्यम् ।
तातं निपात्य सह बन्धुजनाश्रुतोयै-
रन्वर्थतोपि ननु राक्षस राक्षसोसि ॥ ७ ॥

भागु०—(स्वगतम् ।) रक्षणीया राक्षसस्य प्राणा इत्यार्यादेशः । भवत्वेवं तावत् । (प्रकाशम् ।) कुमार अलमावेगेन । आसनस्थं कुमारं किंचिद्विज्ञापयितुमिच्छामि ।

मल०—(उपविश्य ।) सखे किमसि वक्तुकामः ।

भागु०—कुमार इह खल्वर्थशास्त्रव्यवहारिणामर्थवशादरिमित्रो-

श्रुतमिति । चिरादपि चिरजातमपि अद्य जातमिव द्विगुणं वर्धत इत्यर्थः । कृतार्थोस्मीति । तेनेदानीं महत्प्रयोजनमनुष्ठेयं भविष्यतीति पूर्वोक्तमहाप्रयोजनानुष्ठानेन कृतार्थोस्मीत्यर्थः । सुहृन्मुखाद्रिपुगधिकृत्येत्यनेन स्वस्य सुहृत्त्वेन विश्वास्यवचनत्वं रिपुत्वं च मलयकेतुना मनसि दृढीकृतमिति च कृतार्थता । इदं बीजानुगुणकार्यप्रख्यापनं निर्णयः ॥ ६ ॥

मित्रं ममेदमिति । अनेन ज्ञायते राक्षसपर्वतकयोः पूर्वं महत्सौहृदमासीदन्तरं चाणक्येन राज्यार्धदानपरिपणनप्रलोभनेन राक्षसाद्विभेद्य स्वकार्यसिद्धये पर्वतकः सहायत्वेन प्रवणीकृत इति । तथाचानुपदमेव कुपितो मलयकेतुर्भागुरायणेन समाधीयते तस्मिन्काले सर्वार्थसिद्धिं राजानमित्यादिना महानरातिरासीदित्यन्तेन ग्रन्थेन ॥ ७ ॥

---

१ चाणक्को जाणादि । तेण ज्जेव दुट्ठबुद्धिणा लक्खसेण एसा अकज्जसिद्धी किदा । २ भदन्त कष्टमिदं । इय. ३ मिहा. ४ ०र्धचाणक्यः. ५ युक्तमिदम्. ६ ममेदं. ७ कार्यः ८ नाक्षि.

दासीनव्यवस्था न लौकिकानामिव स्वेच्छावशात् । यतस्तस्मिन्काले सर्वार्थसिद्धिं राजानमिच्छतो राक्षसस्य चन्द्रगुप्तादपि बलीयस्तया सुगृहीतनामा देवः पर्वतेश्वर एवार्थपरिपन्थी महानरातिरासीत् । तस्मिंश्च राक्षसेनेदमनुष्ठितमिति नातिदोषमिवात्रेति पश्यामि । पश्यतु कुमारः ।

मित्राणि शत्रुत्वमुपानयन्ती मित्रत्वमर्थस्य वशाच्च शत्रून् ।
नीतिर्नयत्यस्मृतपूर्ववृत्तं जन्मान्तरं जीवत एव पुंसः ॥ ८ ॥

तदत्र वस्तुनि नोपालम्भनीयो राक्षसः । आ नन्दराज्यलाभादुपग्राह्यश्च । परतश्च परिग्रहे वा परित्यागे वा कुमारः प्रमाणम् ।

मल०—एवम् । सखे सम्यग्दृष्टवानसि । यतोमात्यवधे प्रकृतिक्षोभः स्यादेवं च सन्दिग्धो विजयः ।

(प्रविश्य ।) **पुरुषः**—जयतु कुमारः । आर्य गुल्मस्थानाधिकृतो दीर्घरक्षो विज्ञापयति । एष खल्वस्माभिः कटकान्निष्क्रामन्नगृहीतमुद्रः सलेखः पुरुषो गृहीतः । तत्प्रत्यक्षीकरोत्वेनमार्य इति । (जेदु कुमारो । अज्ज गुम्मट्ठाणाधिकिदो दीहरक्खो विण्णवेदि एसो खु अह्मेहिं कडआदो णिक्कमन्तो अगहीदमुद्दो सलेहो पुरिसो गहीदो । ता पच्चक्खीकरेदु णं अज्जोत्ति ।)

भागु०—भद्र प्रवेशय ।

पुरु०—यदार्य आज्ञापयति । (जं अज्जो आणवेदि) । (इति निष्क्रान्तः ।)

सिद्धा०—(स्वगतम् ।)

आनयन्त्यै गुणेषु दोषेषु पराङ्मुखं कुर्वत्यै ।
अस्मादृशजनन्यै प्रणमामः स्वामिभक्त्यै ॥ ९ ॥

मित्राणीति । जन्मान्तरे पूर्वजन्मवृत्तं यथा न स्मर्यते तथा जीवित एव पुंसः राजतन्त्रनीतिवशात्पूर्वापकृतादि विस्मार्यत्वेन प्रसज्यत इति भावः ॥ ८ ॥

तदत्र वस्तुनीति इदं कुपितस्य मलयकेतोः समाधानरूपं पर्युपासनं ।

अतःपरमङ्कसमाप्तिपर्यन्तं प्रथमेङ्के किमत्र लिखामीत्यादिना कर्णे एवमेवेत्यन्तेन ग्रन्थेनोपक्षिप्तस्य बीजस्यानेकधा प्रकीर्णस्यैकार्थीकरणबीजोपगमनस्यैव सन्धेरङ्गस्य प्रपञ्चः । आनन्त्यैरिति । दोषवति कार्ये प्रवृत्त्यापि दोषे पराङ्मुखं दोषानगण-

---

१ लोकानां. २ नास्ति दोष एवात्र. ३ ०मिवान०. ४ ०मस्यार्थ—अप्यर्थ. ५ वस्तुन्यनुपालभ्यः. ६ विजयः स्यादस्माकम्. ७ तहा.

आणंतीए गुणेसु दोसेसु परंमुहं कुणन्तीए।
अह्मारिसजणणीए पणमामो सामिभत्तीए ॥ ९ ॥

पुरु०[1]—आर्य अयं स पुरुषः। (अज्ज अअं सो पुरिसो।)

भागु०—(नाट्येनावलोक्य।) भद्र किमयमागन्तुक आहोस्विदिहैव कस्यचित्परिग्रहः।

सिद्धा०—आर्य अहं खलु अमात्यराक्षसस्य सेवकः। (अज्ज अहं खु अमच्चरक्खसस्स सेवओ।)

भागु०—भद्र तत्किम[2]गृहीतमुद्रः कटकान्निष्क्रामसि[3]।

सिद्धा०—आर्य कार्यगौरवेण त्वरायितोस्मि (अज्ज कज्जगोरवेण तुवराविदोह्मि।)

भागु०—कीदृशं तत्कार्यगौरवं यद्राजशासनमुल्लङ्घ[4]यति।

मल०—सखे भागुरायण लेखमर्प[5]नय।

भागु०—(सिद्धार्थकहस्ताद्गृहीत्वा पत्रमुद्रां दृष्ट्वा।) कुमार अयं लेखः। रा[5]क्षसनामाङ्कितेयं मुद्रा।

मल०—मुद्रां परिपालयन्नुद्घा[6]ट्य दर्शय।

भागु०—(तथा कृत्वा दर्शयति।)

मल०—(वाँचयति।) स्वस्ति यथास्थानं कुतोपि कोपि कमपि पुरुषविशेषमवगमयति। अस्मत्प्रतिपक्षं निराकृत्य दर्शिता कापि सत्यता सत्यवादिना। सांप्रतमेतेषामपि प्रथममुपन्यस्तसन्धीनामस्मत्सुहृदां पूर्वप्रतिज्ञातसन्धिपरिपर्णनप्रोत्साहनेन सत्यसन्धः प्रीतिमुत्पादयितुमर्हति। एतेप्येव-

---

यन्तं कुर्वत्यै प्रत्युत गुणेष्वानयन्त्यै गुणपक्ष एव पातयन्त्यै सर्वतो गरीयस्यै स्वामिभक्त्यै नमः। स्वामिभक्तिवशात्स्वामिकार्यसिद्ध्यर्थमनुचितमपि क्रियमाणं गुणपक्ष एव भवति न पुनर्दोषपक्ष इति भावः। स्वामिभक्त्यै इति। क्रियया यमभिप्रैति स सम्प्रदानमिति सम्प्रदानत्वम् ॥ ९ ॥

मुद्रां परिपालयन्निति। लेखस्य धारणपेटिकायाश्च मुद्रापरिपालनं राक्षसमुद्रया सह संवाददर्शनार्थम्। स्वस्ति यथेति। अस्मत्प्रतिपक्षस्य चाणक्यस्य निराकरणं पूर्वमेव त्वया प्रतिज्ञातमासीत्। किलेति बलादापादानार्थम्। अस्मत्सुहृदां कौलूतादीनामित्यर्थः। सन्धिपरिपणनस्य सन्धिसमये पूर्वदित्सितस्य प्रोत्साहनम्।

---

१ उपसृत्य इत्यधिकम्. २ किमर्थम०. ३ न्यासि. ४ मुपा०. ५ राक्षसमुद्राङ्कितः, ०नामाङ्कोऽयं. ६ उद्वेश्य. ७ गृहीत्वा वाच०. ८ परिपणवस्तु प्रतिपादन०.

मेनुगृहीताः सन्तः स्वाश्रयविनाशेनोपकारिणमाश्रयिष्यन्ति । अविस्मृतमेतत्सत्यवतः स्मारयामः। एतेषां मध्ये केचिदरेः कोषहस्तिभ्यामर्थिनः केचिद्विषयेणेति । अलङ्कारत्रयं च सत्यवता यदनुप्रेषितं तदुपगतम्। मयापि लेखस्याशून्यार्थं किंचिदनुप्रेषितं तदुपगमनीयम्। वाचिकं चाप्ततमादस्माच्छ्रोतव्यमिति। सखे भागुरायण कीदृशो लेखः।

भागु०—भद्र सिद्धार्थक कस्यायं लेखः।

सिद्धा०—आर्य न जानामि। (अज्ज ण जाणामि।)

भागु०—हे धूर्त लेखो नीयते न ज्ञायते कस्यायमिति। सर्वं तावत्तिष्ठतु। वाचिकं त्वत्तः केन श्रोतव्यम्।

सिद्धा०—(भयं नाटयन्।) युष्माभिः (तुह्मेहिं)

भागु०—किमस्माभिः।

सिद्धा०—मिश्रैर्गृहीतो न जानामि किं भणामीति। (मिस्सेहिं गिहीदो ण आणामि किं भणामि त्ति।)

भागु०—(सरोषम्।) एष ज्ञानासि। भासुरक बहिर्नीत्वा तावत्ताड्यतां यावत्कथयति।

पुरु०—यदमात्य आज्ञापयति। (जं अमच्चो आणवेदि।) (इति तेन सह निष्क्रम्य पुनः प्रविश्य।) आर्य इयं मुद्रालाञ्छिता पेटिका तस्य ताड्यमानस्य कक्षातो निपतिता। (अज्ज इअं मुद्दालंच्छिदा पेडिआ तस्स ताडिअमाणस्स कक्खादो णिवडिदा।)

अवश्यं दास्यामीत्याश्वसनम्। अविस्मृतमिति । सत्यवत्त्वात्त्वं न विस्मरस्यथापि स्मारयाम इत्यर्थः। लेखस्येति। रिक्तहस्तेन प्रभुं प्रति लेखो न लेख्य इत्याचाराल्लेखसाद्गुण्यार्थं किंचित्प्रेषितमिति भावः।

भागुरायण इति। कं प्रति केन लिखितामिति प्रष्टव्यमिति भावः। वाचिकमिति। वाचिकं त्वत्तः केन श्रोतव्यमिति पृष्टे प्रस्तुतत्वाचन्द्रगुप्तेनेत्येव वक्तव्यत्वेन प्रसक्तेपि युष्मच्छ्रवणगोचरीकर्तुमेवायं सर्वः समारम्भ इति गूढाभिसन्धिः युष्माभिरित्यर्धोक्त्या उत्तरयति। श्रोतव्यमिति वाक्यशेषो गूढः। उक्तमुत्तरं ताडनव्याजेनान्यथयति मिश्रैरित्यादिना। अत्र युष्माभिरिति पूर्वोक्तमन्वेतव्यम्। मिश्रशब्दः पूज्यवचनः।

---

१ उपगृहीताः. २ दण्डाभ्याम्. ३ सिद्धार्थकात्. ४ लेखार्थः. ५ तुह्मेहिं. ६ सक्रोधम्. ७ ज्ञास्यासि. ८ सर्वमनेन कथितं भवेत्.

भागु०—(विलोक्य ।) कुमार इयमपि राक्षसमुद्राङ्कितैव ।

मल०—सखे अयं लेखस्याशून्यार्थो भविष्यति । इमामपि मुद्रां परिपालयन्नुद्घाट्य दर्शय ।

भागु०—(तथा कृत्वा दर्शयति ।)

मल०—(विलोक्य ।) अये तदिदमाभरणं मया[1] स्वशरीरादवतार्य राक्षसाय प्रेषितम् । व्यक्तं चन्द्रगुप्तस्य लेखः ।

भागु०—कुमार एष निर्णीयत एव संशयः । भद्र पुनरपि ताड्यताम् ।

पुरु०—यदार्य आज्ञापयति (जं अज्जो आणवेदि) (इति निष्क्रम्य सिद्धार्थकेन सह पुनः प्रविश्य ।) एष खलु ताड्यमानः कुमारस्यैव निवेदयामीति भणति । (एसो क्खु ताडिअमाणो कुमारस्स एव्व [2]णिवेदमित्ति भणादि ।)

मल०—[3]तथा भवतु ।

सिद्धा०—(पादयोर्निपत्य ।) अभयेन मे प्रसादं करोत्वार्यः । (अभएण मे पसादं करेदु अज्जो ।)

मल०—भद्र अभयमेव परवतो जनस्य । निवेद्यतां यथावस्थितम् ।

सिद्धा०—निशामयतु कुमारः । अहं खल्वमात्यराक्षसेनेमं लेखं दत्त्वा चन्द्रगुप्तसकाशं प्रेषितः । (णिसामेदु कुमारो । अहं खु अमच्चरक्खसेण इमं लेहं देइअ चन्दउत्तसआसं पेसिदो ।)

मल०—[4]वाचिकमिदानीं श्रोतुमिच्छामि ।

सिद्धा०—कुमार आदिष्टोस्म्यमात्येन यथैते मम प्रियवयस्याः पञ्च राजानस्त्वया सह समुत्पन्नस्नेहाः । ते यथा कुलूताधिपश्चित्रवर्मा मलयनगराधिपः सिंहनादः काश्मीरदेशनाथः पुष्कराक्षः सिन्धुराजः सिन्धुसेनः पारसीको मेघनाद इति । एतेषु प्रथमगृहीतास्त्रयो राजानो मलयकेतोर्विषयमिच्छन्त्यपरौ हस्तिबलं कोषं च । तद्यथा चाणक्यं निराकृत्य महाभागेन मम प्रीतिः समुत्पादिता तथैतेषामपि प्रथमभणितोर्थः संपादयितव्य इत्येतावान्वाक्सन्देशः । (कुमाल आदिट्ठोह्मि

व्यक्तं चन्द्रगुप्तस्येति । राजार्हाभरणप्रेषणाच्चन्द्रगुप्तं प्रति राक्षसेन प्रेषित इत्यर्थः ।

---

१ यन्मया. २ विण्णवेमि. ३ प्रवेशय. पुरु०—जं कुमारो अणावेदि (इति निष्क्रम्य सिद्धार्थकेन सह प्रविशति) इत्य०. ४ अस्मात्प्राक्–भद्र.

अमच्चेणं जहा एदे मह पिअवअस्सा पञ्च राआणो तुए सह समुप्पण्णसिणेहा। ते जहा कुलूदाहिवो चित्तवम्मो मलअणराहिवो सिंहणादो कह्मीरदेसणाहो पुक्खरक्खो सिन्धुराओ सिन्धुसेणो पारसीओ मेहणादोत्ति। एदेसु पढमगिहीदा तिण्णि राआणो मलअकेदुणो विसअं इच्छन्ति अवरे हत्थिबलं कोसं अ। ता जहा चाणक्कं णिराकरिअ महाभाएण मह पीदी समुप्पादिदा तहा एदाणं वि पढमभणिदो अत्थो संपादइदव्वोत्ति एत्तिओ वाआसन्देसो।)

मल०—(स्वगतम्।) कथं चित्रवर्मादयोपि मामभिद्रुह्यन्ति। अथवात एव राक्षसे निरतिशया प्रीतिः। (प्रकाशम्।) विजये राक्षसं द्रष्टुमिच्छामि।)

प्रती०—यत्कुमार आज्ञापयति। (जं कुमारो आणवेदि।)

(इति निष्क्रान्ताः।)

(ततः प्रविशत्यासनस्थः स्वभवनगतः पुरुषेण सह सचिन्तो राक्षसः।)

राक्ष०—(आत्मगतम्।) पूर्णमस्मद्बलं चन्द्रगुप्तबलैरिति यत्सत्यं न मे मनसः परिशुद्धिरस्ति। कुतः।

साध्ये निश्चितमन्वयेन घटितं बिभ्रत्सपक्षे स्थितिं
व्यावृत्तं च विपक्षतो भवति यत्तत्साधनं सिद्धये।
यत्साध्यं स्वयमेव तुल्यमुभयोः पक्षे विरुद्धं च य-
त्तस्याङ्गीकरणेन वादिन इव स्यात्स्वामिनो निग्रहः॥ १०॥

पूर्णमस्मद्बलमिति। चन्द्रगुप्तबलैर्भद्रभटप्रभृतिभिरस्मद्बलं व्याप्तमिति कृत्वा मनो मे सन्दिग्धमिति भावः।

साध्ये निश्चितमिति। साध्ये सिद्धिविषये पक्षे निश्चितमसन्दिग्धमन्वयेनान्वयव्याप्त्या घटितं विशिष्टं सपक्षे महानसादौ विद्यमानं विपक्षाद्ध्रदाद्व्यावृत्तं धूमरूपं साधनं हेतुः सिद्धये वह्न्यनुमितये समर्थं भवति। एवं चाणक्यनीतिरूपं साधनं साध्ये चन्द्रगुप्तलक्ष्मीस्थिरीकरणरूपे निश्चितमवश्यसाधकत्वेनाध्यवसितमन्वयेन व्यतिरेकव्याप्त्या च घटितं मौर्यप्रतिष्ठापननन्दोन्मूलनादिना दृष्टसारमिति यावत्। सपक्षे भद्रभटभागुरायणादौ स्थितिं बिभ्रद्विपक्षान्मलयकेतोर्व्यावृत्तं सत्सिद्धये मौर्यलक्ष्मीस्थैर्याय समर्थं भवति इति दार्ष्टान्तिके योजनीयम्। यत्साधनं स्वयमेव साध्यं साध्याभिन्नं यथा ज्ञानं प्रमाणं तद्वति तत्प्रतिकारकत्वात्। अत्र साधनं साध्येन प्रामाण्येनाभिन्नं समम्। यच्च साधनमुभयोः सपक्षविपक्षयोः वृत्तिमत्वेन व्यावृत्तत्वेन वा तुल्यम्। आद्ये उदाहरणं शब्दपक्षकानित्यत्वसाधकप्रमेयत्वं तत्र प्रमेयत्वं सपक्षे घटादौ विपक्षे आकाशादौ च

---

१ ०त्तरक्खसेण. २ सन्धाणा. ३ अहिलसन्ति. ४ मह्यम्. ५ स्वपक्षे.

अथवा विज्ञातापरागहेतुभिः प्राक्परिगृहीतोपजापैरापूर्णमिति न विकल्पयितुमर्हामि। (प्रकाशम्।) भद्र प्रियंवदक उच्यन्तामस्मद्वचनात्कुमारानुयायिनो राजानः। संप्रति दिने दिने प्रत्यासीदति कुसुमपुरम्। तत्परिकल्पितविभागैर्भवद्भिः प्रयाणे प्रयातव्यम्। कथमिति।

प्रस्थातव्यं पुरस्तात्खसमगधगणैर्मामनु व्यूह्य सैन्यै-
र्गान्धारैर्मध्ययाने सयवनपतिभिः संविधेयः प्रयत्नः।
पश्चात्तिष्ठन्तु वीराः शकनरपतयः संभृताश्चीणहूणैः
कौलूताद्यश्च शिष्टः पथि पथि वृणुयाद्राजलोकः कुमारम्॥११॥

प्रियं०—तथा। (तँहा।) (इति निष्क्रान्तः।)

(प्रविश्य।) **प्रतीहारी**—जयत्वमात्यः। अमात्य इच्छति त्वां कुमारः प्रेक्षितुम्। (जेदु अमच्चो। अमच्च इच्छदि तुमं कुमारो पेक्खिदुं।)

राक्ष०—भद्रे मुहूर्तं तिष्ठ। कः कोत्र भोः।

(प्रविश्य।) **पुरुषः**—आज्ञापयत्वमात्यः (आणवेदु अमच्चो।)

राक्ष०—उच्यतां शकटदासः। यथा परिधापिताः कुमारेणाभरणानि वयस्। तन्न युक्तमनलंकृतैः कुमारदर्शनमनुभवितुम्। अतो यत्तदलङ्करणत्रयं क्रीतं तन्मध्यादेकं दीयतामिति।

वृत्तिमत्त्वेन तुल्यम्। द्वितीये शब्दपक्षकानित्यत्वसाधकशब्दत्वं सपक्षे घटादौ विपक्षे गगनादौ च व्यावृत्तत्वेन तुल्यम्। यच्च साधनं पक्षे विरुद्धं साध्यासमानाधिकरणम्। यथा शब्दपक्षकनित्यत्वसाधककृतकत्वम्। अत्र कृतकत्वं हेतुः पक्षे विरुद्धः साध्येन नित्यत्वेनासमानाधिकरणः। नित्यत्वविरुद्धस्यानित्यत्वस्य साधक इति यावत्। एवमुक्तप्रकारं त्रिविधं यत्साधनं हेत्वाभासस्तस्याङ्गीकरणेन वादिनो निग्रहा पराभवः स्यात्। एवं प्रकृतेपि मलयकेतुबलं भद्रभटादिभिराक्रान्तत्वादुभयत्र तुल्यवदाभासमानं वस्तुतः पक्षे मलयकेतौ भद्रभटाद्यंशेन विरुद्धमत एव स्वयमेव साध्यकोटिप्रविष्टमस्मदिष्टं साधयेद्वा न वेति सन्दिग्धमिति यावत्। एतादृशबलाभासाङ्गीकरणेन स्वामिनो राक्षसमलयकेत्वोर्निग्रहोवश्यं भावीति दार्ष्टान्तिकेवश्यं योजनीयम्॥ १०॥

एवं सन्दिह्य पुनः समाधत्ते अथवेति। अस्माभिर्विज्ञाताश्चन्द्रगुप्तापरागहेतवो येषां तैः वाक्परिगृहीतः अस्माकमुपजापो यैस्तथाभूतैर्भद्रभटादिभिरापूर्णमिति न संशयितव्यमिति भावः।

---

१ तैस्तैर्विज्ञा०. २ अतः. ३ प्रस्था०. ४ गच्छन्तु. ५ ०द्यो विशि०. ६ परिवृ०. ७ जं अमच्चो आणवेदि.

पुरु०—तथा (इति निष्क्रम्य पुनः प्रविश्य ।) अमात्य इदमाभरणम् । (तहा । अमच्च इदं आहरणं ।)

राक्ष०—(नाट्येनात्मानमलंकृत्योत्थाय च ।) भद्रे राजोपगामिनं मार्गमादेशय ।

प्रती०—एत्वमात्यः । (एदु अमच्चो ।)

राक्ष०—(आत्मगतम् ।) अधिकारपदं नाम निर्दोषस्यापि पुरुषस्य महदाशङ्कास्थानम् । कुतः ।

भयं तावत्सेव्यादभिनिविशते सेवकजनं
ततः प्रत्यासन्नाद्भवति हृदये चैव निहितम् ।
ततोऽध्यारूढानां पदमसुजनद्वेषजननं
गतिः सोच्छ्रायाणां पतनमनुकूलं कलयति ॥ १२ ॥

(परिक्रम्य ।) प्रती०—अमात्य अयं कुमारः । उपसर्पत्वेनममात्यः । (अमच्च अअं कुमारो । उपसप्पदु णं अमच्चो ।)

राक्ष०—(विलोक्य ।) अयं कुमारस्तिष्ठति य एष ।

पादाग्रे दृशमवधाय निश्चलाङ्गीं
शून्यत्वादपरिगृहीततद्विशेषाम् ।
वक्त्रेन्दुं वहति करेण दुर्वहाणां
कार्याणां कृतमिव गौरवेण नम्रम् ॥ १३ ॥

(उपसृत्य ।) विजयतां कुमारः ।

मल०—आर्य अभिवादये । इदमासनमास्यताम् ।

भयं तावदिति । भयं कर्तृ सेव्याद्राज्ञः सकाशात्सेवकजनभिनियिशते अभितः सर्वतः प्राप्नोति । नेर्विंद इति तङ् । ततः राजप्रत्यासन्नद्भयं भवति । अस्मात्कारणादध्यारूढानामधिकारिणां पदमसुजनानां दुर्जनानाम् । यद्वा असुमज्जानानां प्राणिमात्रस्येति यावत् द्वेषजननं भवति । उक्तमर्थमर्थान्तरन्यासेन द्रढयति । गतिरिरिति । सोच्छ्रायाणमुन्मत्तानां गतिरवस्था अनुकूलमवश्यंभावित्वेनोचितं पतनं कलयति । पतनान्ताः समुच्छ्रया इति भावः । मतिरिति पाठेऽप्ययमेवार्थः । सर्वदा समुच्छ्रयाद्भीताः पतनमेव चिन्तयीरन्मतिमन्तः इत्यर्थः ॥ १२ ॥

पादाग्रे इति । शून्यत्वान्मनोवृत्तिराहित्यादज्ञाततद्विषयविशेषामित्यर्थः ॥१३॥ इदं मलयकेतोः स्वविषयकदौर्मनस्यमजानन् राजकार्यगौरववैयग्र्येण गृह्णाति ।

---

१ जं अमच्चो आणवेदि. २ राजकुल० ३ ष्वेन. ४ अनु०, जनोद्वेगे. ५ मतिः. ७ नाट्येनावलोक्य. ८ ०चलन्तीं.

राक्ष०—(तथा[1] करोति ।)

मल०—आर्य[2] चिरदर्शनेनार्यस्य वयमुद्विग्नाः ।

राक्ष०—कुमार प्रयाणे प्रतिविधानमनुतिष्ठता मया कुमाराद-यमुपालम्भोधिगतः ।

मल०—आर्य प्रयाणे कथं प्रतिविहितमिति श्रोतुमिच्छामि ।

राक्ष०—कुमार एवमादिष्टा कुमारानुयायिनो[3] राजानः । (प्रस्थातव्यमिति पूर्वोक्तं पठति ।)

मल०—(स्वगतम् ।) कथं य एव मद्विनाशेन चन्द्रगुप्तमाराधयि-तुमुद्यतास्त एव मां परिवृण्वन्ति (प्रकाशम् ।) आर्य अस्ति कश्चिद्यः कुसुमपुरं प्रति गच्छति तत आगच्छति वा ।

राक्ष०—[4]अवसितमिदानीं गतागतप्रयोजनम् । [5]अल्पैरहोभिर्वयमेव तत्र गन्तारः[6] ।

मल०—(स्वगतम् ।) विज्ञायते । (प्रकाशम् ।) यद्येवं ततः किमार्येणायं सलेखः पुरुषः प्रेषितः[7] ।

राक्ष०—(विलोक्य ।) अये सिद्धार्थकः । भद्र किमिदम् ।

सिद्धा०—(सबाष्पं लज्जां नाटयनम् ।) प्रसीदत्वमात्यः । ताड्यमानेन मया न पारितं रहस्यं धारयितुम् । (पसीददु अमच्चो । ताडीअन्तेण मए ण पारिदं [8]रहस्सं धारिदुं ।)

राक्ष०—भद्र कीदृशं रहस्यमिति न खल्ववगच्छामि ।

सिद्धा०—ननु विज्ञापयामि ताड्यमानेन मया । (णं विण्णवेमि ताडिअंतेण मए[9] ।) (इत्यर्द्धोक्ते सभयमधोमुखस्तिष्ठति ।)

आर्य चिरदर्शनेति । चिरदर्शनेन दर्शनविलम्बकरणेनोद्विग्नाः कार्यत्वरया व्यग्रा इति वाक्यार्थः । त्वद्दर्शनमिदानीमस्माकमरुन्तुदमिति गूढम् । कुमार प्रयाणे प्रतिविधानमनुतिष्ठतेतीदमजानानस्योत्तरम् ।

परिवृण्वन्तीति । कौलूताद्याः पञ्च राजान इत्यर्थः । विज्ञायत इति । वयमेवात्र चन्द्रगुप्तं निग्रहीतुं गन्तार इति राक्षसस्य ऋजुराशयो मलयकेतुनान्यथा गृहीतः । चन्द्रगुप्तसाचिव्यार्थं गन्तार इति विज्ञायत इति । विज्ञापयामि ताड्य-मानेनेति अस्यार्धोक्तस्य पूरणवाक्यमेवमतिताड्यमानेनेति वक्ष्यमाणं द्रष्टव्यम् ।

---

१ उपविशति.   २ अमात्य.   ३ कुमारस्यानु०.   ४ कुमार अव०.   ५ पञ्चषैः.
६ यास्यामः.   ७ कुसुमपुरं प्रस्थापितः.   ८ तद्र०.   ९ अमच्चस्स रहस्सं.   इत्य०.

मल०—भागुरायण स्वामिनः पुरस्ताद्भीतो लज्जितो वा नैष कथयिष्यति। स्वयमेवार्याय कथय।

भागु०—यदाज्ञापयति कुमारः। अमात्य एव कथयति यथाहममात्येन लेखं दत्त्वा वाचिकं सन्दिश्य चन्द्रगुप्तसकाशं प्रेषित इति।

राक्ष०—भद्र सिद्धार्थक अपि सत्यम्।

सिद्धा०—(लज्जां नाट्यन्।) एवमतिताड्यमानेन मया निवेदितम्। (एवं अतिताडिअन्तेन मए णिवेदिदं।)

राक्ष०—[१]अनृतमेतत्। ताड्यमानः पुरुषः किमिव न ब्रूयात्।

मल०—सखे भागुरायण दर्शय लेखम्। वाचिकमेष भृत्यः कथयिष्यति।

भागु०—अमात्य अयं लेखः।

राक्ष०—(वाचयित्वा।) कुमार शत्रोः प्रयोग एषः।

मल०—लेखस्याशून्यार्थमार्येणेदमप्याभरणमनुप्रेषितम्। तत्कथं शत्रोः प्रयोग एष[३]ः।

राक्ष०—(आभरणं निर्वर्ण्य।) कुमारेणैतन्मह्यमनुप्रेषितम्। मयाप्येतत्कस्मिंश्चित्परितोषस्थाने सिद्धार्थकाय दत्तम्।

भागु०—ईदृशस्[४]य विशेषतः कुमारेणात्मगात्रादवतार्य प्रसादीकृतस्येयंपरित्यागभूमिः।

मल०—वाचिकमप्याप्ततमादस्मा[५]च्छ्रोतव्यमिति लिखितमार्येण।

राक्ष०—कुतो वाचिकं कस्य वाचिकम्। लेख एवास्मदीयो न भवति।

मल०—इयं तर्हि कस्य मुद्रा।

राक्ष०—[६]कपटमुद्रामुत्पादयितुं शक्नुवन्ति धूर्ताः।

भागु०—कुमार सम्यगमात्यो विज्ञापयति। भद्र सिद्धार्थक केनायं लिखितो लेखः।

कुमारेत्यादिना एवं वदता राक्षसेन समाहितेपि सोल्लुण्ठनं तदन्यथयति भागुरायणः। ईदृशस्येत्यादिना। अस्मादिति। वाचिकमप्यस्माच्छ्रोतव्यमित्यार्येण लिखितमिति व्यवहितेनान्वयः।

---

१ अमात्यराक्षसेन. २ कुमार अनृ०. ३ एष स्यात्. (इत्याभरणं दर्शयति) ४ ०स्याभरणविशेषस्य. ५ सिद्धार्थकात्. ६ कुमार ०मुद्रामपि.

सिद्धा०—(राक्षसमुखमवलोक्य तूष्णीमधोमुखस्तिष्ठति ।)

भागु०—भद्र अलं पुनरात्मानं ताडयितुम्[1] । कथय ।

सिद्धा—आर्य शकटदासेन । (अज्ज सअडदासेण ।)

राक्ष०—कुमार यदि शकटदासेन लिखितस्ततो मयैव लिखितः ।

मल०—विजये शकटदासं द्रष्टुमिच्छामि ।

प्रती०—यत्कुमार आज्ञापयति । (जं कुमारो आणवेदि ।)

भागु०—(स्वगतम् ।) न खल्वनिश्चितार्थमार्यचाणक्यप्रणिधयोभिधास्यन्ति । भवत्वेवम् । (आगत्य शकटदासो वा सोयं लेख इति प्रत्यभिज्ञाय पूर्ववृत्तं प्रकाशयेत् । एवं सति सन्दिहानो मलयकेतुरस्मिन्प्रयोगे श्लथादरो भवेत्* ।) (प्रकाशम् ।) कुमार न कदाचिदपि शकटदासोमात्यस्याग्रतो मया लिखितमिति प्रतिपत्स्यते । अतोन्यैर्लिखितमस्यानीयतां वर्णसंवाद एवैतं विभावयिष्यति ।[2]

मल०—विजये एवं क्रियताम् ।

भागु०—कुमार मुद्रामप्यानयत्वियम् ।

मल०—उभयमप्यानीयताम् ।

प्रती०—यत्कुमार आज्ञापयति । (जं कुमारो आणवेदि ।) (इति निष्क्रम्य पुनः प्रविश्य ।) कुमार इदं तच्छकटदासेन स्वहस्तलिखितं पत्रं मुद्रापि । (कुमार इदं तं सअडदासेण सहत्थलिहिदं पत्तअं मुद्दावि ।)[3]

कुमार यदि शकटदासेनेति । शकटदासः सर्वथा न लेखिष्यतीति तस्मिन्विस्रम्भप्रत्ययादियमुक्तिः । भवत्वेवमिति । पूर्वं शकटदासहस्तेन छलाचाणक्येन लेखितामित्यजानत इयमुक्तिः । आर्यचाणक्येनैव केनचिद्व्याजेन सिद्धार्थकप्रेरणेन शकटदासं वञ्चयित्वा तद्धस्तेनेदं लिखितं स्यात् । अतः परं शकटदास इहानीतश्चेत्कुसुमपुर एवानेन सिद्धार्थकेन मद्धस्ताल्लिखियोयं लेख इति स्पष्टं वदेत् । ततः सर्वोप्ययं चाणक्यकूटनीतिप्रयोगो व्याकोपितः स्यादित्याशयेन प्रत्युत्पन्नमतिर्भागुरायण आह भवत्वेवम् । शकटदासागमनं परिहरामीत्यर्थः ।

कुमार न कदाचिदिति । अमात्येन लेखितमपि स्वेन लिखितमपि स्वामिद्रोहभयान्न कथयिष्यतीत्यर्थः । अतः प्रतिलिखितमिति । एतमर्थं परिच्छेत्स्यतीत्यर्थः । कुमार मुद्रापीति । आनीयतामिति पूर्वेण प्रश्लिष्य प्रश्नः ।

---

१ ताडयित्वा. २ प्रतिलि०. ३ प्रती०—कुमार मुद्दावि. * एतदधिकं क्वचित्.

मल०—(उभयमपि नाट्येन विलोक्य ।) आर्य संवदन्त्यक्षराणि ।

राक्ष०—(स्वगतम् ।) संवदन्त्यक्षराणि । शकटदासस्तु मित्रमिति च विसंवदन्त्यक्षराणि । किं नु शकटदासेन ।

स्मृतं स्यात्पुत्रदाराणां विस्मृतस्वामिभक्तिना ।
चलेष्वर्थेषु लुब्धेन न यशःस्वनपायिषु ॥ १४ ॥

अथवा कः सन्देहः ।

मुद्रा तस्य कराङ्गुलिप्रणयिनी सिद्धार्थकस्तत्सुहृ-
त्तस्यैवापरलेख्यसूचितमिदं लेख्यं प्रयोगाश्रयम् ।
सुव्यक्तं शकटेन भेदपटुभिः सन्धाय सार्धं परै-
र्भर्तृस्नेहपराङ्मुखेन कृपणं प्राणार्थिना चेष्टितम् ॥ १५ ॥

मल०—(विलोक्य ।) आर्य अलङ्कारत्रयं श्रीमता यदनुप्रेषितं तदुपगतमिति यल्लिखितं तन्मध्यात्किमिदमेकम् । (निर्वर्ण्यात्मगतम् ।) कथं तातेन धृतपूर्वमिदमाभरणम् । (प्रकाशम् ।) आर्य कुतोयमलङ्कारः ।

राक्ष०—वणिग्भ्यः क्रयादधिगतः ।

मल०—विजये अपि प्रत्यभिजानासि भूषणमिदम् ।

प्रतीहारी—(निर्वर्ण्य सबाष्पम् ।) कथं न प्रत्यभिजानामि । इदं सुगृहीतनामधेयेन पर्वतेश्वरेण धारितपूर्वम् । (कुमार कहं ण पच्चभिजाणामि । इदं सुगिहीदणामधेएण पव्वदीसरेण धारिदपुव्वं ।)

मल०—(सबाष्पम् ।) हा तात ।

एतानि तानि तव भूषणवल्लभस्य
गात्रोचितानि कुलभूषण भूषणानि ।
यैः शोभितोसि मुखचन्द्रकृतावभासो
नक्षत्रवानिव शरत्समयप्रदोषः ॥ १६ ॥

संवदन्तीति । शकटदासस्तु मित्रमित्ययमर्थो विसंवदति विरुध्यते । तस्याप्तत्वे संशयो जायत इत्यर्थः ।

स्मृतमिति । पुत्रदारस्येत्यधीगर्थेति कर्मणि षष्ठी । स्वामिभक्तिं यशश्च परिमृज्य चलेषु नश्वरेष्वर्थेषु पुत्रदारादिषु च लुब्धः स्यादित्यर्थः ॥ १४ ॥ मुद्रेति । प्रयोगाश्रयं कूटप्रयोगरचितमित्यर्थः । कृपणं दीनं कृत्यं चेष्टितं व्यवसितम् ॥ १५ ॥

एतानीति । वल्लभानि प्रियाणि भूषणानि यस्येति बहुव्रीहिः । शेषं स्पष्टम् ॥ १६ ॥

---

१ तत्किं नु, किमिदानीम्. २ विस्मृताः स्वामिभक्तयः. ३ पत्रं. ४ कष्टम्. ५ इदं क्खु.

राक्ष०—(स्वगतम् ।) कथं पर्वतेश्वरेण धृतपूर्वाणीत्याह । व्यक्तमेवास्य भूषणानि चाणक्यप्रयुक्तेन वणिग्जनेनास्मासु विक्रीतानि ।

मल०—आर्य तातेन धृतपूर्वाणां विशेषतश्चन्द्रगुप्तहस्तगतानां क्रयादधिगमः कथं युज्यते । अथवा युज्यत एवैतत् । कुतः ।

चन्द्रगुप्तस्य विक्रेतुरधिकं लाभमिच्छतः ।
कल्पिता मूल्यमेतेषां क्रूरेण भवता वयम् ॥ १७ ॥

राक्ष०—(स्वगतम् ।) अहो सुश्लिष्टोभूच्छत्रुप्रयोगः । कुतः ।

लेखोयं न ममेति नोत्तरमिदं मुद्रा मदीया यतः
सौहार्दं शकटेन खण्डितमिति श्रद्धेयमेतत्कथम् ।
मौर्ये भूषणविक्रयं नरपतौ को नाम संभावये-
त्तस्मात्संप्रतिपत्तिरेव हि वरं न ग्राम्यमत्रोत्तरम् ॥ १८ ॥

मल०—एतदार्य पृच्छामि ।

राक्ष०—कुमार य आर्यस्तं पृच्छ । वयमिदानीमनार्याः संवृत्ताः ।

मल०—

मौर्योसौ स्वामिपुत्रः परिचरणपरो मित्रपुत्रस्तवाहं
दाता सोर्थस्य तुभ्यं स्वमतमनुगतस्त्वं तु मह्यं ददासि ।
दास्यं सत्कारपूर्वं ननु सचिवपदं तत्र ते स्वाभ्यमत्र
स्वार्थे कस्मिन्समीहा पुनरधिकतरे त्वामनार्यं करोति ॥ १९ ॥

राक्ष०—कुमार एवमयुक्तव्याहारिणा भवतैव निर्णयो दत्तः । भवतु तव को दोषः । (मौर्योसौ स्वामिपुत्र इति युष्मदस्मदोर्व्यत्ययेन पठति ।)

मल०—(लेखमलंकरणस्थगिकां च निर्दिश्य ।) इदमिदानीं किम् ।

राक्ष०—(सबाष्पम् ।) विधिविलसितम् । कुतः ।

लेखोयमिति । शकटदासेन सौहार्दं परित्यज्येदं लिखितमिति ग्राम्ये परिहारे उक्ते कः श्रद्दध्यादित्यर्थः ॥ १८ ॥ [स्वामिपुत्रस्त्वया परिचर्य इति शेषः । स त्वयानुगतः स्वमतं यथा तथा तुभ्यमर्थस्य दाता । अत्र मयानुगतस्त्वं मह्यं स्वमतमर्थं ददासि ।] एवं मौर्यसेनातोप्यतिशायिते मयि तव स्वातन्त्र्ये स्थिते इतोप्यधिकतरं कं स्वार्थमवलम्ब्येमवनार्यो जातोसीतिनिष्ठुर उपालम्भः ॥ १९ ॥

[व्यत्ययेन पठति–मित्रपुत्रो मम त्वं.. मह्यं...गतोहं तु तुभ्यं ददामि इ०]

इदमिदानीं किमिति । अयं कस्य दोष इत्यधिक्षेपः ।

---

१ (प्रकाशम्) एतान्यपि चा०. २ वणिग्भ्य, क्रया, वणिग्विक्रय इति न. ३ इच्छता. ४ पदं. ५ सबाष्पमित्यधिकम्. ६ ०मतभृततनुत्वं च. ७ अभियुक्त, व्यवहारिणा.

भृत्यत्वे परिभावधामनि सति स्नेहात्प्रभूणां सतां
पुत्रेभ्यः कृतवेदिनां कृतधियां[1] येषां न भिन्ना वयम् ।
ते लोकस्य परीक्षकाः क्षितिभृतः पापेन येन क्षता-
स्तस्येदं विपुलं विधेर्विलसितं पुंसां प्रयत्नच्छिदः[2] ॥ २० ॥

मल०—(सरोषम्[3] ।) किमद्यापि निह्नूयते एव विधेः किलैतद्व्यवसितं न लोभस्येति । अनार्य ।

कन्यां तीव्रविषप्रयोगविषमां कृत्वा कृतघ्ने[4] त्वया
विश्रम्भप्रवणः पुरा मम पिता नीतः कथाशेषताम् ।
संप्रत्याहितगौरवेण भवता मन्त्राधिकारे रिपौ[5]
प्रारब्धाः प्रलयाय मांसवदहो विक्रेतुमेते वयम् ॥ २१ ॥

राक्ष०—(स्वगतम् ।) अयमपरो गण्डस्योपरि स्फोटः । (प्रकाशम् । कर्णौ पिधाय ।) शान्तं पापं शान्तं पापम् । नाहं[6] पर्वतेश्वरे विषकन्यां प्रयुक्तवान् ।

मल०—केन तर्हि व्यापादितस्तातः ।

राक्ष०—दैवमत्र प्रष्टव्यम् ।

मल०—(सक्रोधम् ।) दैवमत्र प्रष्टव्यम् । न क्षपणको जीवसिद्धिः ।

राक्ष०—(स्वगतम् ।) कथं जीवसिद्धिरपि चाणक्यप्रणिधिः । हन्त रिपुभिर्मे हृदयमपि स्वीकृतम् ।

मल०—(सक्रोधम् ।) भासुरक आज्ञाप्यतां शिखरसेनः[7] । य एते राक्षसेन सह सुहृत्ता[8]मुत्पाद्यास्मच्छरीरद्रोहेण चन्द्रगुप्तमाराधयितुकामाः

भृत्यत्वे इति । परिभवो न्यक्कारः तद्विषयो भृत्योऽप्यहं प्रभुभिर्न्यक्कारं कर्तुं समर्थैरपि यैः कृतज्ञैः सर्वज्ञैः स्वामिभिरपत्यनिर्विशेषतया दृष्टोऽस्मि ते दैवेन हता इत्यर्थः ॥२०॥

कन्यामिति । मन्त्राधिकारे मौर्यस्य मन्त्रित्वे आहितगौरवेण घृताभिलाषेणेत्यर्थः । रिपौ चन्द्रगुप्ते प्रलयाय नाशाय मांसवद्विक्रेतुमारब्धा नियोजिता इत्यन्वयः । इदानीमपि राक्षसेनानेकराजकार्यकुशलेन किमपि तादृशमारभ्यत इति पूर्वं जीवसिद्धिनोपक्षिप्तस्योपजापदुर्विकल्पस्यायमुद्गार इत्यवधेयम् ॥ २१ ॥

अयमपर इति । मर्मस्थानव्रणस्योपरि व्रणान्तरमित्यर्थः । दैवमत्रेति । चाणक्यनामागृहीत्वा दैवमिति वदन्स्वस्य परदोषानाविष्करणरूपं महामनस्त्वं सूचितवान् ।

---

१ कृताधियः. २ प्रयत्नो वृथा. ३ सक्रोधम्. ४ कृतघ्नात्मना. ५ रिपो. ६ नाहं विषकन्यामारोपितवानपापोऽहं पर्वतेश्वरे. ७ सेनापतिः इत्य०. ८ सौहार्दम्.

पञ्च राजानः कौलूतश्चित्रवर्मा मलयनरपतिः सिंहनादः काश्मीरः पुष्कराक्षः सिन्धुराजः सुषेणः पारसीकाधिपो मेघनाद इति। एतेषु त्रयः प्रथमे मदीयां भूमिं कामयन्ते ते गम्भीरश्वभ्रमभिनीय पांशुभिः पूर्यन्ताम्। इतरौ तु हस्तिबलकामुकौ हस्तिनैव घात्येतामिति।

पुरुषः—तथा। (तहा।) (इति निष्क्रान्तः।)

मल०—(सक्रोधम्।) राक्षस राक्षस नाहं विश्रम्भघाती राक्षसो मलयकेतुः खल्वहम्। तद्गच्छ समाश्रीयतां सर्वात्मना चन्द्रगुप्तः। पश्य।

विष्णुगुप्तं च मौर्यं च सममप्यागतौ त्वया।
उन्मूलयितुमीशोहं त्रिवर्गमिव दुर्नयः॥ २२॥

भागु०—कुमार कृतं कालहरणेन। सांप्रतं कुसुमपुरोपरोधायाज्ञाप्यन्तामस्मद्बलानि।

गौडीनां लोध्रधूलीपरिमलबहुलान्धूमयन्तः कपोला-
न्क्लिश्नन्तः कृष्णिमानं भ्रमरकुलरुचः कुञ्चितस्यालकस्य।
पांशुस्तम्बा बलानां तुरगखुरपुटक्षोभलब्धात्मलाभाः
शत्रूणामुत्तमाङ्गे गजमदसलिलच्छिन्नमूलाः पतन्तु॥ २३॥

(सपरिजनो निष्क्रान्तो मलयकेतुः।)

राक्ष०—(सावेगम्।) हा धिक्कष्टम्। तेपि घातिताश्चित्रवर्मादयस्तपस्विनः। तत्कथं सुहृद्विनाशाय राक्षसश्चेष्टते न रिपुविनाशाय। तत्किमिदानीं मन्दभाग्यः करवाणि।

विष्णुगुप्तमिति। दुर्नयदृष्टान्तेन स्वस्य दौरात्म्यं रोषावेशवशादुद्घाटितम्॥ २२॥ स्वपक्षबलहीनमेनं भद्रभटादिभिर्निग्राहयितुं त्वरयति। गौडीनामिति। लोध्रपुष्पाणां धूली परागस्तस्य परिमलः लेपजनितो गन्धविशेषस्तेन बहुलान्व्याप्तान् गौडीनां गौडस्त्रीणां कापालान्धूमयन्तः धूमवतः कुर्वतः मलिनयन्त इति यावत्। णाविष्ठवद्भावेन मतुपो लोपः। गौडस्त्रियः कपोलान्लोध्ररजोभिरलंकुर्वन्तीत्यतस्तेषां तत्परिमलबहुलत्वम्। तथा तासामेव भ्रमरकुलरुचः नीलस्य कुञ्चितस्य संयमितस्यालकस्य कृष्मिमानं नैल्यं क्लिश्नन्तोभिभवन्त इत्यर्थः। बलानां सैन्यानां तुरगखुरपुटक्षोभेण लब्धात्मलाभाः जनिताः पांशुस्तम्बाः गजमदसलिलैच्छिन्नमूलाः सन्तः शत्रूणामुत्तमाङ्गे पतन्तु॥ २३॥

---

१ धिराजो मेघाक्षः. २ तेभ्यो भूमिरेव दीयताम्। ने. ३ कामौ. ४ प्रतिष्ठन्ताम्. ५ धूम्रयन्तः. ६ व्यूढा.

किं गच्छामि तपोवनं न तपसा शाम्येत्सवैरं मनः
किं भर्तृननुयामि जीवति रिपौ स्त्रीणामियं योग्यता ।
किं वा खड्गसखः पताम्यरिबले नैतच्च युक्तं भवे-
च्चेतश्चन्दनदासमोक्षरभसं रुन्ध्यात्कृतघ्नं न चेत् ॥ २४ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति पञ्चमोऽङ्कः ।

षष्ठोऽङ्कः ।

(ततः प्रविशत्यलंकृतः सहर्षः सिद्धार्थकः ।)

सिद्धा०—
जयति जलदनीलः केशवः केशिघाती
जयति च जनदृष्टिचन्द्रमाश्चन्द्रगुप्तः ।
जयति जयनकार्यं यावत्कृत्वा च सर्वं
प्रतिहतपरपक्षा आर्यचाणक्यनीतिः ॥ १ ॥
जअदि जलदणीलो केसवो केसिघादी
जअदि अ जणदिट्ठीचन्दमा चन्दउत्तो ।

किं गच्छामीति । जीवति रिपाविति शत्रुवैरनिर्यातनमकृत्वा स्त्रीवदनुमरणमयुक्तमिति भावः । खड्गसख इति । खड्गमात्रसहायेनाखिलं कृत्स्नं क्षपयितुं समर्थोऽस्मि अथापि चन्दनदासस्योपकारिणो मोक्षो न भवेदिति रभसं रभसवदुत्सुकं चेतः रुन्ध्यात् अखिलक्षपणानां रोद्धुं प्रवर्तेत इत्यर्थः । प्रवर्तनायां लिङ् । न चेत् न रुन्ध्याचेत्कृतघ्नं भवेदित्यन्वयः । पारक्रमपक्षे चन्दनदासविषये कृतघ्नतादोषः स्वस्यापरिहार्यः स्यादिति भावः । अप्यकार्यशतं कृत्वा येन केनाप्युपायेन चन्दनदासमोचनमेव संप्रत्यावश्यकत्वेनापतितमतस्तत्रैव प्रयतिष्य इत्यत्रतात्पर्यम् ॥ २४ ॥

इति श्रीत्र्यम्बकयज्वप्रभुवर्याश्रितढुण्ढिराजव्यासयज्वविरचिते
मुद्राराक्षसनाटकव्याख्याने पञ्चमोऽङ्कः समाप्तः ।

इत्थं मलयकेतुनिग्रहरूपमवान्तरकार्यनिर्वहणं कृतम् । अतः परं राक्षससंग्रहणरूपप्रधानकार्यनिर्वाहार्थं चन्द्रगुप्तलक्ष्मीस्थैर्यरूपस्य महाफलस्य च सिद्ध्यर्थं षष्ठसप्तमावङ्कावारभ्येते । जयतीति । कृतकार्यतया चन्द्रगुप्तेन भूषणादिनालंकृतेन सिद्धार्थकेनेष्टदेवतराजचाणक्यनीतीनां जय आघोष्यते । जयत्यनेनेति । जयनं सैन्ययुद्धादि । करणे ल्युट् । जयनेन जयकारणेन सेनादिनैव यत्कार्यं तद्यावत्सर्वं स्वयमेव कृत्वा चाणक्यनीतिर्जयतीत्यन्वयः । सेनासन्नाहयुद्धादिवमनपेक्ष्य नीत्यैव सर्वं राज-

जअदि जअणकज्जं जाव काऊण सव्वं
पडिहदपरपक्खा अज्जचाणक्कणीदी ॥ १ ॥

तावच्चिरस्य कालस्य प्रियवयस्यं समिद्धार्थकं पश्यामि । (परिक्रम्याव-लोक्य च ।) एष मे प्रियवयस्यः समिद्धार्थकः इत एवागच्छति । यावदे-नमुपसर्पामि । (दाव चिरस्स कालस्स पिअवअस्सं समिद्धत्थअं पेक्खामि एसो मे पिअवअस्सओ इदो एव्व आअच्छदि । जाव णं उपसप्पामि ।)

(ततः प्रविशति समिद्धार्थकः ।)

समिद्धा०—

सन्तापे तारेशानां गेहोत्सवे सुखायमानानाम् ।
हृदयस्थितानां विभवा विरहे मित्राणां दूनयन्ति ॥ २ ॥
संदावे तारेसाणं गेहूसवे सुहाअत्ताणं ।
हिअअट्ठिदाणं विहवा विरहे मित्ताणं दूणन्दि ॥ २ ॥

श्रुतं मया मलयकेतुकटकात्प्रियवयस्यः सिद्धार्थक आगत इति । तद्यावदेनमन्वेषयामि । (इति परिक्रामति । विलोक्य ।) एष सिद्धार्थकः । (सुदं मए मलअकेदुकडआदो पिअवअस्सओ सिद्धत्थओ आअदोत्ति । ता जाव णं अण्णेसामि । एसो सिद्धत्थओ ।)

सिद्धा०—(उपसृत्य ।) कथं समिद्धार्थकः । अपि सुखं प्रिय-वयस्यस्य । (कहं समिद्धत्थओ । अवि सुहं पिअवअस्सस्स ।)

(इत्यन्योन्यमालिङ्गतः ।)

समिद्धा०—वयस्य कुतो मे सुखं येन त्वं चिरप्रवासप्रत्यागतोप्यद्य न मे गेहमागच्छसि । (वअस्स कुदो मे सुहं जेण तुमं चिरप्पवासप-च्चागदो वि अज्ज ण मे गेहं आअच्छसि ।)

कार्यं चाणक्यः साधितवानित्यर्थः । बहोः कालात्तस्य दर्शनमावश्यकमित्यर्थः ॥ १॥ सन्तापे इति । सन्तापे तारेशानां चन्द्राणां सन्तापहारिणामित्यर्थः । गेहोत्सवे इति । मित्रैर्विना गेहोत्सवा व्यर्था इत्यर्थः । हृदयस्थितानां सर्वदा चिन्त्यमानां मित्राणां विरहे विभवा ऐश्वर्याणि दुःखायैव भवन्ति इति सिद्धार्थकविरहेण क्लिश्यते ॥ २ ॥

---

१ उपसप्पदि सन्तावेन्ता आवाणेसुं महूसवेसुं रुआवेन्ता । हिअआट्ठिदावि विहवा विरहे मित्ताणं दूमेन्ति ॥ (सन्तापयन्त आपानेषु महोत्सवेषु रोदयन्तः (रुजायन्तः ।) हृदयस्थिता अपि विभवा विरहे मित्राणां दुन्वन्ति ॥ २ (विलोक्य ।) कधं इदो ज्जेव पिअवअस्सओ सुसिद्धत्थओ । (उपगम्य ।). ४ उभाव. ५ अआणिअ वुत्तन्तं अण्णदो गदोसि त्ति.

सिद्धा०—प्रसीदतु वयस्यः । दृष्टमात्र एव आर्यचाणक्येनाज्ञप्तोस्मि यथा सिद्धार्थक गच्छ इमं प्रियोदन्तं देवस्य चन्द्रश्रिये निवेदयेति । तत एतस्मै निवेद्यैवमनुभूतपार्थिवप्रसादोहं प्रियवयस्यं प्रेक्षितुं तवैव गेहं चलितोस्मि । (पसीदंदु वअस्सो । दिठ्ठमेत्तो एव्व अज्जचाणक्केण आणत्तोह्मि जह सिद्धत्थअ गच्छ एदं पिओदन्त देवस्स चन्दसिरिणो णिवेदेहित्ति । तदो एदस्स णिवेदिअ एव्वं अणुभूदपत्थिवप्पसादो अहं पिअवअस्सं पेक्खिदुं तुह एव्व गेहं चलिदोह्मि ।)

समिद्धा०—वयस्य यदि मे श्रोतव्यं भवति ततः कथय किं तत्प्रियं प्रियदर्शनाय चन्द्रश्रिये निवेदितम् । (वअस्स जदि मे सुणिदव्वं भोदि तदो कहेही किं तं पिअं जं पिअदंसणस्स चन्दसिरिणो णिवेदिदं ।)

सिद्धा०—वयस्य किं तवाप्यश्रोतव्यमस्ति तन्निशामय । अस्ति तावच्चाणक्यनीतिमोहितमतिना मलयकेतुहतकेन निष्कास्य राक्षसं हताश्चित्रवर्मप्रमुखाः प्रधानाः पञ्च पार्थिवाः । ततोसमीक्ष्यकार्येषु दुराचार इत्युज्झित्वा मलयकेतुकटकभूमिं कुशलतायै भयविलोलशेषसैनिकपरिवारेषु स्वकं स्वकं विषयं सभयं प्रस्थितेषु पार्थिवेषु निर्विण्णहृदयेषु सकलसामन्तेषु भद्रभटपुरुषदत्तडिङ्गरातबलगुप्तराजसेनभागुरायणरोहिताक्षविजयवर्मप्रमुखैः संयम्य गृहीतो मलयकेतुः । (वअस्स किं तुहवि असुणिदव्वं अत्थि ता णिसामेहि । अत्थि दाव चाणक्कणीदिमोहिदमदिणा मलअकेदुहदएण णिक्कासिअ रक्खसं हदा चित्तवम्मप्पमुहा प्पहाणा पञ्च पत्थिवा । तदो असमिक्खकारी एसो दुराआरोत्ति उज्झिअ मलयकेअकडअभूमिं कुसलदाए भअविलोलसेससैणिकपरिवारेसु सकं सकं विसअं सभअं प्पत्थिदेसु पात्थिवेसु णिव्विण्णहिअएसु सअलसामन्तेसु भद्दभट्टपुरिसदत्तडिङ्गरादबलउत्तराअसणेभागुराअणरोहिदक्खविजअवम्मप्पमुहेहिं संजमिअ गिहीदो अमअकेदु ।)

समिद्धा०—वयस्य भद्रभटप्रमुखाः किल देवाच्चन्द्रगुप्तादपरक्ता मलयकेतुं समाश्रिता इति लोके मन्त्यते । तत्किं निमित्तं कुकविकृतनाटकस्येवान्यन्मुखेन्यन्निर्वहणे । (वअस्स भद्दभटप्पमुहा किल देवस्स

१ पसी०पसी०. २ वुत्तन्तं पिअं पिअदंसणस्स ३ ता मं पि सुणावेहि. ४ अकहिदव्वं ५ णिराकरिअ. ७ कढुअ उ०. ७ हदअ. ८ णिअमूभिकु०. ९ सेण्णतणूकिदप.

चन्दउत्तंस्स अवरत्ता मलअकेदुं समस्सिदा त्ति लोए मन्तीअदि। ता किं णिमित्तं कुकविकिदणाडअस्स विअ अण्णं मुहे अण्णं णिव्वहणे।)

सिद्धा०—वयस्य दैवगत्या इवाश्रुतगत्यै नम आर्य चाणक्यनीत्यै। (वअस्स देवगदीए विअ असुणिदगदीए णमो अज्जचाणक्कणीदीए।

समिद्धा०—ततस्ततः। (तदो तदो।)

सिद्धा०—ततः प्रभूतसारसाधनसमेतेनेतो निष्क्रम्यार्यचाणक्येन प्रतिपन्नराजलोकमशेषं म्लेच्छबलम्। (तदो पभूदसारसाहणसमेदेण[2] इदो णिक्कमिअ अज्जचाणक्केण पडिवण्णं अर[3]ाअलोअं असेसं मिलेच्छबलं।)

समिद्धा०—वयस्य कुत्र तत्। (वअस्स कहिं तं।)

सिद्धा०—यत्रैते (जहिं एदे)

अतिशयगुरुकेण दानदर्पेण दन्तिनः
सजलजलदलीलामुद्वहन्तो नदन्ति।
कशाप्रहारभयेन जातकम्पोत्तरङ्गाः
गृहीतजयनशब्दाः संपतन्ति (संप्लवन्ते) तुरङ्गाः॥ ३॥

अदिसअगुरुएण दाणदप्पेण दन्ती
सजलजलदलील[4]ामुव्वहन्तो णदन्ति।
कसपहरभएण जाअकम्पोत्त[5]रङ्गा
गिहिदजअणसद्दासंपअ[6]न्ते तुरङ्गा॥ ३॥

समिद्धा०—वयस्य एतत्तावत्तिष्ठतु। तथा सर्वलोकप्रत्यक्षमुज्झिताधिकारः स्थित्वा आर्यचाणक्यः किं पुनरपि तदेव मन्त्रिपदमारूढः। (वअस्स एदं दाव चिट्ठदु। तहा सव्वलोअपच्चक्खं उज्झिआहिआरो चिट्ठिअ अज्जचाणक्को किं पुणो वि तं एव्व मन्तिपदं आरूढो।)

चन्द्रगुप्तस्येति। चन्द्रगुप्ते अपरक्ता इत्यर्थः। शेषे षष्ठी।

अतिशयेति। जातकम्पा अत एवोत्तरङ्गाः। कशाताडनभयेन अत्यन्तं कम्पमानाश्चपला अश्वाः। गृहीतजयनशब्दाः जयनं जयस्तस्य शब्दः गृहीतो ज्ञातो जयनशब्दो यैस्ते तथाभूताः जयघोषणां श्रुत्वा सर्वतः संपतन्तीत्यर्थः॥ ३॥

---

१ सिरिणो. २ समुदाएण. ३ समलराअलोअसहिअं असेसराअबलं. ४ ०णीलाउब्भमन्तो (उद्भ्रमन्तः). ५ ०म्पा तुरन्ता (त्वरयन्तः). ६ सम्पदन्ते.

सिद्धा०—अतिमुग्धोसीदानीं त्वं यदमात्यराक्षसेनाप्यनवगाहितपूर्वमार्यचाणक्यचरितमवगाहितुमिच्छसि। (अदिइमुद्धोसि दाणीं तुमं जो अमच्चरक्खसेण वि अणवगाहिअपुव्वं अज्जचाणक्कचरिदं अवगाहिदुं इच्छसि।)

समिद्धा०—वयस्य अमात्यराक्षसः सांप्रतं कुत्र। (वअस्स अमच्चरक्खसो संपदं कहिं।)

सिद्धा०—तस्मिन्भयविलोले वर्धमाने मलयकेतुकटकान्निष्क्रम्योदुम्बरनामधेयेन चरेणानुसन्धीयमान इदं पाटलीपुत्रमागत इत्यार्यचाणक्याय निवेदितम्। (तस्सिं[1] भअविलोले वड्ढमाणे[3] मलअकेदुकडआदो णिक्कमिअ उदुम्भरणामहेएण चरेण अनुसन्धिज्जमाणो[4] इमं पाडलीउत्तं आअदोत्ति अज्जचाणक्कस्स णिवेदिदं।)

समिद्धा०—वयस्य तथा नामामात्यराक्षसो नन्दराज्यप्रत्यानयने कृतव्यवसायो निष्क्रम्य सांप्रतमकृतार्थः पुनरपीदं पाटलिपुत्रमागत एव। (वअस्स तहा णाम अमच्चरक्खसो णन्दरज्जपच्चाणअणे किदव्ववसाओ णिक्कमिअ संपदं अकिदत्थो पुणोवि[5] इमं पाडलिउत्तं आअदो एव्व।)

सिद्धा०—वयस्य तर्कयामि चन्दनदासस्नेहेनेति। (वअस्स तक्केमि चन्दणदाससिणेहेणत्ति।)

समिद्धा०—वयस्य चन्दनदासस्य मोक्षमिव प्रेक्षे। (वअस्स चन्दणदासस्स[6] मोक्खं विअ पेक्खामि।)

सिद्धा०—कुतोस्याधन्यस्य मोक्षः। स खलु सांप्रतमार्यचाणक्यस्याज्ञप्त्या द्वाभ्यामावाभ्यां वध्यस्थानं प्रवेश्य व्यापादयितव्यः। (कुदो से अधण्णस्स मोक्खो। सो क्खु संपदं अज्जचाणक्कस्स आणत्तीए दुवेहिं अम्हेहिं[7] वज्झट्ठाणं पवेसिअ वावादइदव्वो।)

समिद्धा०—(सक्रोधम्।) किमार्यचाणक्यस्य घातकजनोन्यो नास्ति येनावामीदृशेषु अतिनृशंसेषु नियोगेषु नियोजयति। (किं

आगत एवेति। तस्यागमनमश्लाध्यमित्यर्थः।

---

१ बुद्धि॰ २ सो क्खु तस्सिं॰ ३ वट्टमाणे (वर्तमाने). ४ अनुसरन्तो इमं कुसुमपुरं॰ ६ कध इमं पव्व॰ ६ सव्वं चन्दनदासस्स सिणेहेणत्ति। अध इत्यधिकम्. ७ पि अम्हे॰.

अज्जचाणक्कस्स घादअजणो अण्णो णत्थि जेण अह्मे ईदिसेसुं अदिणिसंसेसु णिओएसु णिओएदि।

सिद्धा०—वयस्य को जीवलोके जीवितुकाम आर्यचाणक्यस्याज्ञप्तिं प्रतिकूलयति। तदेहि चण्डालवेशधारिणौ भूत्वा चन्दनदासं वध्यस्थानं नयावः। (वअस्स को[2] जीवलोए जीविदुकामो अज्जचाणक्कस्स आणत्तिं पडिऊलेदि। ता एहि चण्डालवेसधारिणा भविअ चन्दणदासं वज्झट्ठाणं णएम। इत्युभौ निष्क्रान्तौ।)

इति प्रवेशकः।

(ततः प्रविशति रज्जुहस्तः पुरुषः।)

पुरु०—

षड्गुणसंयोगदृढा उपायपरिपाटिघटितपाशमुखी।
चाणक्यनीतिरज्जू रिपुसंयमनोद्यता जयति॥ ४॥

छग्गुणसंजोअदिढा उवाअपरिवाडिघडिअपासमुही।
चाणक्कणीतिरज्जू रिपुसंजमणुअज्जआ[3] जअदि॥ ४॥

(परिक्रम्यावलोक्य च।) एष स प्रदेश आर्यचाणक्याय उदुम्बरेण कथितो यत्र मया आर्यचाणक्याज्ञप्त्या अमात्यराक्षसः प्रेक्षितव्यः। (विलोक्य।) कथमेष खल्वमात्यराक्षसः कृतशीर्षावगुण्ठन इत एवागच्छति। तद्यावदेभिर्जीर्णोद्यानपादपैरन्तरितशरीरः प्रेक्षे कुत्रासनपरिग्रहं करोतीति। (एसो सो पदेसो अज्जचाणक्कस्स[4] उदुम्बरेण कहिदो जहिं मए अज्जचाणक्काणत्तिए अमच्चरक्खसो पेक्खिदव्वो। कहं एसो क्खु अमच्चरक्खसो किदसीसावगुण्ठणो इदो एव्व आअच्छइ। ताजाव इमेहिं जिण्णुज्जाणपादवेहिं अन्तरिदसरीरो[5] पेक्खामि कहिं आसनपरिग्गहं करेदि त्ति। (परिक्रम्य। स्थितः[6]।)

(ततः प्रविशति यथानिर्दिष्टः सशस्त्रो[7] राक्षसः।)

अथ कथंचिगदगतिकतया चन्दनदासमोचनरभसेन समायातो राक्षसः साहसी महावीरः शस्त्रपाणिर्वशयितुमशक्य इति तद्धस्ताच्छस्त्रं त्याजयितुं पुनरपि चाणक्य उपायमारचयति। षड्गुण इति। समागतं राक्षसमतिसन्धातुं चाणक्यादिष्टोपायचिकीर्षया करे गृहीततामुद्बन्धनरज्जुं चाणक्यनीतित्वेन निरूपितवान्।

---

१ ईदिसेसु णिओजिआ (आवां नियोजितौ); ईदिसे निसंसे कम्मे णिजुञ्जीआदि (ईदृशे नृशंसे कर्मणि नियुनक्ति) २ ण, णिवसिदुकामो. ३ रूजुआ. ४ कस्स पुरदो; उदु०. ५ अववारिद. ६ तथा स्थितः. ७ सशंकः.

राक्ष०—(सास्रम् ।) कष्टं भोः कष्टम् ।

उच्छिन्ना[2]श्रयकातरेव कुलटा गोत्रान्तरं श्रीर्गता
तामेवानुगता गतानुगतिकास्त्यक्तानुरागाः प्रजाः ।
आप्तैरप्यनवाप्तपौरुषफलैः कार्यस्य धूरुज्झिता
किं कुर्व[3]न्त्वथवोत्तमाङ्गरहितैरङ्गैरिव स्थीयते ॥ ५ ॥

अपि च ।

पतिं त्यक्त्वा देवं भुवनपतिमुच्चैरभिजनं
गता छिद्रेण श्रीर्वृषलम[4]विनीतेव वृषली ।
स्थिरीभूता चास्मिन्किमिह करवाम स्थिरमपि
प्रयत्नं नो येषां विफलयति दैवं द्विषदिव ॥ ६ ॥

मया हि ।

देवे गते दिवमतद्विधमृत्युयोग्ये
शैलेश्वरं तमधिकृत्य कृतः प्रयत्नः ।
तस्मिन्हते तनयमस्य तथाप्यसिद्धि-
र्दैवं हि नन्दकुलशत्रुरसौ न विप्रः ॥ ७ ॥

अहो विवेकशून्यताम्लेच्छ[5]स्य । कुतः ।

यो नष्टानपि बीज[6]नाशमधुना शुश्रूषते स्वामिन-
स्तेषां वैरिभिरक्षतः कथमसौ सन्धास्यते राक्षसः ।
एतावद्धि विवेकशून्यमनसा[7] म्लेच्छेन नालोचितं
दैवेनोपहतस्य बुद्धिरथवा सर्वा[8] विपर्यस्यति ॥ ८ ॥

उच्छिन्नाश्रय इति । आप्तैरप्यस्माभिर्दैवोपहतपौरुषफलैरुद्योगः परित्यक्तः । अथ अतःपरं कर्तव्यप्रयत्नाभावात्किं वा कुर्मः । वाशब्दो भिन्नक्रमः । उत्तमाङ्गरहितैरङ्गैः शवैरिवेति यावत्स्थीयते स्थातव्यं प्रसक्तमित्यर्थः ॥ ५ ॥

पतिमिति । उच्चैरभिजनः वंशो यस्य । छिद्रेण कपटेन स्थिरं दृढमपि येषां नः प्रयत्नं द्विषदिव शत्रुवद्दैवमेव द्विषद्भूत्वा विफलयति चेत्किं कुर्मः ॥ ६ ॥

देवे गत इति। अतद्विधः तत्स्वरूपानर्हः मृत्युयोगो यस्य तस्मिन्देवे नन्दे दिवं गते सति शैलेश्वरं पर्वतकमधिकृत्यावलम्ब्य सर्वार्थसिद्धिप्रतिष्ठापनार्थं कृतः प्रयत्नः । अनन्तरं चाणक्येन राज्यार्धपरिपणनप्रलोभनेन मत्तो विभेद्य स्वायत्तीकृते छद्मना विषकन्यया तस्मिन्पर्वतके हतस्य तनयं मलयकेतुमधिकृत्य कृतः प्रयत्न इत्यनुषङ्गः । दैवमेव प्रबलं किमनेन ब्राह्मणमात्रेण कर्तुं शक्यमित्यनादरेण विप्र इत्युक्तम् ॥ ७ ॥ यो नष्टानिति । बीजनाशमिति णमुलन्तं समूलं नष्टानित्यर्थः । अक्षतः दृढगात्रः । स्पष्टमन्यत् ॥ ८ ॥

---

१ सबाष्पम्. २ उच्छन्ना. ३ कुर्मस्त्व०. ४ ०लमिव नीचेव, ५ मलयकेतोरित्यधिकम्. ६ जीव. ७ मूढमतिना. ८ सर्वं, पूर्वं, सर्वात्मना क्षीयते.

तदिदानीमपि तावदरातिहस्तगतो विनश्येन्न तु राक्षसश्चन्द्रगुप्तेन सह सन्दधीत[1]। अथवा मम कामसत्यसन्ध इति वरमयशो न तु शत्रुवञ्चनपराभूत[2] इति। (समन्तादवलोक्य सास्रम्।) एतास्ता[3] देवपादक्रमणपरिचयपवित्रीकृततलाः कुसुमपुरोपकण्ठभूमयः। इह हि।

शार्ङ्गकर्षा[4]वमुक्तप्रशिथिलकविकाप्रग्रहेणात्र देशे
देवेनाकारि चित्रं[5] प्रजविततुरगं बाणमोक्षश्चलेषु।
अस्यामुद्यानराजौ स्थितमिह कथितं राजभिस्तैर्विनेत्थं
संप्रत्यालोक्यमानाः कुसुमपुरभुवो भूयसा दुःखयन्ति॥ ९॥

तत्क नु गच्छामि मन्दभाग्यः। (विलोक्य।) भवतु दृष्टमेतज्जीर्णोद्यानम्। अत्र प्रविश्य कुतश्चिच्चन्दनदासप्रवृत्ति[6]मुपलप्स्ये। अहो[7] अलक्षितनिपाताः पुरुषाणां समविषमदशापरिणतयो भवन्ति। कुतः।

पौरैरङ्गुलिभिर्नवेन्दुवदहं निर्दिश्यमानः शनै-
र्यो राजेव पुरा पुरान्निरगमं राज्ञां सहस्रैर्वृतः।
भूयः संप्रति सोऽहमेव नगरे तत्रैव वन्ध्यश्रमो
जीर्णोद्यानकमेष तस्कर इव त्रासाद्विशामि द्रुतम्॥ १०॥

अथवा येषां प्रासादादिदमासीत्त एव न सन्ति। (नाट्येन प्रविश्यावलोक्य च।) अहो जीर्णोद्यानस्यारमणीता। अत्र[9] हि।

सन्दधीतेति। पूर्वोक्तार्थपरित्यागेनासत्यसन्धो जात इति अयशः मम कामं वरं प्रशस्तमत्यर्थाङ्गीकारे अथवाशब्दः। कदाचिद्दैवगत्या चन्द्रगुप्तसन्धानप्रसक्तिर्वरं न तु शत्रुणा चाणक्येन वञ्चनपराभूत इत्ययशो वरम्। वञ्चनेनैवंभूतेन पराभूततया सुहृत्तमचन्दनदासविपद्दुःखानुभवो न वरमिति भावः।

शार्ङ्गकर्षावमुक्त इति। शार्ङ्गकर्षावमुक्तः अत एव प्रशिथिलः कविकाप्रग्रहः खलीनवल्गा यस्य अत एव प्रजविततुरगं यथा तथा चलेषु लक्ष्येषु स्वयमपि तुरङ्गवेगवशादतिचलेन देवेन पूर्वं नन्देन बाणमोक्षः कृतश्चित्रमाश्चर्यमिति चललक्ष्यवेधनकौशलमुक्तम्। स्थितं कथितमिति भावे क्तः। तैस्तदादिभिः राजभिर्नन्देर्विना संप्रतीत्थं शून्या जीर्णाश्च विलोक्यमाना भूयसा बाहुल्येन दुःखयन्ति दुःखवन्तं कुर्वन्ति। णाविष्ठवद्भावेन मतुपो लोपः॥ ९॥

अलक्षितनिपाता इति अतर्किततागमाः।

---

१ सन्धिं कुर्यात्. २ भूतिः. ३ तावद्देवस्य पादचंक्रम. ४ ०र्ङ्गज्याकृष्टि०. ५ पूर्वं. ६ ०सस्य वृत्तान्तम्. ७ (परिक्रम्य स्वगतम्). ८ शीर्णो०, मेकत०. ९ इथाहि.

विपर्यस्तं सौधं कुलमिव महारम्भरचनं
सरः शुष्कं साधोर्हृदयमिव नाशेन सुहृदाम् ।
फलैर्हीना वृक्षा विगुणविधियोगादिव नया-
स्तृणैश्छन्ना भूमिर्मतिरिव कुनीतैरविदुषः ॥ ११ ॥

अपि च ।

क्षताङ्गीनां[2] तीक्ष्णैः परशुभिरुदग्रैः[3] क्षितिरुहां
रुजा कूजन्तीनामविरतकपोतोपरुदितैः ।
स्वनिर्मोकच्छेदैः परिचितपरिक्लेशकृपया
श्वसन्तः शाखानां व्रणमिव निबध्नन्ति फणिनः ॥ १२ ॥

एते च तपस्विनः[4] ।

अन्तः शरीरपरिशोषमुदग्रयन्तः[5]
कीटक्षतिं शुचमिवातिगुरुं वहन्तः ।
छायावियोगमलिना व्यसने निमग्ना
वृक्षाः श्मशानमुपगन्तुमिव प्रवृत्ताः ॥ १३ ॥

यावदस्मिन्विषमदशापरिणामसुलभे[7] भिन्नशिलातले मुहूर्तमुपविशामि । (उपविश्याकर्ण्य च ।) अये किमयमाकस्मिकः[8] पटुपटहशङ्खमिश्रो नान्दीनादः श्रूयते । य एषः ।

विपर्यस्तमिति । महारम्भा रचना शिल्पं यस्य सौधस्य महारम्भरचना धर्मादिपुरुषार्थी क्रिया यस्य कुलस्य । अविदुषो मूर्खस्य मतिः कुनीतैः कूटनयैः कपटोपदेशैरिव । अत्र जीर्णोद्यानवर्णनव्याजेन सौधकुलादीनामुपमया नन्दकुलविनाशस्तेन स्वहृदयपरिशोषः मलयकेतुयोगात्स्वनयवैफल्यं मलयकेतुमतिविमोहकभागुरायणकुनीतिश्चेत्येते अर्थाश्च ध्वनिताः ॥ ११ ॥

क्षताङ्गीनामिति । उदग्रक्रमभृतां अत्यन्तशुष्काणां रुजा कूजन्तीनामिवेति गम्योत्प्रेक्षा । परिचितपरिक्लेशनिमित्तकृपयेवेति फणिनां स्वाभाविकं श्वसनं कृपाहेतुत्वेनोत्प्रेक्ष्यते । यथा केचित्कृपालवः परिचितजनानां रुजा क्लिश्यमानानां तीक्ष्णशस्त्रव्रणान्कृपया दुःखेन निश्वसन्तः पटच्छेदैर्निबध्नन्ति तद्वदित्युत्प्रेक्षा ॥ १२ ॥

अन्तःशरीरेति । तपस्विनो दीना जलसेकाभावात् अन्तःशोषमुपदर्शयन्तः कीटक्षतिस्रुतिभिः कीटक्षतिरन्ध्रनिर्यासैरस्रमश्रु उद्वमन्त इव । छायावियोगेन निष्पर्णतया छायाभावेन मलिनाः शुष्का इत्यर्थः । वृक्षाच्छायावियोगमलिना आआतपक्लिष्टा व्यसने निमग्ना नन्दबन्धव इव नन्दानां श्मशानं तत्रैव विद्यमानमुपगन्तुं प्रवृत्ता इवेत्युत्प्रेक्षा ॥ १३ ॥

यावदिति । विषमदशापरिणामवत्सुलभे विषमदशा संप्रति सुलभा अतर्कितोपनता तथेदं शिलातलं दैवाल्लब्धमित्यर्थः ।

---

१ नृप. २ क्षताङ्गानाम्. ३ उदग्रक्रमभृतां. ४ ०स्विनो वृक्षाः. ५ उपाश्रयन्तः, उदग्रयन्तीं. ६ कीटक्षतिस्रुतिभिरस्रमिवोद्वमन्तः. ७ तद्यावत्. ८ अये किमिदमस्मिन्काले पटुपटहशङ्खमिश्रो.

प्रमृद्गन्क्ष्रोतॄणां श्रुतिपथमसारं गुरुतया
बहुत्वात्प्रासादैः सपदि परिपीतोज्झित इव ।
असौ नान्दीनादः पटुपटहशङ्खध्वनियुतो
दिशां द्रष्टुं दैर्घ्यं प्रसरति सकौतूहल इव ॥ १४ ॥

(विचिन्त्य ।) आः ज्ञातम् । एष हि मलयकेतुसंयमनसंजातो[2] राजकुलस्य । (इत्यर्द्धोक्ते सासूयम् ।) मौर्यकुलस्याधिकपरितोषं पिशुनयति । (सबाष्पम् ।) कष्टं भोः कष्टम् ।

श्राविततोस्मि श्रियं शत्रोरभिनीय च दर्शितः ।
अनुभावयितुं मन्ये यत्नः संप्रति मां विधेः ॥ १५ ॥

पुरु०—आसीनोयम् । यावदार्यचाणक्यादेशं संपादयामि । (आसीणो अअं । जाव अज्जचाणक्कादेसं संपादेमि ।)

(राक्षसमपश्यन्निव तस्याग्रतो रज्जुपाशेन कण्ठमुद्बध्नाति ।)

राक्ष०—(विलोक्य ।) अये कथमयमात्मानमुद्बध्नाति । अहमिव दुःखितस्तपस्वी । भवतु पृच्छाम्येनम् । (उपसृत्य ।) भद्र किमिदमनुष्ठीयते ।

पुरुषः—(सबाष्पम् ।) आर्य यत्प्रियवयस्यविनाशदुःखितोस्मादृशो मन्दभाग्योनुतिष्ठति । (अज्ज जं पिअवअस्सविणासदुःखिदो अह्मारिसो मन्दभग्गो अणुचिट्ठदि ।)

राक्ष०—(आत्मगतम् ।) प्रथममेव मया ज्ञातं नूनमहमिवार्तस्तपस्वीति । (प्रकाशम् ।) हे व्यसनसब्रह्मचारिन्यदि न गुह्यं नातिभारिकं वा ततः श्रोतुमिच्छामि[3] ।

प्रमृद्गन्निति । नान्दीनादो मङ्गलतूर्यध्वनिः । अविद्यमानः सारः प्रसारो विस्तारो यस्य तमसारं सङ्कुचितमित्यर्थः । श्रुतिपथं गुरुतया प्रभूततया प्रमृद्गन्पीडयन् । यथा सङ्कुचिते रन्ध्रे गुरुर्मुद्गरादिः प्रविशंस्तदुपमृद्गाति तद्वदित्यर्थः । बहुपीतं जलादि यथोद्गिरन्ति तथान्तरं नान्दीनादं प्रतिध्वनिव्याजेन सौधा उद्गिरन्तीवेत्युत्प्रेक्षा । दिशां दैर्घ्यं द्रष्टुमिति सकलदिग्व्यापित्वमुक्तम् ॥ १४ ॥

सासूयमिति । एष नान्दीनादः । मौर्ये राजशब्दं वक्तुमसूया । अनुभावयितुमिति । चन्दनदासविपद्विमोक्षानुरोधेनेदमिव विधिबलादागत्य गले पतितमिति भावः ॥ हे व्यसन इति । व्यसनसब्रह्मचारिन् समानव्यसन । भारिकं भारवत् ।

---

१ प्रकुर्वन्. २ कृतं. ३ अतःपरम्—किं ते प्राणपरित्यागकारणम् इत्यधिकम्.

पुरु०—आर्य न रहस्यं नातिगुरुकं किं तु न शक्नोमि प्रियवयस्यविनाशदुःखितहृदय एतावन्मात्रमपि मरणस्य कालहरणं कर्तुम् । (अज्ज ण रहस्सं णादिगुरुअं किंदु ण सक्णोमि पिअवअस्सविणासदुक्खिदहिअओ एत्तिअमेत्तं वि मरणस्स कालहरणं कादुं ।)

राक्ष०—(निःश्वस्यात्मगतम् ।) कष्टमेते सुहृद्व्यसनेषु परवदुदासीनाः प्रत्यादिश्यामहे वयमनेन । (प्रकाशम् ।) भद्र यदि न रहस्यं नातिगुरु वा तच्छ्रोतुमिच्छामि । ।

पुरु०—अहो निर्बन्ध आर्यस्य । का गतिः । निवेदयामि अस्ति तावदत्र नगरे मणिकारश्रेष्ठी विष्णुदासो नाम । (अहो णिब्बन्धो अज्जस्स । का गई । [२]णिवेदेमि । अत्थि दाव एत्थ णअरे मणिआरसेट्ठी विह्णुदासो णाम ।)

राक्ष०—(आत्मगतम् ।) अस्ति विष्णुदासश्चन्दनदासस्य परमसुहृत् । (प्रकाशम् ।) किं तस्य ।

पुरु०—स मम प्रियवयस्यः—(सो मम पिअवअस्सो)

राक्ष०—(सहर्षमात्मगतम् ।) अये प्रियवयस्य इत्याह । अत्यन्तसन्निकृष्टः संबन्धः । हन्त ज्ञास्यति चन्दनदासस्य वृत्तान्तम् ।

पुरु[४]०—संप्रति दीनजनदत्ताभरणादिविभवो ज्वलनं प्रवेष्टुकामो नगरान्निष्क्रान्तः । अहमपि यावत्तस्याश्रोतव्यं न शृणोमि तावदात्मानमुद्बध्य व्यापादयितुमिदं जीर्णोद्यानमागतः । (संपदं दीणजणदिण्णाभरणादिविहवो जलणं पवेसिदुकामो णअरादो णिक्कन्तो । अहं वि जाव तस्स असुणिदव्वं ण सुणेमि ताव अत्ताणं उब्बन्धिअ वावादइदुं इमं जिण्णुज्जाणं आअदो ।)

राक्ष०—भद्र अग्निप्रवेशे सुहृदस्ते को हेतुः ।

किमौषधपथातिगैरुपहतो महाव्याधिभिः

मत्वर्थीयष्ठन् । यदि नातिभारिकं नातिमहत्तर्हि कथयेत्यर्थः ।

प्रत्यादिश्यामह इति । प्रत्यादेशः प्रतिषेधः । उपलभ्यामह इति यावत् ।

किमौषधपथातिगैरिति । अचिकित्स्यमहाव्याधी राजक्रोधोऽगम्यगुरुदारादिप्रधर्षणमप्रतीकार्यसुहृद्विनाशश्चैतान्यात्मघातनिमित्तानीति भावः ॥ रोगाक्रान्ततया तस्य न मरणव्यवसाय इत्यर्थः ।

---

१ परम्. २ एसो णिवे०. ३ अस्मात्परं (प्रकाशं) भद्र किं तस्य. पु०-सो इत्यधिकम्. ४ सबाष्पमित्यधिकम्.

पुरु०—नहि नहि। (णहि णहि।)

राक्ष०—किमग्निविषकल्पया नरपतेर्निरस्तः क्रुधा।

पुरु०—आर्य शान्तं पापं शान्तं पापम्। चन्द्रगुप्तस्य जनपदे न नृशंसा प्रतिपत्तिः। (अज्ज सन्तं पावं सन्तं पावं। चन्दउत्तस्स जणवदे ण णिसंसा पडिवत्ती।

राक्ष०—अलभ्यमनुरक्तवान् किमयमन्यनारीजनम्।

पुरु०—(कर्णौ पिधाय।) शान्तं पापम्। अभूमिः खल्वेषोऽविनयस्य। (सन्तं पावं। अभूमी क्खु एसो अविणअस्स।)

राक्ष०—किमस्य भवतो यथा सुहृद एव नाशोऽवशः॥ १६॥

पुरु०—आर्य अथ किम्। (अज्ज अह इं।)

राक्ष०—(सावेगमात्मगतम्।) चन्दनदासस्य प्रियसुहृदिति तस्य प्रियसुहृद्विनाशो हुतभुवप्रवेशहेतुरिति यत्सत्यं चलितमेवास्ते युक्तस्नेहपक्षपाताद्धृदयम्। (प्रकाशम्।) तद्विनाशं च प्रियसुहृद्वत्सलतया मर्तव्ये व्यवसितस्य सुचरितं च विस्तरेण श्रोतुमिच्छामि।

पुरु०—आर्य अतोऽपरं न शक्नोमि मन्दभाग्यो मरणस्य विघ्नमुत्पादयितुम्। (अज्ज अदो अवरं ण सक्कणोमि मन्दभग्गो मरणस्स विग्घमुत्पादेदुं।)

राक्ष०—भद्र श्रवणीयां कथां कथय।

पुरु०—का गतिः। किं कर्तव्यम्। एष खलु निवेदयामि। श्रृणोत्वार्यः। (का गई। किं कादव्वम्। एसो क्खु णिवेदेमि। सुणोदु अज्जो।)

राक्ष०—भद्र अवहितोस्मि।

पुरु०—अस्ति इह नगरे मणिकारश्रेष्ठी चन्दनदासो नाम। (अत्थि एत्थ णअरे मणिआरसेठ्ठी चन्दणदासो णाम।)

आवशोऽप्रतीकार्यः। चलितमेवास्त इति। चलितमास्त इति यत्तद्युक्तमेवेति व्यवहितेनान्वयः। तद्विनाशमिति। मृत्युं च सुचरितं च विस्तरेण श्रोतुमिच्छामि।

---

१ अज्ज णहि० एदं वि णात्थि. २ कथय किं नु. ३ दासोस्य सुहृदः प्रियसुहृत्तमस्तस्य ...नाश एवाग्निप्रवेशहेतुरिति यत्सत्यमाकुलित एवास्मि सुहृत्स्नेहपक्षपातिना हृदयेन. ४ भद्र तस्यापि तव प्रियसुहृदः सुहृद्वत्सलतया श्रोतव्यचरितस्य सुच०. ५ इति नास्ति क्वचित्. ६ ०तु भद्रमुखः. ७ दत्तावधानोस्मि. ८ जाणाति अज्जो अत्थि.

राक्ष०—(सविषादमात्मगतम् ।) एतत्तदपावृतमस्मच्छोकदीक्षाद्वारं[1] दैवेन । हृदय स्थिरीभव किमपि ते कष्टतरमाकर्णनीयमस्ति ।

पुरु०—स एतस्य विष्णुदासस्य प्रियवयस्यो भवति । (सो एदस्स विह्णुदासस्स पिअवअस्सो होदि ।)

राक्ष०—(स्वगतम् ।) सोयमभ्यर्णः शोकवज्रपातो हृदयस्य ।

पुरु०—ततो विष्णुदासेन वयस्यस्नेहसदृशमद्य विज्ञप्तश्चन्द्रगुप्तः । (तदो विह्णुदासेण वअस्ससिणेहसरिसं अज्ज विण्णविदो चन्दउत्तो ।)

राक्ष०—कथय किमिति ।

पुरु०—देव अस्ति मे गेहे कुटुम्बभरणपर्याप्तोर्थः तस्य विनिमयेन मुच्यतां प्रियवयस्यश्चन्दनदास इति । (देव अत्थि मे गेहे कुडुम्बभरणप[2]ज्जत्तो अत्थो । तस्स विणिमएण मुञ्चिज्जदू पिअवअस्सो चन्दणदासो त्ति ।)

राक्ष०—(स्वगतम् ।) साधु भो विष्णुदास साधु । अहो दर्शितो मित्रस्नेहः । कुतः ।

> **पितॄन्पुत्राः पुत्रान्परवद[3]भिहिंसन्ति पितरो**
> **यदर्थं सौहार्दं सुहृदि च विमुञ्चन्ति[4] सुहृदः ।**
> **प्रियं[5] मोक्तुं तद्यो [तं यो] व्यसनमिव सद्यो व्यवसितः**
> **कृतार्थोयं सोर्थस्तव सति वणिक्त्वेपि वणिजः ॥ १७ ॥**

(प्रकाशम् ।) भद्र ततस्तथाभिहितेन किं प्रतिपन्नं मौर्येण ।

पुरु०—आर्य तत एवं भणितेन चन्द्रगुप्तेन प्रतिभणितमतः श्रेष्ठी विष्णुदासः न मयार्थस्य कारणेन चन्दनदासः संयमितः किंतु प्रच्छादितोनेनामात्यराक्षसस्य गृहजनो बहुशो याचितेनापि न समर्पित इति । तद्यदि तं समर्पयति तदास्त्यस्य मोक्षः । अन्यथा प्राण हरोस्य दण्ड

शोकदीक्षाद्वारमिति । शोकानुभवनियमस्तद्वारमागमनमार्गः ।

पितॄनिति । तदिति सामान्ये नपुंसकं तद्यो सद्यो इति अनुप्रासलोभेन प्रयुक्तमग्रे सोर्थ इति पुल्लिङ्गेन निर्देशात् । तमर्थं व्यसनमिव स्त्रीद्यूतपानादिव्यसनमिव । तद्धि व्यसनिभिरतिप्रियतया दुस्त्यजमिति भावः । वणिक्त्वेपि वणिजामर्थलोभः सहजो दोष इति भावः ॥ १७ ॥

---

१ शोकद्वा०, दीक्षाप्रवेशः, विनाशदीक्षाप्रकाशः. २ पज्जत्ता अत्थवत्ता ता एदिणा (अर्थवत्ता तदेतेन) ३ अभिसन्धाय. ४ समुज्झन्ति. ५ प्रियं [तं सं] सद्यस्त्यक्तुं व्यसनिनि वयस्ये व्यवसितः॰

इति । एवं भणित्वा वध्यस्थानमानायितश्चन्दनदासः । ततो यावद्वयस्यचन्दनदासस्याश्रोतव्यं न श्रृणोमि तावज्ज्वलनं प्रविशामीति श्रेष्ठी विष्णुदासो नगरान्निष्क्रान्तः । अहमपि विष्णुदासस्याश्रोतव्यं यावन्न श्रृणोमि तावदुद्बध्यात्मानं व्यापादयामीतीदं जीर्णोद्यानमागतः ।) अज्ज तदो एवं भणिदेण चन्दउत्तेण पडिभणिदो सेठ्ठी विह्णुदासो ण मए अत्थस्स कालणेण चन्दणदासो संजमितो किंदु पच्छादिदो अणेण अमच्चरक्खसस्स घरअ[1]णो बहुसो जाचिदेण वि ण समप्पिदोत्ति । ता जदि[2] तं समप्पेदि तदो अत्थि से मोक्खो । अण्णहा पाणहरो से दं[3]ण्डो त्ति । एवं भणिअ वज्झठ्ठाणं ओं[4]णविदो चन्दणदासो । तदो जावं[5] वअस्सचन्दणदासस्स असुणिदव्वं ण सुणोमि तावं[6] जलणं पविसामित्ति सेठ्ठी विह्णुदासो णअरादो णिक्कन्दो । अहं वि[7] विह्णुदासस्स असुणिदव्वं जाव ण सुणोमि ताव उब्बन्धिअ अत्ताणं वावादेमि त्ति इदं जिण्णुज्जाणं आअदो ।)

राक्ष०—भद्र न खलु व्यापादितश्चन्दनदासः ।

पुरु०—अद्य तावद्व्यापाद्यते । स खलु सांप्रतं पुनः पुनरमात्यराक्षसस्य गृहजनं याच्यते । न खलु स मित्रवत्सलतया समर्पयति । तदेतेन कारणेन न करोमि मरणस्य कालहरणम् । (अज्ज दाव वावादीअदि । सो खु संपदं पुणो पुणो अमच्चरक्खसस्स घरअणं जाचीअदि । ण खु सो मित्तवत्सलदाए समप्पेदि ता एदिणार्कालणेण ण करेमि मरणस्स कालहरणम् ।)

राश०—(सहर्षमात्मागतम् ।) साधु वयस्य चन्दनदास साधु ।

> **शिबेरिव समुद्भूतं शरणागतरक्षया ।**
> **निचीयते त्वया साधो यशोपि सुहृदा विना ॥ १८ ॥**

शिबेरिवेति । शिबेरिवेतीवशब्दो भिन्नक्रमः यशसा संबध्यते । शरणागतरक्षया हेतुना समुद्भूतं समुत्पन्नं शिबेर्यश इव त्वया यशो निचीयते संपाद्यते । शिबिनेवेति तृतीयान्तपाठः सुगमः । तेन हि शरणागतस्य सन्निधावेव स्वविनाशोभ्युपगतः । त्वया तु सुहृदा विनापि । अपिशब्दो भिन्नक्रमः । ममासान्निधान इदं यशो निचीयत इत्यहो शिबेरपि त्वमधिकगुणः श्लाघ्योसीति भावः ॥ १८ ॥

---

१ णो त्ति बहुसो जाणिदं । तेण वि. २ अमच्चरक्खसस्स घरअणं. ३ दण्डो अह्मकोपं पडिमाणेदुत्ति (अस्मत्कोपं प्रतिमानयत्विति) अण्णो वि जनो एवं ण करइस्सदित्ति इत्याधिकम्. ४ आणत्तो (आज्ञप्तः). ५ जाव पिअवअस्सस्स. ६ ताव ज्जेव अत्ताणअं वावादेमित्ति जलणे. पविसिदुकामो. ७ ०वि पिअवअस्सस्स. ८ ०णेण होदि से मर.

(प्रकाशम् ।) भद्र[1] गच्छेदानीं शीघ्रं विष्णुदासं ज्वलनप्रवेशान्निवारय । अहमपि चन्दनदासं मरणान्मोचयामि ।

पुरु०—अथ पुनः केनोपायेनार्यश्चन्दनदासं मरणान्मोचयति । (अह उण केण उवाएण अज्जो[2] चन्दणदासं मरणादो मोचेदि ।)

राक्ष०—(खड्गमाकृष्य ।) नन्वनेन व्यवसाय[3]सुहृदा निस्त्रिंशेन । पश्य

निस्त्रिंशोयं स[4]जलजलदव्योमसङ्काशमूर्ति-
र्युद्धश्रद्धापुलकित इव प्राप्तसख्यः करेण ।
सत्त्वोत्कर्षात्समरनिकषे दृष्टसारः परैर्मे
मित्रस्नेहाद्विवशमधुना साहसे मां नियुङ्क्ते ॥ १९ ॥

पुरु०—आर्य एवं श्रेष्ठिचन्दनदासजीवितप्रदानपिशुनितं विषमदशाविपाकनिपातितं साधु न शक्नोमि त्वां निर्णीय प्रतिपत्तुं किं सुगृहीतनामधेया अमात्यराक्षसपादा यूयं दिष्ट्या दृष्टा इति । तत्कुरु मे प्रसादं सन्देहनिर्णयेन । (इति पादयोः पतति ।) अज्ज एवं सेट्ठिचन्दणदासजीविदप्पदाणपिसुणिदं विसमदसाविपाकणिपडिदं साधु ण सक्णोमि तुमं णिण्णीअ पडिवत्तुं किं सुगिहीदणामहेआ अमच्चरक्खसपादा तुम्हे दिट्ठिआ दिट्ठात्ति । ता करेहि मे पसादं सन्देहणिण्णएण ।)

राक्ष०—सोहमनुभूतभर्तृवंशविनाशः सुहृद्विपत्तिहेतुरनार्यो दुर्गृहीतनामधेयो यथार्थो राक्षसः ।

पुरु०—(सहर्षं पुनः पादयोः पतित्वा ।) आश्चर्यं दिष्ट्या दृष्टोसि । (ही हीमाणहे दिट्ठिआ दिट्ठोसि[5] ।)

राक्ष०—भद्र उत्तिष्ठोत्तिष्ठ अलमिदानीं[6] कालहरणेन । निवेद्यतां

निस्त्रिंशोयमिति । व्यवसायः उत्साहः पौरुषमिति यावत् । तदेकसहायेन खड्गेन तत्सर्वं मौर्यबलमुत्साद्य सुहृदं मोचयामीत्यर्थः । सजलः जलधारासहितश्चासौ जलदव्योमसङ्काशमूर्तिश्चेति विशेषणकर्मधारयः । नैल्यनैर्मल्यगुणाभ्यां जलदव्योमदृष्टान्तः । धाराजलसहितत्वादेव युद्धश्रद्धापुलकित इवेत्युत्प्रेक्षा धाराजलकणिकानां पुलकसादृश्यसंभवात् । सत्त्वोत्कर्षान्मम कर इवायमपि सत्त्वोत्कर्षशालीत्यर्थः । परैः समरनिकषे दृष्टसारः बहुशोकुण्ठितशक्तित्वेनानुभूत इत्यर्थः । मित्रस्नेहाद्विवशं मित्रस्नेहाधीनतया कार्याकार्यविचारविमुखं मां साहसे नियुङ्क्ते । हिताहितानपेक्षं यत्कर्म तत्साहसं विदुः ॥ १९ ॥

---

१ भद्र भद्र, भद्र गच्छ गच्छे. २ तुम...मोचेसि. ३ महासु. ४ विगत. ५ किंदत्थोह्मि (कृतार्थः). ६ कृतानि.

विष्णुदासाय एष राक्षसश्चन्दनदासं मरणान्मोचयतीति । (इति निस्त्रिंशोयमिति पठन्नाकृष्टखड्गः परिक्रामति ।)

पुरु०—(पादयोर्निपत्य ।) प्रसीदन्त्वमात्यपादाः । अस्ति तावदत्र प्रथमं चन्द्रगुप्तहतकेनार्यशकटदासो वध्यस्थानमाज्ञप्तः । स च वध्यस्थानात्केनाप्यपहृत्य देशान्तरं नीतः । ततश्चन्द्रगुप्तहतकेन कस्मादेष प्रमादः कृत इति आर्यशकटदासे समुज्ज्वलितः कोपवह्निर्घातकजननिधनेन निर्वापितः । ततः प्रभृति घातका यं कमपि गृहीतशस्त्रमपूर्वं पुरुषं पृष्ठतो वाऽग्रतो वा प्रेक्षन्ते तदात्मनो जीवितं परिरक्षन्तोप्रमत्ता वध्यस्थाने वध्यं व्यापादयन्ति । तस्मादेवं गृहीतशस्त्रैरमात्यपादैर्गच्छद्भिः श्रेष्ठिचन्दनदासस्य वधस्त्वरायितो भवति । (निष्क्रान्तः ।) (पसीदन्दु अमच्चपादा । अत्थि दाव एत्थ पढमं चन्दउत्तहदएण अज्जसअडदासो वज्झट्ठाणं आणत्तो । सो अ वज्झट्ठाणादो केणवि अवहरिअ देसन्तरं णीदो[3] । तदो चन्दउत्तहदएण कीस एसो प्पमादो किदोत्ति अज्जसअडदासे समुज्जलिदो कोववह्नी घादअजणणिहणेण णिव्वाविदो । तदो-पहुदि घादआ जं कंवि गिहिदसत्थं अपुव्वं पिट्ठदो वा अग्गदो वा पेक्खन्ति तदो अत्तणो जीविदं परिरक्खन्तो अप्पमत्ता वज्झट्ठाणे वज्झं वावादेन्ति । ता एवं गिहिदसत्थेहिं अमच्चपादेहिं गच्छन्तेहिं सेट्ठिचन्दणदासस्स वहो तवराइदो होदि ।)

राक्ष०—(स्वगतम् ।) अहो दुर्बोधश्चाणक्यबटोर्नीतिमार्गः । कुतः ।

यदि च शकटो नीतः शत्रोर्मतेन ममान्तिकं
किमिति निहतस्तेन क्रोधाद्वधाधिकृतो जनः ।
अथ न कृतकं तादृक्कष्टं कथं नु विभावये-
दिति मम मतिस्तर्कारूढा न पश्यति निश्चयम् ॥ २० ॥

चन्द्रगुप्तेति । चन्द्रगुप्तहतकेनेति आर्यशकटेति च वचनं स्वस्य नन्दकुलपक्षपातित्वद्योतनार्थम् ।

यदि चेति । शत्रोर्मते मौर्यानुमत्या छद्मना यदि शकटदासो ममान्तिकं प्रापितस्तर्हि घातकवधपर्यवसायी क्रोधावेशो न घटेत । अथ घातकवधान्यथानुपपत्त्या कृतकं नेति तदीयं पलाय्यागमनं कृतकं छद्मरूपं न भवति । परमा-

---

१ यथैष-मोचयति. २ आकृष्य खड्गं. ३ अववाहिदो. ४ ०दासवधवज्झणाए. ५ रोसग्गी (रोषाग्निः). ६ वधजलेण. ७ तदो अद्धपधे ज्जेव...अप्पमत्ता एदं अणवासवज्झट्ठाणं ८ स. ९ ताः क्रोधावेशात्...ता जनाः. १० लेखं. ११ चक्रारूढा.

(विचिन्त्य ।)

नायं निस्त्रिंशकालः प्रथममिह कृते घातकानां विघाते
नीतिः कालान्तरेण प्रकटयति फलं किं तया कार्यमत्र ।
औदासीन्यं न युक्तं प्रियसुहृदि गते मत्कृते चातिघोरां
व्यापत्तिं ज्ञातमस्यै स्वतनुमहमिमां निष्क्रयं कल्पयामि ॥ २१ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति षष्ठोऽङ्कः ।

सप्तमोऽङ्कः ।

(ततः प्रविशति चण्डालः ।)

चण्डा०—अपसरत आर्या अपसरत । अपेत मनुपा अपेत ।
(ओसलेह अज्जा ओसलेह । अवेहँ माणहे अवेह ।)

यदि इच्छत रक्षितुं स्वान् प्राणान् विभवान्कुलं कलत्रं च ।
तत्परिहरत विषमं राजापथ्यं सुदूरेण ॥ १ ॥
जइँ महह लक्खिदुं शे प्पाणे विदवे कुलं कलत्तं अ ।
ता पलिहलेह विसमं लाआपत्थं सुदूलेण ॥ १ ॥

र्थत एव शकटदासः सिद्धार्थकस्य तात्त्विकसाहसोपकारेण पलाय्य गतः स्यात्तदा तादृक्कष्टं कुत्सितं स्वहस्तलेखमुद्राङ्कनादिरूपं स्वामिद्रोहं शकटदासः कथं नु विभावयेत्कर्तव्यत्वेन कथं चिन्तयेत् । आचरेदित्यर्थः । चिन्तनमपि तस्यानुचितं किमुताचरणमिति भावः । इत्यादितर्कारूढो न कमपि निश्चय प्राप्नोमीत्यहो दुर्बोधश्चाणक्यनीतिमार्ग इत्यर्थः । स्वहस्तलेखात्स्वामिद्रोहरूपं कर्मातिकुत्सितं वाचा वक्तुमयोग्यमिति तादृक्कष्टमित्युक्तम् । तादृग्लेखमिति क्वचित्पाठः ॥ २० ॥

नायमिति । प्रथमं पूर्वं छलतः परमार्थतो वा घातकानां विघाते कृते त्वरिततरं चन्दनदासघातनप्रसक्तिभयन्निस्त्रिंशधारणमनुचितम् । [यद्वा प्रथमं ममोद्यमात्प्राग् घातकानां । कर्तरि षष्ठी । घातकैः कृते । चन्दनदासस्येतिशेषः । विघाते इति योज्यम् ।] नीत्याचरणं तु शिरसि भयं दूरे तत्प्रतीकार इति न्यायेनानुपपन्नम् । सुहृद्विनाशोपेक्षणं तु कृतघ्नतादिमहादोषमापादयेत् । अतश्चन्द्रगुप्ताय दासीभावेनात्मानं निष्क्रीयैव सुहृद्विमोचनं न्याय्यत्वेन गले पतितमिति ज्ञातं निश्चितमिति भावः ॥ २१ ॥

इति श्रीत्र्यम्बकयज्वप्रभुवर्याश्रितढुण्ढिराजव्यासयज्वविरचिते
मुद्राराक्षसनाटकव्याख्याने षष्ठोऽङ्कः समाप्तः ॥

इत्थं षष्ठेनाङ्केन राक्षसवशीकरणरूपं प्रधानकार्यं बीजवद्धिर्यथायथं विप्रकी-

---

१ मत्कृतामवे घोराम्. २ ०स्मिन्. ३ च०-वज्रलोमा. ४ ओसलध, (माणहे- मान्या), अवेध. ५ जइ मणहं लक्खिदुं निअप्पाणे विहवे कुले कलत्ते च । पलिहलध से विसमिव लाआपत्थं पअत्तेण ॥ (यदि मन्यध्वं रक्षितुं निजप्राणान्कुलानि कलत्राणि च । परिहरत तस्माद्विषमिव राजापथ्यं प्रयत्नेन ॥).

अपि च। (अविअ।)

भवति पुरुषस्य व्याधिर्मरणं वा सेविते अपथ्ये ॥
राजापथ्ये पुनः सेविते सकलमपि कुलं म्रियते ॥ २ ॥

होदि पुलिसस्स वाही मलणं वा सेविदे अपत्थम्मि।
लाआपत्थे उण सेविदे सअलं वि कुलं मलदि ॥ २ ॥

तद्यदि न प्रतीथ तदत्र प्रेक्षध्वमेनं राजापथ्यकारिणं श्रेष्ठिचन्दनदासं सपुत्रकलत्रं वध्यस्थानं नीयमानम्। (आकाशे श्रुत्वा।) आर्याः किं भणथ। अस्त्यस्य कोपि मोक्षोपाय इति। आर्या अस्त्यमात्यराक्षसस्य गृहजनं यदि समर्पयति। (पुनराकाशे।) किं भणथ। एष शरणागतवत्सल आत्मनो जीवितमात्रस्य कारणेनेदृशमकार्यं न करिष्यतीति। आर्याः तेन हि अवधारयतास्य सुखां गतिम्। किमिदानीं युष्माकमत्र प्रतीकारविचारेण। (ता जदि ण पदिज्जह ता एह पेक्खह एअं लाआ पत्थकालीणं सेष्ठिचन्दणदासं सउत्तकलत्तं वज्झट्ठाणं णीअमाणं। अज्जा किं भणह। अत्थि से कोवि मोक्खोवाओ त्ति। अज्जा अत्थि अमच्चरक्खसस्स घरअणं जइ समप्पेदि। किं भणह। एसे सलणागदवच्छले अत्तणो जीविदमेतस्स कालणे ईदिसं अकज्जं ण कलिस्सादि त्ति। अज्जा तेण हि अवधालेह से सुहां गदिं। किं दाणिं तुह्माणं एत्थ पडिआरविआरेण।)

(ततः प्रविशति द्वितीयचण्डालानुगतो वध्यवेशधारी शूलं स्कन्धेनादाय कुटुम्बिन्या पुत्रेण चानुगम्यमानश्चन्दनदासः।)

णैरत्रैकार्थीभावमुपनीतैर्मुखसन्ध्याद्यर्थैर्निर्व्यूढम्। अथ राक्षसेन चन्द्रगुप्तसाचिव्यग्रहणद्वारा तल्लक्ष्मीस्थिरीकरणरूपस्य नाटकस्य प्रधानतमं फलमुपगमयितुं सप्तमोङ्क आरभ्यते। पूर्वाङ्के रज्जुहस्तेन पुरुषेण निवेदितं चन्दनदासस्य वध्यस्थाननयनं श्रुत्वा राक्षसः ससंभ्रमं शस्त्रमुत्सृज्य वध्यस्थानं प्रति निष्क्रान्त इत्युक्तम्। संप्रति स एव चन्दनदासवृत्तान्तोस्मिन्नङ्के प्रपञ्च्यत इतीदमङ्कावतरणं यत्र स्यादुत्तराङ्कार्थः पूर्वाङ्कार्थानुसंगत इति तल्लक्षणात्।

शरणागतवत्सलेति। इत्यादिपौरवचनेनास्य शरणागतरक्षणविरुदं लिखितपठितत्वेन सकललोकप्रसिद्धमित्युक्तं भवति। सुखां गतिं शरणागतरक्षणपुण्येनोत्तमलोकप्राप्तिमिति बहिरर्थः। राक्षसप्राप्त्या बन्धमोचनात्सुखप्राप्तिमिति गूढम्।

---

१ कुतो से अधण्णस्स मोक्खोवावो। एदं उण० इत्यधिकम्। २ अज्जा जइ एवं अवधाणेध से असुभगतिं। पत्तिके दाणीं तुह्माणं पडीआले. ३ अशुहं (अशुभां). ४चण्डालेन बिल्वकेना ०वहन.

चन्द०—(सवाष्पम् ।) हा धिक् हा धिक् । अस्मादृशानामपि नित्यं चारित्रभङ्गभीरूणां चोरजनोचितं मरणं भवतीति नमः कृतान्ताय । अथवा न नृशंसानामुदासीनेष्वितरेषु वा विशेषोस्ति । तथाहि । (हद्धी हद्धी अह्मारिसाणं वि णिच्चं चारित्तभङ्गभीरूणं चोरजेणोचिदं मरणं होदि त्ति णमो किदन्तस्स । अह वा ण णिसंसाणं उदासीणेसु इदरेसु वा विसेसोत्थि । तहहि ।)

मुक्त्वा आमिषाणि मरणभयेन तृणैर्जीवन्तम् ।
व्याधानां मुग्धहरिणं हन्तुं को नाम निर्बन्धः ॥ ३ ॥

मोत्तूण आमिसाइं मरणभएण तिणेहिं जीवन्तम् ।
वाहाणं मुद्धहरिणं हन्तुं को णाम णिब्बन्धो ॥ ३ ॥

(समन्तादवलोक्य ।) भो प्रियवयस्य विष्णुदास कथं प्रतिवचनमपि न मे प्रतिपद्यसे । अथवा दुर्लभास्ते खलु मानुषा य एतस्मिन्काले दृष्टिपथेपि तिष्ठन्ति । (सबाष्पम् ।) एतेस्माकं प्रियवयस्या अश्रुपातमात्रेण कृतप्रतीकाराः स्वशरीरैः कथमपि निवर्तमानाः परिवर्धितशोकदीनवदना बाष्पगुरुकया दृष्ट्या मामनुगच्छन्ति । (भो पिअवअस्स विह्णुदास कहं पडिवअणं वि ण मे पडिवज्जसि । अह वा दुल्लहा ते क्खु माणुसा जे एदस्सिं काले दिठ्ठिपथे वि चिठ्ठन्ति । एदे अह्मपिअवअस्सा अंसुपादमेत्तकेण किदपदीआरा स्वसरीरेहिं कहंवि णिवत्तमाणा परिवड्ढमाणसोअदीणवअणा वाहगुरुआए दिठ्ठीए मं अणुगगच्छन्दि ।) (इति परिक्रामति ।)

चण्डा०—आर्य चन्दनदास आगतोसि वध्यस्थानं तद्विसर्जय गृहजनम् । (अज्ज चन्दणदास आअदोसि वज्झठ्ठाणं ता विसज्जेहि घरजणम् ।)

चन्द०—कुटुम्बिनि निवर्तस्व सांप्रतं सपुत्रा । न युक्तं खल्वतःपरमनुगन्तुम् । (कुटुम्बिणि णिवत्तेहि संपदं सपुत्ता । ण जुत्तं क्खु अदोवरं अणुगच्छिदुम् ।)

कुटु०—(सबाष्पम् ।) परलोकं प्रस्थित आर्यो न देशान्तरम् ।

परलोकं इति । देशान्तरं प्रस्थितं बन्धुं नानुगच्छेदिति शास्त्रम् । परलोकं प्रस्थितस्य त्वनुगमनमुचितमेवेति भावः ।

---

१ कुटु०-. २ चोरजणानं विअ मरणं पत्तं ति णमो णमो किदन्तस्स. ३ जीवन्ति. ४ चन्द०-(स०). ५ इमस्सिं. ६ किदणिवापसलिला विअ कहं वि पडिणि०णा सोअदीण ७ परि. ८ अज्जे कु०...सपुत्ता । वज्झट्ठाणं क्खु पदं अदो अवरं अभूमि क्खु अणुग०.

(परलोअं पत्थिदो अज्जो ण देसन्तरं ।)

चन्द०—आर्ये अयं मित्रकार्येण मे विनाशो न पुनः पुरुषदोषेण तदलं विषादेन । (अज्जे अअं मित्तकज्जेण मे विणासो ण उण पुरिसदोसेण तां अलं विसादेण ।)

कुटु०—आर्य यद्येवं तदिदानीमकालः कुलजनस्य निवर्तितुम् । (अज्ज जइ एवं ता दाणिं अकालो कुलजणस्स णिवट्टिदुम् ।)

चन्द०—अथ किं व्यवसितं कुटुम्बिन्या । (अह किं ववसिदं कुडुम्बिणीए ।)

कुटु०—भर्तुश्चरणावनुगच्छन्त्या आत्मानुग्रहो भवत्विति । (भत्तुणो चलणे अणुगच्छन्तीए अप्पाणुग्गहो होदुत्ति ।)

चन्द०—आर्ये दुर्व्यवसितमिदम् । त्वयायं पुत्रकोऽश्रुतलोकसंव्यवहारो बालोनुगृहीतव्यः । (अज्जे दुव्ववसिदं एदं । तुए अअं पुत्तओ असुणिदलोअसंववहारो बालो अणुगेह्णिदव्वो ।)

कुटु०—अनुगृह्णन्त्वेनं प्रसन्ना देवताः । जात पुत्रक पत पश्चिमयाः पितुः पादयोः । (अणुगिह्णन्दु ण पसण्णाआ देवदाओ । जाद पुअत्त पतॅ पच्चिमेसु पिदुणो पादेसु ।)

पुत्र०—(पादयोर्निपत्य ।) तात किमिदानीं मया तातविरहितेनानुष्ठातव्यम् । (ताद किं दाणिं मए तादविरहिदेण अणुचिठ्ठिदव्वम् ।)

चन्द०—पुत्र चाणक्यविरहिते देशे वस्तव्यम् । (पुत्त चाणक्कविरहिदे देसे वसिदव्वम् ।)

चण्डा०—आर्य चन्दनदास निखातः शूलस्तत्सज्जो भव । (अज्ज चन्दणदास णिखादे शूले ता सज्जो होहि ।)

कुटु०—आर्याः परित्रायध्वं परित्रायध्वम् । (अज्जा परित्ताअध परित्ताअध ।)

चन्द०—आर्ये अथ किमत्राक्रन्दसि । स्वर्गं गतानां तावद्देवा दुःखितं परिजनमनुकम्पन्ते । (अन्यच्च मित्रकार्येण मे विनाशः

पश्चिमेष्विति । अतः परं द्रष्टुमशक्येष्वित्यर्थः ।
चाणक्य इति । अनेन चाणक्यस्यात्यन्तं क्रौर्यमुक्तम् । आक्रन्दसीति ।

१ ता किं हरिसट्ठाणे वि रोदिसि. २ (सबाष्पम ।). ३ भअवदीओ कुलदे०. ४ पणमअपच्छिमस्स पिदुणो.

नायुक्तकार्येण । तत्किं हर्षस्थानेपि रुद्यते ।) (अज्जे अह किं एत्थ आक्कन्दसि । सग्गं गदाणं दाव देवा दुक्खिअं परिअणं कणुकम्पन्दि । अण्णं अ मित्तकज्जेण मे विणासो ण अजुत्तकज्जेण । ता किं हरिसट्ठाणे वि रोदीअदि ।)

प्रथमश्चण्डालः—अरे बिल्वपत्र गृहाण चन्दनदासम् । स्वयमेव गृहजनो गमिष्यति । (अले विल्लपत्त[3] गेह्ण चन्दणदासं । सअं एव्व वलजणो गमिस्सदि ।)

द्वितीयश्चण्डालः—अरे वज्रलोमन् एष गृह्णामि । (अले वज्ज-लोमा एसे गेह्णामि ।)

चन्द०—भद्र मुहूर्तं तिष्ठ यावत्पुत्रकं परिष्वजे । (पुत्रं परिष्वज्य-मूर्ध्न्याघ्राय ।) जात अवश्यं भवितव्ये विनाशे मित्रकार्यं समुद्वहमानो विनाशमनुभव । (भद्द मुहु त्तं चिठ्ठ जाव पुत्तअं परिस्सेआमि । जाद अवस्सं भविदव्वे विणासे मित्तकज्जं समुव्वहमाणो विणासमणुभवेहि ।)

पुत्र०—तात किमिदमपि भणितव्यम् । कुलधर्मः खल्वेषोस्माकम् । (इति पादयोः पतति ।) (ताद किं एदं वि भणिदव्वं । कुलधम्मो क्खु एसो अह्माणं ।)

चण्डा०—अरे गृहाणैनम् । (अले गेह्ण एणं ।) (चण्डालौ गृहीतश्चन्दनदासम्[6] ।)

कुटु०—(सोरस्ताडम् ।) आर्या परित्रायध्वं परित्रायध्वम् । (अज्जा परित्ताअध परित्ताअध ।)

(प्रविश्य पटाँक्षेपेण राक्षसः ।) भवति न भेतव्यम् । भो भोः शूलायतनाः न खलु व्यापादयितव्यश्चन्दनदासः ।

शोकावेशेन नीचान्प्रति किमाक्रन्दसि सुचरितानुकम्पिनो देवा एव शरणीकरणीया इत्यर्थः । मित्रकार्येणेति । मित्रकार्येण मरणात्स्वस्य स्वर्गो निश्चित इति भावः । अनुभवामीति । अतस्त्वया न शोचितव्यमिति भावः । अत्र करुणः स्थायी शोकदीनवचनादिभिर्विभावैरनुभावैश्च पुष्कलः ।

प्रविश्य पटाक्षेपेणेति । असूचितस्य सहसा संभ्रमेण प्रवेशः पटाक्षेपः ।

शूलायतना इति । शूलमायतनं जीवनाश्रयो येषां ते तथोक्ताः ।

---

१ भद्दमुह मुहुत्तअं चिठ्ठ । अइ जीविहवच्छले किं पत्थ०. २ गदा क्खु ते देवा णन्दा ज दुक्खिदं जणं अणुकम्पन्ति. ३ वत्ता (वक्र), वेणुवत्तका (वेणुवेत्रक). ४ सन्तआमि मान्त्वयामि). ५ अणुभवामि. मारोपयितुं शूले । इत्यधिकम्. ७ अपटाक्षेपेण.

येन स्वामिकुलं रिपोरिव कुलं दृष्टं विनश्यत्पुरा
मित्राणां व्यसने महोत्सव इव स्वस्थेन येन स्थितम्।
आत्मा यस्य वधाय वः परिभवक्षेत्रीकृतोपि प्रिय-
स्तस्येयं मम मृत्युलोकपदवी वध्यस्रगाबध्यताम्॥ ४॥

चन्द०-(सबाष्पं विलोक्य।) अमात्य किमिदम्। (अमच्च किं एदं।)

राक्ष०—त्वदीयसुचरितैकदेशस्यानुकरणं किलैतत्।

चन्द०—अमात्य सर्वमपीमं प्रयासं निष्फलं कुर्वता त्वया किमनुष्ठितम्। (अमच्च सव्वं वि इमं पआसं णिप्फलं करन्तेण तुए किं अणुचिट्ठिदं।)

राक्ष०—सखे स्वार्थ एवानुष्ठितः। कृतमुपालम्भेन। भद्रमुखं[1,2] निवेद्यतां दुरात्मने चाणक्याय।

वज्र०—किमिति। (किं त्ति)

राक्ष०—

दुष्कालेपि कलावसज्जनरुचौ प्राणैः परं रक्षता
नीतं येन यशस्विनातिलघुतामौशीनरीयं यशः।
बुद्धानामपि चेष्टितं सुचरितैः क्लिष्टं विशुद्धात्मना
पूजार्होपि स यत्कृते तव गतो वध्यत्वमेषोस्मि सः॥ ५॥

प्रथम०—अरे बिल्वपत्रक त्वं तावच्चन्दनदासं गृहीत्वैतस्य[3] श्मशानपादपस्य छायायां मुहूर्तं तिष्ठ यावदहमार्यचाणक्याय निवेदयामि गृहीतोमात्यराक्षस इति। (अले विल्लपत्तअ तुमं दाव चन्[4]दणदासं गेह्णिअ इह एदस्स मसाणपादपस्स छाआए मुहुत्तं चिट्ठ जाव अहं अज्जचाणक्कस्स णिवेदेमि गिहीदो अमच्चरक्खसो त्ति।)

येनेति। महोत्सव इवेति सप्तम्यन्तम्। यस्य मम परिभवक्षेत्रीकृतोपि। एतादृशं परिभवमनुभवन्नपि आत्मा शरीरं वपुः युष्मादृशां वधाय वधार्थं प्रियो जातः यदर्थं किल चाणक्येन कौलूतादयः युष्मादृशा घातकाश्च छलेन वृथा व्यापादिताः। एतादृशपातकनिमित्तभूतोप्यात्मा येन मया न परित्यक्त इत्यात्मोपालम्भः॥ ४॥ सखे स्वार्थ एवेति। इदं त्वत्संरक्षणं ममात्मरक्षणादप्यभ्यर्हितं श्रेयस्करमिति भावः।

दुष्कालेपीति। शिबिना पुण्ये कृतयुगे तत्कृतमिति नात्र चित्रम्। पापे कलियुग ईदृशं कर्म कुर्वाणस्ततोप्यतिशयितो यश्चन्दनदासः स त्वयात्यर्थ-

---

१ सखे चन्दनदास कृतमुपालम्भेन। स्वार्थप्रधानो हि जीवलोकः। २ ०मुख अयमथ॰ निवेद्यतां तावत्. ३ शत्रुत्व. ४ सेट्ठिच॰

द्वितीय०—अरे वज्रलोमन् एवं भवतु (अले वज्जलोमा ऍवं होदु ।)

(इति सपुत्रदारेण चन्दनदासेन सह निष्क्रान्तः ।)

प्रथमः—एत्वमात्यः । (राक्षसेन सह परिक्रम्य ।) अस्त्यत्र कोपि निवेदयत तावन्नन्दकुलनगकुलिशस्य मौर्यकुलप्रतिष्ठापकस्यार्यचाणक्यस्य। (एदु अमच्चो । अत्थि एत्थ कोवि णिवेदेह दाव णन्दकुहणगकुलिसस्स मोलिअकुलपडिठ्ठावर्कस्स अज्जचाणक्कस्स ।)

राक्ष०—(स्वगतम् ।) एतदपि नाम श्रोतव्यम् ।

एष आर्यनीतिसंयमितबुद्धिपुरुषकारो गृहीतोमात्यराक्षस इति । (एसो अज्जणीदिसंजमिदबुद्धिपुलिसआले गिहीदे अमच्चरक्खसेत्ति ।)

चण्डा०—भद्र कथय कथय ।

(ततः प्रविशति जवनिकावृतशरीरो मुखमात्रदृश्यश्चाणक्यः ।)

केनोत्तुङ्गशिखाकलापकपिलो बद्धः पटान्ते शिखी
पाशैः केन सदागतेरगतिता सद्यः समासादिता ।
केनानेकपदानवासितसटः सिंहोर्पितः पञ्जरे
भीमः केन च नैकनक्रमकरो दोर्भ्यां प्रतीर्णोर्णवः ॥ ६ ॥

चण्डा०—ननु नीतिनिपुणबुद्धिनार्येण । (णं णीदिणिउणबुद्धिणा अज्जेर्ण ।)

चाण०—मा मैवम् । नन्दकुलविद्वेपिणा दैवेनेति ब्रूहि ।

राक्ष०—(स्वगतम् ।) अयं दुरात्मा अथवा महात्मा कौटिल्यः ।

मर्चनीयोपि यस्य मम कृत ईदृशीं विपत्तिमुपनीतः सोयं तव विधेयोस्मीत्यर्थः । बुद्धा अत्यन्तदयालव इति प्रसिद्धं तेषामपि चेष्टितं दयालुत्वं क्लिष्टं कृशीकृतमित्यर्थः॥ ५ ॥

एष आर्यनीतीति । आर्यचाणक्यस्य नीत्या संयमितः कुण्ठीकृतः बुद्धिपरिसरो यस्य सः ।

केनेति । सदागतेर्वायोरगतिता गतिनिरोधः पाशैः सूक्ष्मरशनाभिः केन समासादितः कृत इत्यर्थः । सोपि झटिति कृत इत्याश्चर्यं भित्तितिरस्करिणीबन्धनादिना क्रमेण चिरात्कथंचित्कर्तुं शक्य इत्यर्थः । एवं दुष्करो राक्षसवशीकारः केन कृत इति रूपकातिशयोक्त्या स्वात्मगुणश्लाघा । इयमद्भुतार्थप्राप्तिरुपगूहनं नामाङ्गम् ॥ ६ ॥ नन्दकुलेति । नन्दकुलं सर्वं दैवेन निपातितमिति निवरलम्बतया निर्व्यवसायोयमेव वशीभूत इत्यर्थः ।

---

१ गच्छ. २ केके एत्थ दुआलिआणं. ३ ०कुलसेणसञ्चअचुण्णणकुलिसस्स. ४ ०डिट्टाविदघम्मसञ्चअस्स. ५ ०णीदिनिअम. ६ पलिसले (परिसरः). ७ दृश्यः सहर्षः. ८ ०ण ज्जेव.

अकारः सर्वशास्त्राणां रत्नानामिव सागरः
गुणैर्न परितुष्यामो यस्य मत्सरिणो वयम् ॥ ७ ॥

चाण०—(विलोक्य सहर्षं स्वगतम् ।) अये अयमसावमात्यराक्षसः । येन महात्मना ।

गुरुभिः कल्पनाक्लेशैर्दीर्घजागरहेतुभिः ।
चिरमायासिता सेना वृषलस्य मतिश्च मे ॥ ८ ॥

(जवनिकांमपनीयोपसृत्य च ।) भो अमात्यराक्षस विष्णुगुप्तोऽहमभिवादये ।

राक्ष०—(स्वगतम् ।) अमात्य इति लज्जाकरमिदानीं विशेषणम् । (प्रकाशम् ।) विष्णुगुप्त न चाण्डालस्पर्शदूषितं स्प्रष्टुमर्हसि ।

चाण०—अमात्यराक्षस नेमौ चाण्डालौ । अयं खलु इष्टपूर्व एव भवता सिद्धार्थको नाम राजपुरुषः । योप्यसौ द्वितीयः सोपि समिद्धार्थको नाम राजपुरुष एव । शकटदासोपि तपस्वी तं तादृशं कपटलेखमजानन्नेव मया लेखितः ।

राक्ष०—(स्वगतम् ।) दिष्ट्या शकटदासं प्रत्यपनीतो विकल्पः ।

चाण०—किंबहुना । एष संक्षेपतः कथयानि ।

भृत्या भद्रभटादयः स च तथा लेखः स सिद्धार्थक-
स्तच्चालङ्करणत्रयं स भवतो मित्रं भदन्तः किल ।
जीर्णोद्यानगतः स चार्तपुरुषः क्लेशः स च श्रेष्ठिनः
सर्वोसौ मम (इत्यर्द्धोक्ते लज्जां नाटयति ।
वृषलस्य वीर भवता संयोगमिच्छोर्नयः ॥ ९ ॥

गुरुभिरिति । सेनायां कल्पनाक्लेशाः सदासन्नहनादयः । मतौ कल्पनाक्लेशा ऊहापोहादयः । यन्मतिपौरुषभयान्मौर्यसैन्येन मया चाहर्निशं जाग्रता महानायासोनुभूत इति भावः । इदं दुःखप्रशमनं समयः ॥ ८ ॥

भृत्या इति । भवतो मित्रं किल अलीकमित्यर्थः । सर्वमिति । नपुंसकमनपुंसकेनेत्येकशेषः । जातावेकवचनं च । ते भद्रभटादयो भृत्याः स लेख इत्येवंजातीयं सर्वमुपायजातं वृषलस्य भवत्साचिव्यमिच्छोर्मम नयो नीतिप्रकार इति संक्षेपः । त्वत्संग्रहार्थमेतावान्मया नयः कृत इत्यर्थः । अतिशूरः साहसी भवान्विक्रमादिना मलयकेतुवन्निग्रहीतुं न शक्य इति ध्वनयितुं वीरेति संबोधनम् । इदं बीजवतां मुखाद्यर्थानां विप्रकीर्णानामैक्यार्थोपनयनं कार्यार्थोपसंहृति संहारो नामाङ्गं नवमम् ॥ ९ ॥

---

१ विधानां. २ कां करेण; ०कान्तरेण. ३ °सोभिवादयते. ४ श्वपाक. ५ श्वपाकौ. ६ ताभ्यामेव सह सौहार्दमुत्पाद्य शक०. ७ सहर्षमात्मगतम्. ८ ये ते. ९ चापि०. १० सर्वं मे.

तदयं वृषलस्त्वां द्रष्टुमि[1]च्छति । पश्यैनम् ।

राक्ष०—(स्वगतम् ।) का गतिः [2]एष पश्यामि ।

(ततः प्रविशति राजा विभवतश्च परिवारः ।)

राजा०—(स्वगतम् ।) विनैव युद्धादार्येण जितं दुर्जयं परबलमिति [3]लज्जित एवास्मि । मम हि ।

फलयोगमवाप्य सायकानामनि[4]योगेन वि[5]लक्षतां गतानाम् ।
स्व[6]शुचेव भवत्यधोमुखानां निजतूणीशयन[7]व्रतप्रतिष्ठा ॥ १० ॥

अथवा ।

विगुणीकृतकार्मुकोपि जेतुं भुवि जेतव्यमसौ समर्थ एव ।
स्वपतोपि ममेव यस्य तन्त्रे गुरवो जाग्रति कार्यजागरूकाः ॥ ११ ॥

(चाणक्यमुपसृत्य ।) आर्य चन्द्रगुप्तः प्रणमति ।

चाण०—वृषल संपन्नास्ते सर्वाशिषः । अयममात्यराक्षसः प्राप्तः तदभिवादय[10]स्वात्र भवन्तम[11]मात्यमुख्यम् ।

राक्ष०—(स्वगतम् ।) योजितोनेन संब[12]न्धैः ।

चाण०—(राक्षसमुपसृत्य ।) आर्य चन्द्रगुप्तोभि[13]वादयते ।

राक्ष०—(विलोक्य स्वगतम् ।) अये चन्द्रगुप्तः । य एषः

बाल एव हि [14]लोकेस्मिन्संभावितमहोदयः ।
क्रमेणारूढवान्राज्यं युथैश्वर्यमिव द्विपः ॥ १२ ॥

